CC-0. Digitized by eGangotri and MIDF- Delhi

कर्मफलम्

(संस्कृतरूपकसङ्ग्रहः)



प्रकाशकम्
जयतु संस्कृतम्

रचनाकार :
प्रा.डा. नवराजकट्टेल:

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतम्
२०५५

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतम् इति संस्थायाः २४तमं प्रकाशनम्

कर्मफलम्

(संस्कृतरूपकसङ्ग्रहः)

रचनाकार :
प्रा.डा. नवराजकट्टेलः

प्रकाशकम्
जयतु संस्कृतम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्रन्थस्य नाम : **कर्मफलम् (संस्कृतरूपकसङ्ग्रहः)**
रचनाकारः : **प्रा.डा. नवराजकट्टेलः ।**
प्रकाशकम् : जयतु संस्कृतम्, नेपालः ।
प्रकाशनसौजन्यम् : गोकुलप्रसादसापकोटा
प्रकाशनमितिः : २०८१ भाद्रः, ऋषितर्पणी ।
प्रकाशनप्रति : पञ्चशतम् (५००)
सर्वाधिकारः : रचनाकारे ।
मुद्रकः : किशोरअफसेटमुद्रणालयः ।
मूल्यम् : रु. ५००।-

ISBN: 978-9937-9491-3-2

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समर्पणम्

परमवैराग्यमार्गश्रितायै परमहंसव्राजिकायै मम संस्कृतपठनपाठने प्रेरणादात्र्यै, गुरुभूतायै, निर्व्यूढाभिभावकभूमिकायै, मातृपितृवत्स्नेहकर्त्र्यै, पितृष्वस्रे श्रीहरिहरान्दायै एवञ्च मातृपितृवत् लालनपालनपोषणशीलायै, मम संस्कृतपठने सदैवोत्साहकर्त्र्यै वैराग्यमार्गश्रितायै पैतृष्वसेयायै श्रीमद्भागवतमहापुराणप्रवचनपटुतरायै गुरुभूतायै श्रीविरक्ताबालब्रह्मचारिण्यै इदं पुस्तकं समर्पयामि ।

ते चास्तां मम प्रेरणास्पदयुते बाल्याच्च शिक्षाग्रहे
स्नेहो बालवदुच्चभावसहितो याभ्यां कृतोऽहर्निशम् ।
स्मृत्वा मम भावना च भरिता मोमुद्यते मे मनः
नौमि द्वे गुरुकल्पिते गुरुवरे चाध्यात्ममार्गाश्रिते ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकाशकीयम्

२००४ तमे विक्रमवर्षे एकतन्त्रीयस्य राणाशासनस्य विरोधे सर्वश्रीकस्य पूर्णप्रसादब्राह्मणस्य विमर्शे श्रीभद्रशर्म-राजेश्वरदेवकोटा-कमलराजरेग्मी-पद्मराजाधिकारि- काशीनाथ-गौतमानां नेतृत्वे सञ्चालितं जयतु संस्कृतमिति नामकम् आन्दोलनं नेपालस्य शैक्षिकराजनैतिकेतिहासे महत्त्वपूर्णं स्थानं रक्षति। २०५४ तमे विक्रमसम्वत्सरे तेन आन्दोलनेन स्वस्य पञ्चाशत्तमवर्षस्योपलक्ष्ये स्वर्णमहोत्सवस्यायोजनां विधाय २०५५ विक्रमसंवत्सरे तदान्दोलनं जयतु संस्कृतमिति संस्थायां रूपान्तरयित्वा अस्याः स्मरणे तीनधारापाकशालायाश्छात्रावासस्य वा अग्रे स्मारकस्तम्भः स्थापितः।

तस्यां संस्थायां रूपान्तरितायामनया प्राच्यभाषाधर्मसंस्कृति- परम्परामूल्यमान्यतानां संरक्षणसंवर्द्धने प्रचारश्च स्वस्याः प्रमुखमभियानं लक्ष्यीकृतम्। अथ च संस्कृतस्य लोकप्रियतां वर्धयितुं तस्य पठनपाठनयोः प्रक्रियां व्यापिकां सम्पादयितुं संस्कृतग्रन्थानां नेपाल्यां भाषान्तरेषु च अनुवादकार्यक्रमः कल्पितः। अनूदितानां प्रकाशनं संस्कृतस्य प्रचारप्रसारौ च कल्पितौ। नेपाल्याः संस्कृतेः सभ्यतायाश्च संरक्षणं तदर्थं गोष्ठी-प्रशिक्षण-कार्यशालानां सञ्चालनमित्येतादृशाः कार्यक्रमा आयोज्यमानाः सन्त्यनया।

अस्याः संस्थायाः प्रयासे नेपालस्य नेपालसर्वकारस्य च पुराणतमे समाचारप्रकाशने गोरखापत्रे दैनिके प्रतिमासं संस्कृतपत्रद्वयं २०७२ विक्रमवर्षस्याषाढमासस्य प्रथमदिनतः (जयतु संस्कृतं इति दिवसतः) पाक्षिकरूपेण प्रकाश्यमानं भजते। एवमेव जयतु संस्कृतमिति संस्थायाः प्रयासे २०७५ भाद्रस्य षष्ठगतदिनतो नेपालटेलिभिजनतः (नेपालदूरदर्शनतः) संस्कृतसमाचाराः प्रसार्यमाणाः विलसन्ति। लोकसेवाऽऽयोगे संस्कृतपत्रमेकं रक्षणीयमिति प्रयासे सर्वाणि पत्राणि साधारणानि कृतानि सन्ति। नेपालप्रज्ञाप्रतिष्ठाने संस्कृतविभागसञ्चालने, नेपालस्य मुक्तविश्वविद्यालये अन्येषु विश्वविद्यालयेषु च संस्कृतस्य विषयविभागान् स्थापयितुं प्रयासाः जायममानाः सन्ति। द्वन्द्वकाले पिहितद्वाराणां संस्कृतमाध्यमिकविद्यालयानां पुनःस्थापनायै संस्कृतगुरुकुलानां सुदृढतायै संस्थेयं सक्रिया वर्तते। संस्कृतभाषायाम् उत्तरमहाभारतग्रन्थलेखने, संस्कृते मौलिकग्रन्थानां लेखने, तत्र प्रेरणाप्रदाने संस्थेयं सदा जागरुका अस्ति। संस्कृतनाटकानां लेखने तन्मञ्चने च संस्थेयं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कार्यं कुर्वाणा वर्तते । रूपकाणां सङ्ग्रहः सम्पाद्यते चेत् नाटकानि प्राप्तानि सन्ति रचनाकारेभ्यः । मौलिकस्य संस्कृतग्रन्थस्य प्रकाशितस्य च मूल्याङ्कनं विधाय तदाधारेण जयतु संस्कृतम् इति पुरस्कारेण अद्य पर्यन्तं पञ्चदशविद्वांसः पुरस्कृताः सन्ति। संस्कृतवाङ्मयस्य सेवाया आधारेण च संस्कृतविद्वांसो जयतु संस्कृतम् इति सम्मानेन सम्मानिताः सन्ति। तत्र सम्मानिताः विद्वांसः सन्ति – डा. स्वामी प्रपन्नाचार्यः, आचार्यः प्रा.खेमराजकेशवशरणः, प्रा.डा. वेणीमाधवढकालः, प्रा विद्यानाथोपाध्यायः, शरत्कुमारभट्टराई, प्रा. शिवगोपालरिसालः, पुरुषोत्तमभट्टराई च ।

जयतु संस्कृतमिति संस्थयैव थाइल्याण्डदेशे २०१५ तमे ईशवीयवर्षे षोडशतमे विश्वसंस्कृतसम्मेलने जाते नेपालेऽपि संस्कृतसम्मेलनमेतादृशं स्यादिति प्रतिनिधिद्वारा पत्रं सम्प्रेष्य कृतेऽनुरोधे सा प्रक्रिया अग्रे गता वर्तते। एतादृशस्य सम्मेलनस्य आयोजकेन सर्वकारीयेण विश्वविद्यालयेन भाव्यमिति व्यवस्थायाः सत्त्वात् पुनः जयतु संस्कृतम् इति संस्थया नेपालसंस्कृतविश्वविद्यालयः समनुरुद्धः । तदनुसारेण विश्वविद्यालयेन सर्वापि प्रक्रिया अग्रे सारिता, तदनुसारं वैक्रमाब्दस्य २०७५ आषाढमासे क्यानाडादेशस्य भ्यानकुवरमहानगरे सम्पन्ने विश्वसंस्कृतसम्मेलने नेपालस्य प्रस्तावः स्वीकृतः । अथ च २०१८ खीष्टाब्दे अत्र सम्मेलनं सञ्जातञ्चेत् तेन २०२४ तमे खीष्टाब्दे नेपाले तत्सम्मेलनं भविष्यतीति घोषितमासीत् । तदनु नेपालसंस्कृत-विश्वविद्यालयेन विश्वसंस्कृतसम्मेलनस्य नेपाले सम्पादनाय एका संयोजनसमितिश्च सङ्घटिता वर्तते। इदमपि कार्यं संस्थायाः सक्रियतायां सञ्जातम् इति आस्माकीनो विश्वासः ।

भाषायोगस्य पाठ्यक्रमविकासकेन्द्रस्य च ध्यानाकर्षणं संस्कृतसम्बन्धे कृतमस्ति।संस्थयानया संस्कृतलोकभाषाभियानमपिसञ्चालितम्।राष्ट्रियजनगणनायां संस्कृतमातृभाषाभियानञ्चाग्रे सारितम् । उच्चस्तरीयाय राष्ट्रियशिक्षाऽऽयोगाय (वि.सं २०७५) चास्माभिः महत्त्वपूर्णाः परामर्शाः दत्ताः। तत्रास्माभिः प्रत्तान् अनेकान् परामर्शान् स्वीकृत्य आयोगस्य प्रतिवेदनस्य २०-२१ अध्याये ते समाविष्टाः । एवञ्च साधारणशिक्षायां प्रथमकक्षातोऽष्टमकक्षापर्यन्तं संस्कृतपत्रस्य सन्निवेशाय अनया संस्थया महान् प्रयासः कृतः ।

अनया संस्थया ग्रन्थानुवादः प्रकाशनयोजना च स्वकीयस्य उद्देश्यस्य मूलाधारे समाविष्टास्ति । तदनुसारं पूर्वकार्यसमित्या निवर्तमानेन चाध्यक्षेण प्राध्यापकेन विद्यानाथोपाध्यायेन संस्कृतभाषायां निबद्धानां दार्शनिकग्रन्थानामनुवादं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकाशनपरियोजनाञ्चाग्रे सारितासीत् । तस्या योजनाया निरन्तरताधुनापि अग्रे प्रवर्द्धमाना एवास्ति । तदनुसारं वेदान्त-न्याय-मीमांसा-तन्त्र-जैन-बौद्ध-दर्शनानामनुवादः प्रकाशनञ्च विहितमस्ति ।

संस्कृतभाषायां रचितानां मौलिकग्रन्थानां काव्य-नाटक-कथा-निबन्धादिग्रन्थानां सङ्कलनं, सम्पादनं, प्रकाशनञ्च कुर्वन् अग्रे गन्तव्यमिति संस्थायाः महदुद्देश्यं वरीवर्ति । आवश्यकतानुसारेण सामर्थ्यानुसारेण च ग्रन्थरचना-प्रकाशनानुसन्धानादि-कार्याणि च जायन्त एव ।

अनया संस्थया नैरन्तर्येण संस्कृतलोकभाषाभियानं सञ्चालितं, सञ्चालयिष्यते च । तस्य कृतेऽनेका गोष्ठ्यः कृताः, करिष्यन्ते च । संस्कृतसम्भाषणशिविराणि सञ्चालितानि, सञ्चालयिष्यन्ते च । सञ्चारमाध्यमेषु संस्कृतस्य प्रचारप्रसारौ कृतौ, करिष्येते च । अस्याभियानस्य अभिन्नाङ्गत्वेन संस्कृतरूपकसङ्ग्रह-ग्रन्थसम्पादनाय रूपकानां सङ्कलनस्य, प्रकाशनस्य च योजना विहिता । तदनुसारेण अनेकानि रूपकाणि सङ्कलितानि प्रकाशितानि च भवन्ति एव । अस्याभियानस्य क्रमे प्रा. डा. नवराजकट्टेलवरेण स्वकीयानां लघुरूपकाणां लेखनं सम्पादनकार्यञ्च समकारि । तस्यैवायमपरो ग्रन्थः 'कर्मफलम्' इति संस्कृतरूपकसङ्ग्रहः ।

अहं नवराजकट्टेलमहोदयं २०४० वैक्रमाब्दादेव जानामि, परिचिनोमि च, परन्तु अहं नेपालसर्वकारस्य सेवायां वर्तमानोऽनेकेषु जनपदेषु मम सेवाव्यवस्थापनमभूत् । अतः मया तेन साकं पर्याप्तसम्पर्कस्यावसरो नैव प्राप्तः । अथ च २०५४ तमे वैक्रमाब्दे 'जयतु संस्कृतमान्दोलनं २००४' इत्यस्य स्वर्णमहोत्सवसमारोहे एकस्यामेव समित्यां स्थित्वा कार्यसम्पादनस्यावसरो लब्धः । तस्मिन् समये स सदस्यसचिवत्वेन कार्यं सम्पादयन्नासीत् ।

ततोऽद्यपर्यन्तं आवां एकस्यामेव समित्यां स्थित्वा संस्कृतवाङ्मयस्य, पौरस्त्यसंस्कृतेश्च विकासाय, संरक्षणाय, संवर्द्धनाय च कार्यं कुर्वन्तौ स्वः । नवराकट्टेलो ममानुजः स्पृहणीयव्यक्तित्वञ्चास्ति ।

काष्ठमण्डपे नेपालवेदविद्याश्रमे चत्वारि वर्षाणि समधीत्य एकोनविंशत्यां वयसि रानीपोखरीसंस्कृतमाध्यमिकविद्यालयेऽयं पठनाय सन्नद्धो जातः । तदनु पूर्वमध्यमापरीक्षां समुत्तीर्य त्रिभुवनविश्वविद्यालयस्य वाल्मीकिविद्यापीठे प्रवीणताप्रमाणपत्रकक्षायां पठित्वा परीक्षाञ्च समुत्तीर्य ततः एव प्रथमश्रेण्यां शास्त्रिकक्षा च समुत्तीर्णा । तदनु

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेपालिविषयमवलम्ब्य प्रथमश्रेण्यां स्नातकोत्तरकक्षा, शिक्षाशास्त्रिकक्षा च समुत्तीर्णा। तदनु कट्टेलो नेपालसंस्कृतविश्वविद्यालये नेपालिविषयस्य उपप्राध्यापकत्वेन नियुक्तो जातः । तत्पश्चादयं पाठयन् पठञ्च नेपालसंस्कृतविश्वविद्यालयत आचार्यकक्षा समुत्तीर्य विद्यावारिधिञ्च कृतवान् । तदनु नेपालसंस्कृतविश्वविद्यालयस्य प्राध्यापकपदस्य प्रतिस्पर्धायां प्राध्यापकश्च जातः ।

छात्रजीवनादेव डा. कट्टेलः सामाजिक-राजनीतिक-साहित्यिकगिविधिषु सक्रियो भूत्वा समागतः, अद्यपर्यन्तं स संस्कृतभाषासाहित्यसंस्कृतिसंरक्षणाय, संवर्द्धनाय सक्रियो दरीदृश्यते । छात्रजीवनादेव सः 'संस्कृतच्छात्रसंघः २००४' इत्यस्य पुनः संरचनायां पुनर्जीवनाय च सक्रियो जातः । तदनु ह्यनेन वाल्मीकिविद्यापीठस्य छात्रसङ्घस्य (स्ववियू २०४०-०४२) निर्वाचनं विजित्य सचिवपदे स्थित्वानेकानि कार्याणि व्यधायिषत । कार्यसम्पादनावसरे सर्वकारेण अनेकावरोधान् कुर्वता अल्पावधिकेन दीर्घावधिकरूपेण च कारागारेऽपि पातितोऽयम् । अनेकेषु प्रजातान्त्रिकान्दोलनेषु चास्य संलग्नता दृश्यते ।

प्रा.डा. कट्टेलोऽनेकासु समितिषु स्थित्वाऽनेकानि कार्याणि सम्पादितवान् । स तीनधारासंस्कृतछात्रावास-शतवार्षिकसमित्यां (विसं २०४२) सचिवो भूत्वा कार्याणि समकरोत् । तदवसरे स्थापितं शिलापत्रमधुनापि तत्रैव विलसति, तत्र तत् पठितुं शक्यते । तथैव स 'जयतु संस्कृतम् आन्दोलन २००४ स्वर्णमहोत्सव-समारोह-आयोजक-समित्यां सर्वसम्मत्या सचिवपदे नियुक्त आसीत् । तदवसरे विविधसाप्ताहिककार्यक्रमाणां, वार्षिककार्यक्रमाणाञ्च सम्पादने चानेन महत्त्वपूर्णा भूमिका निर्व्यूढा । अनया समित्या स्मारिका प्रकाशिता, स्मारकस्तम्भः स्थापितः, जयतु संस्कृतमिति स्थायिसंस्था च सङ्घटिता । एवञ्चानेन नेपालसंस्कृत-विश्वविद्यालयस्य प्राध्यापकसङ्घस्य केन्द्रीयसमितेरध्यक्षपदे स्थित्वा च संस्कृतवाङ्मयस्य विकासाय अनेकानि कार्याणि सम्पादितानि । तथैव नेपालप्राध्यापकसङ्घस्य केन्द्रीयसदस्यपदे स्थित्वा च नेपालस्य विश्वविद्यालयानां स्थितिस्थापनाय अनेकाः प्रयाशाः विहिताः। एवञ्चानेन नेपालसंस्कृतविश्वविद्यालयस्य सभासदस्यो भूत्वा, प्राज्ञिक परिषदि च स्थित्वा संस्कृतस्य पक्षपोषणाय चानेकानि कार्याणि विहितानि । अथ च नेपालसर्वकारस्य पाठ्यक्रमविकासकेन्द्रस्य नेपालिविषयसमित्यां स्थित्वा नेपालिविषयस्य पाठ्यक्रम-पाठ्यपुस्तकसम्पादने

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कतिपयावसरे संस्कृतस्य पठ्यक्रमसम्पादने च कट्टेलः सक्रियो जातः ।

जयतु संस्कृतम् २०५५ इति संस्थायाः संस्थापनायाम्, अस्याः संस्थायाः सक्रियतापूर्वकं सञ्चालने चास्य महनीया स्पृहणीया च भूमिकास्ति । जयतु संस्कृतम् इति संस्था नेपाले संस्कृतस्य संस्कृतशिक्षायाः संरक्षणाय विकासाय, प्रचाराय प्रसाराय च उल्लेखनीयं कार्यं कुर्वाण अग्रे गच्छन्ती वर्तते, नेपालस्य संस्कृतप्रणयिनो जानन्त्येव ।

प्रा.डा.कट्टेलमहाभागेन नेपालिभाषायां कविता, खण्डकाव्यं, एकाङ्की, समालोचना, लेखाः, रचनादयश्च प्रकाशिताः प्रकाश्यमानाश्च विद्यन्ते । तद्वद् कट्टेलस्य संस्कृतभाषायामपि कविता, खण्डकाव्यानि, रूपकाणि, लेखाः, समीक्षाश्च प्रकाशिताः प्रकाश्यमानाश्च सन्ति । गोरखापत्रे चायं संस्कृतभाषापृष्ठसंयोजकसम्पादकत्वेन विराजते। इतः पूर्वसमयेऽपि 'नेपाली कथा र उपन्यास : एक अनुशीलन' (वि.सं २०७३), 'उपन्यास समीक्षा' (वि.सं.२०७८), 'संस्कृतकाव्यसिद्धान्त-समीक्षा' (वि.सं.२०७८) 'पण्डित दधिराम पौडेलका व्याकरणात्मक कृतिको अध्ययन' .(वि.सं.२०७९) इति पुस्तकानि प्रकाशितानि विलसन्ति चास्य । अन्यान्यनेकानि दशाधिकानि पुस्तकानि चानेन सम्पादितानि सन्ति । तानि पुस्तकानि नेपालप्रज्ञाप्रतिष्ठानतः, साझाप्रकाशनतः, जयतु संस्कृतम् इति संस्थातश्च प्रकाशितानि विलोक्यन्ते ।

जयतु संस्कृतम् इति संस्था न केवलं रूपकरचनायां प्रकाशने च संलग्ना अपितु संस्कृतनाटकप्रदर्शने च कृतभूरिपरिश्रमा अस्ति । रूपकाणां प्रकाशानन्तरं रङ्गमञ्चे नाटकप्रदर्शनस्य व्यवस्थायै च प्रयत्ना जायमाना सन्ति । प्रकाशितेषु रूपकेषु संस्कृतनाटकमहोत्सवस्यैव आयोजनां कर्तुमस्माकं प्रयत्नो भविष्यति। संस्कृतनाटकमञ्चनस्य प्रतियोगिताच सञ्चालयितुं शक्यते। पारितोषिकस्य व्यवस्थाञ्च अग्रे सारयितुं पार्यते । संस्कृतनाटकरचनाकारेभ्यः प्रोत्साहनस्य पारितोषिकस्य नाटकप्रकाशनस्य च योजना तु पूर्वमेव घोषिता एव । अस्य कृते प्रा.रामहरिदाहालः लक्ष्याधिकानि रूप्यकाणि प्रदाय जयतु संस्कृतम् नाट्यपुरस्कारस्थापनाय अस्मान् प्रेरितवान् आसीत् । तदनु द्विलक्षराशियुतस्य नाट्यपुरस्कारस्य स्थापना च विहितास्ति ।

नेपाले संस्कृतभाषायां नारीणां रचना नैव दृश्यन्ते । अतो नेपालस्य संस्कृतविदुष्यः संस्कृतरचनायामग्रे आगच्छन्तु इति धिया तासां प्रोत्साहनाय, जागरणाय च जयतु संस्कृतम् इति संस्था पृथगेव पुरस्कारस्य व्यवस्थायै चिन्तनशीलाऽस्ति । अस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृतेऽक्षयकोषस्य स्थापनायै मनस्विनां दातृणामन्वेषणं क्रियमाणमस्ति । अस्य कृते जयतु संस्कृतम् इति संस्थाया निवर्तमानसदस्या श्रीमती विद्याकुमारीवज्राचार्या नारीपुरस्कारस्य कृते अक्षयकोशस्थापनाय द्रव्याणि दत्वा नारीप्रतिभाया विकासाय संस्कृचरनायां तासां प्रोत्साहनाय च नारीप्रतिभापुरस्कारञ्च स्थापितवती ।

तस्य यथोचितव्यवस्था च विहितास्ति । नेपाल- संस्कृत विश्वविद्यालयस्य शैक्षिकसेवायामनेका विदुष्यः सन्ति परन्तु ताः काव्यकृतिरचनायां नैव प्रवृत्ताः सन्ति । अतस्ता अपि संस्कृतस्य रचनायां संस्कृतस्य विकासाय विस्ताराय च प्रवृत्ताः भवेयुरिति जयतु संस्कृतमिति संस्थाया अभ्यर्थनास्ति ।

अस्य रूपकसङ्ग्रहस्य प्रकाशने सिन्धुपाल्चोकजनपदे लब्धजन्म अद्यतनसमये अमेरिकादेशे क्रियाशील आचार्यो गोकुलसापकोटा, श्रीमती देवकीसापकोटा च आर्थिकसहयोगं कृतवन्तौ स्तः । एनौ मनस्विनौ दानवीरौ दम्पतीं च जयतु संस्कृतं संस्था हार्दं धन्यवादं कृतज्ञताञ्च ज्ञापयति । अस्य सहयोगस्य व्यवस्थायै इयं संस्था कृतभूरिपरिश्रमाभ्यां श्रीराजकुमारबन्जरा-श्रीमतीभवानीबञ्जराभ्याञ्च धन्यवादं समर्पयति । प्रकाशनव्यवस्थायै सूत्रधारस्य भूमिकासंवहनशीलाय जयतु संस्कृतमिति संस्थायाः पूर्वसहायकसचिवाय वर्तमाने जयतु संस्कृतमिति अमेरिकाशाखायाः सचिववराय आचार्यपीपलमणिसिग्देलाय च भूरिशो धन्यवादाः सन्ति ।

तथैव अस्य रूपकसङ्ग्रहस्य प्रकाशनाय कृतभूरिपरिश्रमाय प्रा.डा. विष्णुप्रसादशर्म-देवकोटावराय एवञ्च प्रा. रामहरिदाहालवराय प्रा.डा.मुकुन्दलामिछाने-महोदयाय च हार्दं धन्यवादं कृतज्ञताञ्च प्रकटयामि । डा. घनश्यामखतिवडावराय च धन्यवादं ज्ञापयामि । अथ चास्मिन् सङ्ग्रहे सङ्कलितानां रूपकाणामध्ययनपूर्वकं समीक्षां कृतवान् प्रा.डा. व्रतराज-आचार्यः । एतस्य भूरिपरिश्रमस्य कृते अग्रजाय आचार्याय कृतज्ञतामाभारञ्च समर्पयामि । अस्य सङ्ग्रहस्य प्रकाशनाय संयोजिताः अन्ये च संस्कृतप्रणयिनो धन्यवादार्हाः । जयतु संस्कृतम् ।

अध्यक्षः

डा. बद्रीपोखेलः

जयतु संस्कृतम्,

अनामनगरम्, काष्ठमण्डपम् - ३२ ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकृतरूपकसंग्रहे मदीया स्थूलदृष्टिः

प्रा.डा विष्णुप्रसादशर्मा देवकोटा

सामान्यतया काव्यं द्विविधं भवति- श्रव्यकाव्यं दृश्यकाव्यञ्च । श्रव्यकाव्यं हि केवलं श्रवणेन पठनेन वा बुध्यते- तद्द्वारा आनन्दानुभूतिर्भवति पाठकानाम्, दृश्यकाव्यञ्च श्रवणेन दर्शनेन च बुध्यते- तद्द्वारा आनन्दानुभूतिर्भवति। तदेव नाटकं नाम । स एव चं दृश्यकाव्यविशेषः। दृश्यकाव्यं हि दशप्रकारकं भवति- रूपकम् प्रकरणम् भाणः व्यायोगः समवकारः डिमः ईहामृगःअङ्कः वीथी प्रहसनञ्च। रूपकस्यैको भेदो नाटकमिति ।

एवञ्च रूपकं व्यापकं नाटकञ्च व्याप्यं बोध्यम् ।अतएव नाटकापेक्षया रूपकस्य व्यापकत्वात् प्रकृतसंग्रहस्य 'रूपकसंग्रहः' इति नामकृत् रूपककारेण । रूपकपदं हि रूपयति यत्र, अत्र वेति विग्रहे 'रूप तत्क्रियाया'मिति धातोः नन्दिग्रिहीत्यादिना सूत्रेणाचि स्वार्थे कनि च सिद्धं भवति। नाटकमिति पदञ्च नटन्त्यभिनेतारो यस्मिन् तदित्यर्थे सिद्धं भवति ।

अस्य नाटकसंग्रहस्य रचनाकारः कृतविद्यावारिधिकः प्राध्यापको नवराजकट्टेलः। विश्वविद्यालयसेवायां सेवारततावेलात एवेमे प्रकृतनाटकरचनायां सक्रिया आसन् । इदानीं सेवानिवृत्ताः सन्तोऽपि महत् कार्यमिदं पूर्णतां नीतवन्तःसन्तीति कर्मयोगनिष्ठता तल्लीनता चैषाम् । नेपालीसाहित्यस्य नेपालीवाङ्मयस्य वा विद्वांसोऽपीमे संस्कृतवाङ्मयस्यापि विद्वांसो जिज्ञासवश्च । अस्मात् कारणादेव नाटकसंग्रहोऽयं पूर्णतां नीतस्तैः । सँस्कृतवाङ्मयसम्वर्धने तत्र रचनाविधानां स्वल्पतायाः परिपूर्त्तये चेमे बद्धपरिकराः ।

विश्वस्मिन् विश्वे भारते नेपाले च सँस्कृतनाटकानां रूपकविधानां वा अत्यल्पत्वं समवधार्यैव अत्र कार्ये संलग्नाः कृतकार्याश्चेमे । स्वकीयनाटकरचनामात्रेण संस्कृतवाङ्मये नाटकानां स्वल्पत्वं न दूरीभवतीति समवधार्य नैज्यामेव सक्रियतायां विविधैर्विद्वद्भि नैकानि नाटकानि लिख्यमानानि लिखितानि च सन्तीति तेषां संग्रहोऽपि निकटे भविष्यति प्रकाशितं भविष्यतीति विद्वद्भिरवधारणीयम् ।

अथ च बहुभिर्विद्वद्भिर्लिखितानामेकाङ्किनां नाटकानां संग्रहोऽपि निकटे एव

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भविष्यति निजाकारे समागमिष्यतीति सँस्कृतप्रणयिभिस्तत्रापि एकाङ्गिप्रणयिभिर्विज्ञेयम्। अत्र सर्वत्र कार्येषु कट्टेलमहाभागानां नैष्ठिकी सक्रियता न विस्मरणीयतां भजते। यतो हीमे सँस्कृतवाङ्मयस्य संस्कृतविचाराणाञ्च सम्वर्धने समर्पिताया जयतु सँस्कृतमिति संस्थायाः सचिवा अपि वर्त्तन्ते। एतावतापि संस्कृतनाटकैकाङ्किनाटकानां लेखनेन संस्कृतवाङ्मयस्य सम्वर्धने बद्धपरिकरा इमे।

जयतु संस्कृतमिति संस्थया प्रतिवर्षं ज्येष्ठमासस्य एकोनविंशतितमे दिनाङ्गे संस्कृतकविगोष्ठी समायोज्यते अस्याः संस्थायाः स्थापनादिवसादेव। तत्र प्रतिवर्षं संस्कृतकवितां विरचय्यान्यैः कविभिः सह इमे कट्टेलमहाभागा अपि कविता विविधशीर्षकेषु श्रावितवन्तश्श्रावयन्ति च। अन्येषां कवितानां समीक्षाञ्च कुर्वन्ति इति एतेषामिदं संस्कृताभ्यासजनकं कार्यम्। तेनैवाभ्यासेन इदानीं रूपकसंग्रहं लिखितवन्त इति द्वितीया कृतिरियं संस्कृतरचनासु। नेपालीभाषायास्तु इमे अधिकृता विद्वांसः प्राध्यापकाश्च। नेपालीभाषायामपि कृतयोऽनेका एतेषां वर्त्तन्ते। ताश्च-

१-नेपाली कथा र उपन्यास : एक अनुशीलन। २-पण्डित दधिराम पौडेलका व्याकरणात्मक कृतिको अध्ययन। ३-संस्कृत काव्यसिद्धान्तसमीक्षा। ४-उपन्याससमीक्षा च। एवमन्याश्च सम्पादिताः कृतयोऽस्य विदुषो विद्यन्ते। यथा च ते (क) लक्ष्मनीयाको गौना (कथासंग्रह, साझाप्रकाशनम्, २०५१), (ख) संस्कृतमा के छ ? (जयतु संस्कृतम्, २०६१), (ग) तारिणीप्रसाद कोइरालाका समग्रकथाहरू, (साझाप्रकाशनम्, २०७१), (घ) विवरणात्मक ग्रन्थ-कोष, नेपाल राजकीय प्रज्ञा प्रतिष्ठानम्, २०६०), (च) संस्कृतकविता-सङ्ग्रहः (द्वितीयपुष्पम्), (जयतु संस्कृतम्, २०७०), (छ) मीमांसापरिभाषा, (जयतु संस्कृतम्, २०७६)। प्रकाशोन्मुखा कृयतयः (क) सृजनाको थुङ्गा (नेपालिकवितासंग्रहः) (ख) मातृशतकम् (संस्कृतशोककाव्यम्)। (ग) पृथ्वीशतकम् (संस्कृतखण्डकाव्यम्) (घ) नेपालमा संस्कृत शिक्षा (पृ.१०००), नेपालप्रज्ञाप्रतिष्ठानम्। (ङ) संस्कृतकवितासङ्ग्रहादयः सन्ति। भाषाद्वयेऽपि इमे विद्वांस एव।

नाटकाचार्यस्य महाविदुषो भरतस्यानुसारमवस्थानामनुकरणमेव नाटकमस्ति- अवस्थानुकृतिर्नाट्यमिति। अवस्थापदस्य तात्पर्यमस्ति-मानवजीवनस्य विभिन्नानां परिस्थितीनां समाधानपूर्वकं तेन स्वजीवनं निर्वहणीयं भवतीति। अस्य प्रत्यक्षस्य जगतोऽतिरिक्तमपि जगद्वर्त्तते काव्यरूपम्। यत्र हि कल्पनाशीलो लेखको रचनाकारो

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वा नवीनस्य काव्यजगतः सृष्टिं करोति। एतादृशी एव रचना नाटकरचना भवति। नाटककलायाश्चरमा सफलता तदैव भवति यदा दर्शका अवास्तविकानामारोपितानां वा नाटकपात्राणां तत्कथनानाञ्च यथार्थत्वं मन्यन्ते। नाटकं केवलं मञ्चनसाधनमेव, अभिनेयं वस्तुमात्रञ्च न भवति किन्तु तत् शिक्षणीयं वस्तु अपि भवतीति शिक्षणेऽपि पठनपाठने आनीयेते इदानीम्। अतः पाठ्यवस्तुतयापि नाटकानां रूपकाणां वा आवश्यकता इदानीं वर्त्तते। अस्मादपि संस्कृते एकाङ्किनाटकानां नाटकानाञ्च लेखनं प्रकाशनञ्च आवश्यकतां बिभर्त्ति।

नाट्याचार्यो भरतो नाटकस्य त्रीणि उद्देश्यानि समभिलिखति- हितोपदेशनम् विश्रान्तिजननम्, विनोदजननं मनोरञ्जनं वा। नाटकं रूपकं वा भरताचार्यः स्वकीये नाट्यशास्त्रे 'क्रीडनकं' कथयति। एतत्कथनस्य तात्पर्यमस्ति नाटकं खेलनस्य मञ्चनस्य वा वस्तु विद्यते। एवञ्च मञ्चनपूर्वकमुपदेशप्रदानं विश्रान्तिवितरणं मनोरञ्जनप्रदानञ्च नाटकस्य वैशिष्ट्यम् ।वेदाश्चत्वारो मन्यन्ते परन्तु भरताचार्यो नाटकं पञ्चमं वेदं मन्यते। एतस्य तात्पर्यमस्ति वेदवदस्योपदेशाः पाठकानां दर्शकानाञ्च हितानि कुर्वन्तीति। केवलं स्तरीयता विषयवस्तुनि भाषायां प्रतिपाद्येषु च स्यादेव। नाटकानामावश्यकत्वं वेदा एव प्रतिपादयन्ति तत्स्रोतश्च स्वयं भवन्ति-नाटकस्य पाठ (विषयवस्तु) उपदेशो वा ऋग्वेदात् प्राप्यते, सामवेदात् गीतानि गृह्यन्ते, यजुर्वेदादभिनयो गृह्यते, अथर्ववेदाच्च रसादयो गृह्यन्ते। तदुक्तं भरतेनैव -

पाठ्यं जग्राह ऋग्वेदात् सामतो गीतमेव च।
यजुर्वेदादभिनयान् रसानाथर्वणादपि॥ इति (भारतनाट्शास्त्रम् ।१। १७)

विभिन्नरुचिमतां सर्वेषामेव कृते नाटकं खलु प्रियं रुचिकरञ्च भवति। तत्र कारणं प्रतीयते सर्वासां कलानामुपस्थितिरत्र भवति। अतएव नाटकमेवं प्रशंसन्ति तदभिज्ञाः-

न तच्छास्त्रं न तच्छिल्पं न सा विद्या न सा कला।
न तद्योगो न तत्कर्म नाट्येऽस्मिन् यन्न विद्यते॥ इति (भरतना. १।११६)

नाटकस्यास्यैव सार्वभौमस्याकर्षणस्य सत्त्वात् देशे उच्चशिक्षापर्यन्तमस्य पठनपाठने क्रियमाणे विद्येते। विश्वविद्यालयेषु नाटकानां पठनपाठनाभ्यां निम्नलिखिता लाभा हस्तगता भवन्ति-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

१-अवसरानुसारेण आचरणानि प्रदर्शयितुं शक्यन्ते । २-मानवस्वभावानां चरित्राणाञ्च ज्ञानं भवति । ३-अभिव्यक्तिसामर्थ्यार्जनं भवति, आचारविचारयोर्ज्ञानं भवति । ५- दुःखदायामपि परिस्थितौ लक्ष्यसाधने सामर्थ्यार्जनयोग्यता च वर्धते ।

प्राचीनसंस्कृतनाटकानां दर्शनेन अनेका विशेषता तत्र दृश्यन्ते । ता विशेषता प्रायेण इदानीमपि पालिता दृश्यन्ते-नाटकस्य प्रारम्भे मङ्गलश्लोको नान्दिपाठो वा भवति । तदनन्तरं प्रस्तावनायाः पर्यायः समागच्छति यत्र सूत्रधारो नाटकस्य प्रयोजनानि प्रस्तौति कथायाः सूत्रं पातयति ।

नाटके यत् स्पष्टरूपेण कथ्यते सर्वोऽपि दर्शकस्तत् श्रोतुं शक्नोति प्रकाशमित्युच्यते, यत् आत्मानं कथ्यते मनस्येव कथ्यते तत् स्वगतं भवति, विशिष्टानां व्यक्तीनां कृते प्रयुक्तः संलापो जनान्तिकम् उच्यते, केनापि कल्पितेन महापुरुषेण देवतया वा कथितं वचो देववाणी भवति । राज्ञ्या स्वपतिं राजानं हे राजन् इति सम्बोधयितु न शक्यते किन्तु देवपदेन स सम्बोध्यो भवति सः । राज्ञा च स्वपत्नीं हे राज्ञि इत्येवंरूपेण न सम्बोधयितु शक्यते किन्तु हे देवि इत्येवंरूपेण सम्बोध्या भवति सा । यथासम्भवं पाराशर्यस्य नवराजस्य रूपकसंग्रहेद्रपि इमानि नाटकीयानि विशेषपदानि प्रयुक्तानि दृश्यन्त एवेति परम्परापालकत्वं रूपककारस्य ।

नवराज कट्टेलमहाभागस्य नेपालीभाषायां सन्त्यनेकाःकृतयः । तासु अनेकासु कृतिषु सतीष्वपि सँस्कृतभाषायामियमुत्तमा कृतिः । संस्कृतभाषायां नैकं रूपकमेतेषां किन्तु रूपककृतीनमेकविंशतिःसंख्या । एकस्य रूपकस्य लेखने शरीरं शिथिलं भवति कृतिमतां का कथा एकविंशतिरूपकाणां लेखनस्य ?अथापि पूरिता सा संख्या कट्टेलमहाभागेन । तल्लीनता सँस्कृतवाङ्मयजिज्ञासा च तत्र कारणम् । रूपकसंग्रहे संगृहीतेषु नाटकेषु कानिचन त्रिदृश्यात्मकानि सन्ति रूपकाणि नाटकानि वा ।

तत्र प्रथमं रूपकं कर्मफलनामकं त्रिदृश्यात्मकम् एवं रत्नाकरीयं नेपालविजयञ्च । अहङ्कारप्रशमनम्, संघातमित्यादीनि लघुनाटकानि कामरूपम् कामरूपा इत्यादीनि चाति लघूनि नाटकानि बोध्यानि । नान्दीपाठरूपो मङ्गलश्लोकोऽत्र न दृश्यते केवलं गणेशसरस्वतीनमस्मरणेन मङ्गलाचरणस्य शिष्टाचारः परिपाल्यते । मङ्गलत्वञ्च विघ्नविनाशकत्वं भवति । रूपकादिरचनायां तत्प्रकाशने च सम्भावितो विघ्नो मङ्गलाचरणेनापासितो भवतीति शिष्टानामाचारः । अतएव महाभाष्यकारेण वृद्धिरादैजिति सूत्रे समुक्तम्- 'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रथन्ते वीरपुरुषाणि भवन्त्यायुष्मत्पुरुषाणि चाध्येतारश्च वृद्धियुक्ता यथा स्यु'रिति। अस्य पतञ्जलिकथनस्यायमर्थः–मङ्गलवत्यो नाटकादिरचनाः प्रसिद्धा भवन्ति।

प्रसिद्धिर्नाम बहुजनसमवेतज्ञानविषयत्वम्। नैकविधजनपठितत्वमित्यर्थः। तत्पाठका-स्तज्ज्ञानेन वीरपुरुषा भवन्ति,शतायुष्यवन्तो भवन्ति, अथ च तदध्येतारो ज्ञानेन कृत्याकृत्यविवेकेन च समृद्धिमन्तो भवन्तीति। एतदर्थमेव मङ्गलस्य नान्द्यादेश्च शिष्टाचारता। रूपकान्ते च कतिपयरूपकेषु सभासदां दर्शकानां देशस्य राज्ञाञ्च मङ्गलानुशासनंसमाचरितंप्राप्यते।यथा–रत्नाकरीयमितिरूपकेपद्यद्वयंमङ्गलानुशासनतया समुल्लिखितं दृश्यते–

कूजन्तं राम रामेति मधुरं मधुराक्षरम्।
आरुह्य कविताशाखदां वन्दे वाल्मीकिकोकिलम्॥
तपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरम्।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम्॥इति च।

अत्र रामनामग्रहणं देवर्षिनारदनामग्रहणमादिकवेर्नामग्रहणञ्च मङ्गलप्रदमिति विज्ञेयम्।

समष्टिरूपेण 'रूपकसंग्रहः' इत्यस्य प्रतिपाद्यानीमानि मम दृष्टौ प्रतिभान्ति–

१–रूपककारः पाश्चात्त्यप्रविधिप्रभावितोऽपि नाटकस्य तत्तत्वानां प्रयोगे सर्वथा पौरस्त्यतत्वप्रभावितो दृश्यते। तद्विचारे– २–सर्वाणि फलानि स्वकर्मजानि बोध्यानि। अतःसत्कर्मभिर्मानवजीवनं यापनीयम्। ३–अहङ्कारेण न कस्यापि हितं विधीयते, अतः स अपासनीय एव। ४– पौरस्त्यसंस्कृतौ तपःशक्तिरसम्भावितमपि साधयति। तत्र मत्स्यगन्धाया योजनगन्धात्वसम्पादनं पराशरस्य तपःशक्तिसाध्यम्। ५–सत्सङ्गस्य सदुपदेशस्य च पौरस्त्यसंस्कृतौ अनितरसाधारणं महत्त्वम्। तत्रोदाहरणं रत्नाकरस्य वाल्मीकीभवनम्। ६–संस्कृतवाङ्मये गुरव एव न किन्तु शिष्या अपि तपः शक्तिसम्पन्ना भवन्तीति सम्पायनादेशेन याज्ञवल्क्येन वान्तं तत्प्रत्तं विद्याजातम्, भगवतः सूर्यतः प्राप्ता च सा यजुर्वेदविद्या स्वतपोबलात्। ७– महिषासुररूपाणामसदाचरणानामसद्वि-चाराणाञ्च सिंहवाहिनीरूपया सन्मत्या विनाशो विधेयः।

८–रक्तबीजायिताचारविचाराः कात्यायनीरूपसद्बुद्ध्या नष्टा भवन्ति। ९–आवेशात् न किमपि कार्यं विधेयम्। १०–गुरुकुलीयाश्रमव्यवस्था पठनपाठनाय सदाचारविचार-शिक्षणाय च इदानीमप्यावश्यकी। ११–

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अभक्ष्यभक्षणमप्रतिरोध्य-कोरोनादिजनकं भवतीति तत्र सतर्कता समवलम्बनीया। १२-प्राकृतिकाः प्रकोपाःसदैव सम्भवन्तीति तत्र सतर्कैर्भाव्यम्। १३-कामोपभोगो विधिसम्मतो मर्यादितश्च स्यात्। १४-मानवजवीनममूल्यं भवति तद्विनाशःकस्यै अपि प्राप्तये न विधेयः। १५-अतिसंग्रहो विग्रहस्य कारणं भवतीति तत्र सतर्केण भाव्यम्। १६-स्वयं शत्रौ आक्रमणं न विधेयम्, तत्कृते आत्मनि समाक्रमणे तु दार्ढ्येन प्रत्याक्रमणं यम्। एवमेवानेकेषु नाटकेष्वनेकाः शिक्षाः प्रदत्तास्ति। सङ्घातः पूतिष्ठाश्चेति विविधा नाटकशैली च विविधा प एवमादर्शा विचाराश्च रूपकमाध्यमेन प्रकटीकृताः सन्ति तत्कर्त्रा। भाषाप्रवाहोऽर्थानुरूपपदप्रयोगश्चाभ्यासनीय इति समुल्लिखन् एवमेव रचनाविधानकार्ये संलग्नाः सन्तः संस्कृतवाङ्मयं सम्वर्धयन्तु ककट्टेलमहाभागा इत्याशासानो विरमामि -

प्रा. डा. विष्णुप्रसादः देवकोटा
कलङ्कीस्थानम् काष्ठमण्डपम्
२०८१, ऋषितर्पणी।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शुभाशंसनम्

प्रा. रामहरिदाहालः

संस्कृतसाहित्यस्य विविधविधासु नाट्यविधाऽस्ति प्राचीनाऽन्यतमा प्रथितविधा। 'काव्येषु नाटकं रम्यम्' 'नाटकान्तं कवित्वम्' न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला। नाऽसौ योगो न ततु कर्म नाट्ये ऽस्मिन् यन्न दृश्यते' इत्यादिवचांसि प्रमाणयन्ति यत् साहित्यसर्जनसमयादेवाऽभिनयप्रधानदृश्यविधासु रूपको रूपकेषु कवयः प्रायतन्त भावकमनोरञ्जनप्रधानत्वात् सद्यः परनिर्वृतित्वाच्च दर्शकाकर्षणं तदीयप्रेमार्जनञ्च नाटककारस्य प्रमुखमुद्देश्यं यच्च दृश्यकाव्यात् सुकरं सुलभञ्च।भावकमनःसंवेगे स्पन्दनानयनाय सफलतार्जनमेव नाटककृतो वैशिष्ट्यं मन्यते। रसवतः सामाजिकस्य रूपकस्य प्रदर्शनाद् झगित्येव दर्शकमनः प्रसीदति। एतदभिनयादेव सम्भवमिति कारणान्नाकस्य महन्महत्त्वं सिद्धयति।

नाट्शास्त्रस्य प्राचीनता

ऋग्वेदे पुरूरवोर्वश्योः, यमयम्योः, इन्द्रेद्राण्योः, सरमापणिसयोः संवादप्रसङ्गाः प्राप्यन्ते। ये च नाट्यकलायाः बीजरूपेण मन्तुं शक्यन्ते। कात्यायनश्रौतसूत्रे सोमाविक्रेतृणां वनवासिनां, यजमानध्वर्ययोश्च संवादो मिलति येन नाट्यकलायाः बीजं प्राचीनतममिति ध्वन्यते। वाजसनेयिसंहिताया एकस्मात् प्रसङ्गादवगम्यते – वैदिकयुगे शैलूषनामको जातिविशेषो व्यावसायिकरूपेण नाटकान्यायोज्य जीवनवृत्तिं निर्वाहयति स्म। यज्ञस्यावसरे नृत्यगायनानि प्रस्तोतुं सूतशैलूषा नियोज्यन्ते स्म। उत्तरकालिकसाहित्ये दशरथस्य रामस्य च राज्यारोहणावधौ अयोध्यायां नाटकमण्डल्या नाटकानि प्रदर्श्य विपुला ख्यातिरर्जिताऽऽसीत्। अराजके जनपदे नटनर्तकाः प्रहृष्टा न भवन्ति, उत्सवा न जायन्ते, राष्टवर्द्धनाः समाजाश्च न वर्धन्ते इति रामायणीयं वचो यथा –

नाराजके जनपदे प्रहृष्टनटनर्तकाः।
उत्सवाश्च समाजाश्च वर्द्धन्ते राष्ट्रवर्द्धनाः ॥(वाल्मीकरामायणम् १।६७। १५)

'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः' इति पाणिनीयं सूत्रम्। अतोऽवगम्यते पाणिनेः पूर्वमेव भिक्षुसूत्रम्, नटसूत्रञ्च निर्मितमास्ताम्, ययोरुद्देश्यं नाट्यकलाप्रशिक्षणमेव

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्भवति । महाभारतान्तर्गत-हरिवंशपुराणस्य एकनवतितमाध्याये वासुदेवस्य अश्वमेधयागस्यावसरे भद्रनाम्ना नटेन विहिताद् नाट्यप्रदर्शनादुपस्थिता महर्षयः परं प्रसन्ना अभूवन् ते भद्रं विविधान् वरान् दत्तवन्त इति वृत्तान्तमुपलभ्यते (हरिवंशः, ९१।२६-३५) । कौटिलीयार्थशास्त्रे चतुष्षष्ट्याः कलानां गणनावधौ नाट्यकलाऽप्येका गणिता । तत्र सुसङ्घटितराज्यव्यवस्थायां कलाविकास आवश्यक इति निगदितम् । (कौटिल्यस्यार्थशास्त्रस्य अध्यक्षप्रचारप्रकरणम् अ.४१, २७ च) । कामशास्त्रस्याचार्यस्य वात्स्यायनस्य कथनानुसारेण तदानीन्तनकाले राज्ये कलापूर्णसरस्वतीभवनेषु पक्षस्य मासस्य च प्रसिद्धपर्वसु नियुक्ता नटा अभिनयान् प्रदर्शयन्ति स्मेति बुध्यते (कामसूत्रम्, नागरवृत्तप्रकरणम्) । एवञ्चानेकेषु ग्रन्थेषु लभ्यन्ते प्रमाणान्येवं विधानि बहूनि, यैः स्पष्टीभवति नाट्यप्रदर्शनं लघुनाट्याभिनयप्रदर्शनञ्च पुराऽऽर्यावर्तीयराज्येषु च भूयोभूयो भवन्ति स्मेति दृष्ट्या नाट्यप्रदर्शनस्य प्राचीनता दृग्गोचरीभवति ।

नाट्यलेखनपरिपाटी

राष्ट्र-राज्यगणराज्यराष्ट्रराज्य-साम्राज्येषु नर्तनगायनाभिनयन-प्रदर्शनक्रियासु पूर्वतः प्रचलितासु सतीष्वपि रूपकलेखनपरम्परा सम्भवतः कालिदासात् किञ्चित् पूर्वसमयात् प्राचलदित्यनुमीयते । विश्वकविकालिदासो मालविकाग्निमित्रमिति नाटके भाससौमिल्लकविपुत्राणां नामानि नाटककारत्वेन सादरं स्मरतीत्यतः कालिदासादेतेषां पूर्ववर्तित्वसिद्धया नाट्यलेखनपरम्परा तत एव प्रारब्धेति वक्तुं सुकरम् । विक्रमशतकात् किञ्चित् पूर्ववर्तित्वमेतेषां समयनिर्धारणं स्यात् । महामहोपाध्यायगणपतिशास्त्रिणा भासस्य त्रयोदशनाटकानि परिगणितानि । संस्कृतसाहित्ये एवंपरिमाणे नाऽन्यैर्नाटकानि लिखितानि । भासमनु कालिदासस्त्रिणि नाटकानि लिलेख । संस्कृतनाटककारेषु कालिदासाश्वघोष-भवभूतयोऽतिविशिष्टं स्थानमलङ्कुर्वन्ति ।

तद्वदेव शूद्रक-विशाखदत्त-नारायणभट्टा अपि अनुगामिनः । दामोदरमिश्रेण हनुमन्नटकमिति महानाटकमपि व्यलेखि । शूद्रकस्य मृच्छकटिकं कविकल्पितं सर्वथा सामाजिकं नाटकम् । यस्य नाम प्रकरणमिति नाटककृता प्रदत्तम् । यत्र नायको ब्राह्मणः, नायिका वसन्तसेना गणिका । नायको दरिद्रः परं तं गणिका वसन्तसेना अन्तरन्तः प्रणयति, न धनिनो राजपरिवारजनान् । दीनः सन्नपि स्वाभिमानी सुशासनपक्षपाती च नायकः । गणिका सत्यपि उदारचरितमवलोक्य निर्धनं प्रीणाति नायिका । राज्यनायकस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विलासमयजीवनत्वाद् प्रजायाः दीनता चिरन्तनीति नाटकीयकथावस्तु मनः स्पर्शकृदस्ति प्रकरणनामधेये रूपके। एवञ्च मुद्राराक्षसं नायिकाविदूषकरहितं ब्राह्मणनायकीयं कूटनीतिकघटनाप्रधानमोजस्वि नाटकम्। चाणक्यराक्षसयोः कूटनीतिकप्रतिस्पर्धायां चाणक्यस्य दूरदर्शनक्षमतया बुद्धिबलेन कूटनीतिकचातुर्येण गूढचरचालन-क्षमतापाटवेन च कूटनीत्या महाहस्ती राक्षसः पराज़यं लेभे। तथात्वेऽपि राक्षसो न दैन्यं प्रापत् परं मगधसाम्राज्यस्य प्रधानमन्त्रित्वेन नियोजित इति चाणक्यस्य कूटनीत्या सहैव औदार्यमुत्कटदेशप्रेम चाभिव्यक्तमस्ति। एतान्नाटकद्वयमेव प्रयोगात्मकं परम्पराविरोधि च दृश्यते। एषा तात्कालिका क्रान्तिकारिता यत्र नाटककाराः सफलाः। कालिदासादीनां चर्चितनाटककाराणां कृते किं वक्तव्यम्! ते सभ्यादर्शसमाजनिर्माणाय, आर्यादर्शाणां प्रचाराय च नाटकान्यलिखन्।

लघुनाटकलेखनपरम्परा

इदानीं नाटकशब्देन यानि परिगण्यन्ते भरतविश्वनाथधनञ्जयादीनां मते नैतानि नाटकानि केवलं रूपकभेदा एव। परं समयगत्याऽधुना प्राच्यपाश्चात्त्य-साहित्यसमन्वयसरण्या दृष्टेः बहुप्रकृतिकनायकत्वे, बहुलसंस्कृत्याचारसत्वेऽपि तत्र नाटकशब्दस्यैव प्रयोगो दृश्यते ऽनुभूयते च। अतो रूपकस्योपरूपकस्य वा यस्मिन् कस्मिन्नपि भेदे स्थितं सदपि नाटकमेव सर्वमभिनयगतं स्वीकर्तव्यमिति प्रतिभाति लोकानुरोधात्, लघुनाटकम्, एकाङ्कीयनाटकं पूर्णनाटकमित्यादिभणित्या दर्शनाच्च। संस्कृतसाहित्ये लघुनाटकानि लघुरूपकाणि वा लिखितानि न लभ्यन्ते, समयवशाल्लिखितेषु सत्स्वपि नष्टानि भवेयुरपि। उताहो मध्यमाकारे बृहदाकारे वा रूपके राष्ट्रराज्ययोर्ध्यानं गतमपि भवितुं शक्ष्यति।

नाटककारशिरोमणिना भासेन लघुनाटकलेखने रुचिः प्रदर्शिता दृश्यते। यद्यपि तस्य स्वप्नवासवदत्तम् षष्ठाङ्कीयं तथा प्रतिज्ञायौगन्धरायणं चतुरङ्कीयं, अभिषेकनाटकं षडङ्कीयं, बालचरित्रम् पञ्चाङ्कीयञ्च नाटकानि दृश्यन्ते। लघुरूपकेषु एकाङ्कीयानि दूतवाक्य-कर्णभार-दूतघटोत्कच-मध्यमव्यायोगो-रुभङ्गनामधेयानि सन्ति। तत्र पञ्चरात्रमङ्कत्रयात्मकं रूपकमस्तीति हेतोः लघुनाटकलेखनपरम्परा भासकवेरेव प्रसृतेति वक्तुं शक्यते।

तत्र दूतवाक्ये वीराद्भूतयोः, कर्णभारे करुणवीरयोः दूतघटोत्कचे वीरकरुणयोः, ऊरुभङ्गे करुणवीरशान्तानाम्, मध्यमव्यायोगे करुणरौद्रवीरभयानककानाम्, पञ्चरात्रे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वीरहास्यवात्सल्यनाम्, अभिषेके वीरकरुणभयानकानम्, बालचरिते वीराद्भुतहास्यानम्, अविमारके शृङ्गारवीरहास्यकरुणानाम्, प्रतिमानाटके वीरकरुणयोः (प्रधानं करुणः), प्रतिज्ञायौगन्धरायणे वीरशृङ्गाराद्भुतहास्यानाम्, स्वप्नवासवदत्ते शृङ्गारकरुणयोः, चारुदत्ते शृङ्गारकरुणहस्यानामिति कृत्वा सर्वेष्वेव रसेषु दत्तावधानः कविः प्रतिभाति।

न हि रसादृते कश्चिदन्यः प्रवर्तते। रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत्, रसवन्ति हि वस्तूनि सालङ्काराणि कानि चित्। एकेनैव प्रयत्नेन निर्वर्त्यन्ते महाकवेः। महाकविना रसप्रवणेन भाव्यम्, नानारसनिरन्तरम्, इत्यादिभणितयो रसवत् काव्यमेव स्वीकुर्वन्ति। सर्वेषां रसानां समुचितप्रयोगकर्ता भासादन्यो न भवेदपि संस्कृतनाटककारेषु इति कथने नापत्तिः स्यात्। अन्यैरपि लघुनाटकानि रूपकाणि वा लिखितानि स्युः पूर्ववर्तिभिः कविभिः। एतत् सम्बन्धे गवेषणा आवश्यकी। अनुसन्धायैवास्मिन् सम्बन्धे वक्तुं शक्यम्।

नैपाललेखकाल्लघुनाटकलेखनपूर्तिः

प्राध्यापको विद्यावारिधिकश्च नवराजकट्टेलः एकदृश्यतो दृश्यत्रयात्मकानि वा ततोऽप्यधिकानि लघुनाटकानि लघुरूपकाणि वा विलिख्य नाट्यसाहित्यजगति लघुनाटकलेखनपरम्परां वर्धयन् दृष्टिपथमवतरति। अस्य कर्मफलनामधेये लघुनाटकसङ्ग्रहे २१ नाटकानि समाविष्टानि सन्ति। भारतेऽपि एवंपरिमाणे एकेनैव कर्त्रा नाटकानि लघुनाटकानि वा लिखितानि न दृग्पथमवतरन्ति। नेपाले तु किङ्कथनीयम्, यत्र नाटकलेखनमेव न्यूनायितं चेद् बहुनाटकलेखनस्य वार्ता दूरे आस्ताम्। नैपालककविना न्यूनतेयं पूरितेति गौरवास्पदोऽयं विषयः। अतः पूर्वं केवलं भासैनैव लघुनाटकानि कानिचन लिखितान्यासन्। बहोः समयस्य पश्चाद् नैपालको कविरत्र जागरूकः संवृत्तः। कर्मफलमिति प्रकाश्यमाने लघुनाटकसङ्ग्रहे एकविंशतिर्लघुरूपकाणि सङ्गृहीतानि सन्ति। अपराणि एकादश लघुरूपकाणि शीघ्रमेव प्रकायिष्यन्ते इति सर्वं श्रुतम्। सर्वापि सङ्कलय्य द्वात्रिंशत् लघुरूपकाणि द्रष्टुं प्रभविष्याम इति महतः प्रमोदस्य विषयो भविष्यति। स प्रतीक्षायाः विषयः। कर्मफलमिति लघुनाटकसङ्ग्रहोऽधुना विवक्षाया विषयोऽस्ति –

जागरणमूलकता

प्रतिष्ठेति लघुनाटिकायां प्रतिष्ठाया जनकश्चिन्तानाथः पुत्रीं पाठयितुं नेहते। पठनावधावेव पाठनादवरुन्धे सः। गृहकृत्ये पुत्री संलग्ना कारिता। तदवधावाततायिभिर्गृहं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ध्वंसितम् । सव्रणा सा चिकित्सालये प्रापिता । अनाथा सा सर्वकारीयसौविध्ये पठित्वा चिकित्सका संवृत्ता । ध्वंसनाद् जीवितः सन्नपि यान दुर्घटनावशादाहतः पिता चिकित्सालयं प्राप्नोति । सा वित्तसहयोगपूर्वकं पितरं स्वस्थं कारयति । पिता प्रायश्चित्तमाचरति । पुत्र्याः समीपे मुहुर्मुहुः क्षमामभियाच्येति दृश्यत्रयात्मकमिदं लघुरूपकं नारीजागरणाप्रधानं वर्तते । दम्पतीभ्यां न जातुचिदपि पुत्रपुत्र्योर्विषये विभेदो धार्यः, सन्ततिः सर्वाऽपि समानेति शिक्षाऽतः प्राप्यते ।

विश्वपिञ्जरमित्यत्र कोरोनारोगेणाक्रान्तस्य विश्वस्य दयनीया दशा चित्रितास्ति । मानवः ज्ञाने, विज्ञाने, कलायां सभ्यतायाञ्चास्मिाभिरेतावान् विकासो विहित इति मदाविष्टोऽस्ति । परं सूक्ष्मतरैः कोरोनाविषाणुभिराक्रान्तः प्रतिकर्तुं न क्षमते । स्वल्पावधौ येन पारेलक्षं व्यक्तयः कालकवलीकृताः । मानवाः पश्यन्नतिष्ठन् । अस्माद् नाटकाद् ज्ञानविज्ञानविषये सर्वैर्दम्भस्त्याज्य इति बुध्यते । प्रकृतेरुल्लङ्घनेन अखाद्यभोजनेन च अपेयपानेनेयं रुगुत्पन्नेति हेतो युक्ताहारविहारयोर्ध्यातव्यमिति च शिक्षा मिलति । सम्प्रति स्वतन्त्रा उड्डीयमानाः पक्षिणः मानवान् सन्दिशन्ति –

डीयन्ते खलु पक्षिणः सुगगने नृत्यन्ति गायन्ति च
मर्त्यान् ते ननु स्मारयन्ति वचसा कष्टञ्च कारागृहम् ।
किं दुःखं कतिधा च पिञ्जरभवं खाद्यस्य पेयस्य वा
स्वातन्त्र्यं सुखकारणं नरपशो ! जानीहि जानीहि भो ! ॥॥

स्वतन्त्रतायाः महत्त्वमवगम्यान्येषां स्वातन्त्र्यं न निरसनीयमिति पक्षिमाध्यमादत्र शिक्षा च मिलितास्ति ।

विगतसंज्ञा मानसीत्यत्र मानसी धीवरस्य प्रेमिका, चित्कला मानस्याः सखी, मतिराजः कश्चनबोधकः कालीगण्डक्या शालग्रामस्थलादागता इमे । भीमसेनस्तम्भपार्श्वे प्राप्त्यवसरे भूकम्पेन स्तम्भस्य भञ्जनात् प्रेमी धीवरो मृतः । चित्कलामानसी जीविते । मानसी मूर्च्छिताऽस्वस्था प्रलपति बहुधा । ताम् चित्कला स्मारयति । मोह एव दुःखस्य कारणम् । चिन्ता मा विधेयेति रीत्या । तदवधौ मातृगृहस्य सौख्यं स्मरन्तीमधुनातनदुरवस्थां चिन्तयन्ती च मानसीं स्मारयति चित्कला 'जीविते भद्रशतानि द्रष्टुं पार्यन्ते, विविधकर्माणि कर्तुं पार्यन्ते । कर्मकृत्वैव शतं समा जीवितुमिच्छेन्नाकर्मणा, कुकर्मणा वा । आत्मघातिनाम् असूर्या लोकास्तमोमया भवन्ति । आत्महत्या न विधातव्येति । अत्र कविना उपनिशदद्दर्शनं प्रतिबोधितम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सङ्कटे धैर्यं धर्तव्यम् (जिजीविषया भाव्यम्) शुभकर्मणि पञ्चतन्त्रे प्रोक्तमपि त्याज्यं न धैर्यं विधुरेऽपि काले

धैर्यात् कदाचित् गतिमाप्नुयात् सः।

सत्यमेव धैर्येणैव जीवति मानवः।

एकदृश्यात्मके कामरूपं कामरूपेति रूपकद्वये विप्रलब्धयोर्नायक-नायिकयोर्मनोभावाश्चित्रिताः सन्ति। मनोविज्ञानप्रधानमेतद् रूपकद्वयम्। अत्र कामनायाः रागस्य च शक्तिः प्रस्तुता। कामव्यथाया अवस्था चित्रिताऽऽस्ति रूपकद्वये। यथा च नाटककृतः शब्देषु 'कामरूपे! एष आगच्छति ...। अहन्तु तव वक्षसि लीनो भूत्वा शयितुं वाञ्छामि, तव मनसि लिलीषामि यत्र आवयोर्भेदः परिसमाप्यते। सामरस्ये निमज्जिषावः। तव मनो मम तपःस्थली, मम मनसस्तव तपःस्थली। ममाङ्गेषु तवाङ्गेषु च चैतन्यं विराजते, व्यष्टिचैतन्यं परिहाय एकाकारे समष्टिचैतन्ये सामरस्ये लीनौ भवाव।'

सङ्घात इति विविधरसात्मकमस्ति लघुरूपकम्। आततायिभिर्माता हता। जयेति माता शकुन्तलेति पुत्री। दीपक इति शकुन्तलाग्रजः। जयराम इति शकुन्तलायाः पिता। जया दीपकश्च मारितौ। छायारूपेण दृष्टाभ्यां ताभ्यां सह शकुन्तला संलपति। सर्वा इच्छा नष्टाः विविधज्ञानं समर्ज्य मानवसेवायां समर्पणात्मिका शकुन्तलायाः इच्छा मातुरग्रजस्य च बीभत्सहत्यया विलुप्ता। मध्यरात्रियामे भोजनं कुर्वन्तमग्रजं बहिरानीय स्तम्भे वद्ध्वा शिरश्छेत्तुं प्रवृत्तान् हन्तुकामा माता घातुकैर्मारिता। छिन्नभिन्नाङ्गान् कृत्वाग्रजोऽपि मारितः। शकुन्तला कदाचिद् रौद्ररूपेण कदाचित् परमोत्साहिस्वरूपेण कदाच्छिान्तरूपेण च स्वं प्रस्तौति। शकुन्तलायाः सखा वीरभद्रो भैरवी सखी च आततायिनः समापयितुं शकुन्तलया सह कार्यं कर्तुं प्रतिजानते।

बालघातकाः खलु दण्डनीयाः।

राष्ट्रघातकाः खलु दण्डनीयाः।

शिक्षकघातकाः खलु दण्डनीयाः।

आततयिनः खलु दण्डनीयाः,

बन्धुघातकाः खलु दण्डनीयाः। इत्युद्घोष्य।

सङ्घातः प्रतिष्ठा चेति नाटकद्वये दृश्यत्रयमभिलषन्ति। तत्र नाटकद्वये एव नारी -पात्रस्य प्राधान्यं विद्यते। अत्रातङ्कस्य नारीशिक्षायाश्च विषयः प्रकाशितोऽस्ति। मौनमित्यत्र प्रकृतिः पुरुषश्च मौनतया करनयनाद्यङ्गमाध्यमेन प्रेम प्रकटयतः। वीरशृङ्गाररौद्रदिभावान् प्रकटयतः। प्रयोगात्मकमिदं लघुरूपकम्। पाश्चात्यसाहित्ये प्रयुक्तं स्यात्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रेतात्मेति एकदृश्यात्मके लघुनाटके श्वेतकृष्णवस्त्रधारिणौ प्रेतौ संवदतः । तौ इदानीं पीडितौ वर्तेते । तौ पथिकौ तर्जयन्ति । पथिकौ द्रव्यलोभं प्रदर्श्यान्यैः परिचालितौ आवाम् । आवाभ्यां महद्दुष्कर्म कृतमिति स्वीकृतौ । तौ जीवने एव स्वपापकृत्यं स्वीकृतवन्तौ धिक्कुर्वाणौ स्तः । अस्मात् प्रसङ्गाद् विचार्य धनलोभेन वा किमपि न कार्यमिति शिक्षा मिलति । सहसा विदधीत न क्रियामविवेकः परमापदां पदम् । इति भारविश्च पूर्वमेव समादिशत् ।

कर्मफले देवदानवघटनोट्टङ्किता । युद्धे प्रायः देवा विजयन्ते दानवानां पराजयो हस्तगतो भवति किमर्थमिति प्रश्ने परिभूः कर्मानुसारेण देवमनुष्या अन्ये वा फलं प्राप्स्यन्तीति उत्तरयति । । निदर्शनाय भोजनं कारयति स्वयम्भूः । भोजनावसरे दैत्यैर्हस्ताकुञ्चनं विना भोजनं भोक्तुं न शक्तम् । देवास्तु परस्परभोजनेन साफल्यध्यगच्छन्नित्यतः सहयोगिभावनया, सहकार्येण च सफलता मिलिष्यतीति सन्देशोऽत्र प्रवाहितः । अहङ्कारप्रशमनरूपके देवदानवयुद्धे पराजितान् दैत्यदानवान् वीक्ष्य समदं हसन-नर्तनपरिभावनकार्येषु निरतान् देवान् शिक्षयितुं तेषां मदमपाकर्तुं पराशक्तिगायत्र्या यक्षरूपेणोपस्थाय तृणप्रदर्शनक्रियया तस्य दाहनप्लावनो-ड्डयनकर्मसु असमर्थान् देवान् लक्ष्यीकृत्य मदत्यागस्य शिक्षा प्रदत्ता दृश्यते । मदो विनाशकारणम् । महिषासुरवधम् इत्यत्र रक्तबीजवधम् इत्यत्रापि मद एव विनाशस्य कारणमिति प्रदर्शितं विद्यते । एवं सर्वत्रैव लघुरूपकेषु जीवनोत्थानप्रधाना उपदेशा विकीर्णा दृश्यन्ते । निदर्शनरूपेणैव किञ्चिदत्रोल्लिखितम् ।

प्राञ्जलशैली

रचना प्रायः प्रसादगुणमयी, पठनावधावेवर्थपुरस्कारिणी । कामरूपके कामरूपः कथयति-

मत्स्यापाङ्गी सुगजगमना पद्मनेत्री सुनेत्री
रामा कान्ता सुमृगनयना शीतलाङ्गी कृशाङ्गी ।
जायाऽजेया हृदयनिवहा मानिनी मानवानां
मन्दं हास्यं हृदि विलसतात् सुन्दरं सुन्दरीणाम् ॥

सामान्य संस्कृताध्येतृणः पद्यस्याऽस्यार्थं स्फोरयितुं प्रभवन्ति । समदयौवनायाः शारीरिकसौन्दर्यमत्र प्रस्फुटितम् । सरलातिसरलभाषायाः प्रयोगाद् रसमयत्वाच्च कविताकामिनी नरीनृत्यति सामाजिकविटेषु । 'अर्थव्यक्तेः प्रसादाख्य गुणेनैव

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परिग्रहः । अर्थव्यक्तिः पदानां हि झटित्यर्थसमर्पणम् ।' शुष्केन्धनज्वलनसम्पर्केण यथा त्वरितं दह्यते चेन्धनं तद्वत् सामाजिका रचनादर्शनावधावेवार्थमधिगच्छन्तीति प्रसादगुणस्य निदर्शनमभूतेयं रचना ।

अपरं निदर्शनम्

उत्तिष्ठोत्तिष्ठ धौरेयो वेदविद्याप्रकाशकः ।
यजुर्वेदस्य शुक्लस्य समुद्धारक ! हे मुने ॥
वेदविद्यां ब्रह्मविद्यां सुधाविद्यां परापराम् ।
ददामि याज्ञवल्क्याय शिष्याय मम धीमते ॥

अत्रापि प्रसादमयी रचना। अर्थः स्फुट एव। भगवता सूर्येण शुक्लयाजुषमन्त्राणां प्रदानावसरे याज्ञवल्क्याय प्रोक्तं वचः । अत्रत्यः सन्देशः स्वस्मिन् योग्यतायां सत्यामपि अन्येऽयोग्या इति नैव वक्तव्यम् । अन्यतिरस्कारेण व्यक्तेस्तेजः क्षीणायते । अनन्तानन्तपरिमाणवति संसारे ऽनन्ते जीवचक्रे कः कियज्जानातीति कथं निर्धार्यते, तत्रापि अहं सर्वज्ञः सर्वसमर्थ इति जातुचितदपि न वक्तव्यम् इति सन्देशोऽत्र वाजसनेयो याज्ञवल्क्य इति रूपके रूपककृता प्रदर्शितं विद्यद्यते ।

पर्यन्ते नाटककृता लघुनाटमाध्यमेन भावकेषु महत्त्वाधायिनः सन्देशाः प्रवाहिताः सन्ति । यथा च आर्यादर्शानां पितृमातृगुर्वतिथिसमर्चाप्रभृतीनां, मदत्यागस्य, नरनार्योरभेदतायाः, कामविजयस्य, क्रोधलोभत्यागस्य, नैपालकसंस्कृतेः ऋषिदर्शनस्य, श्रुतिस्मृतिमहत्त्वस्य, शुद्धाचरणस्य, औपनिषद्दर्शनस्य, अवञ्चनस्य, सहकार्यस्य च शिक्षां प्रतिपदं दर्शकाः प्राप्नुवन्ति ।

अथ च पौरस्त्यपाश्चात्यसरणिद्वयस्यानुसारेण लघुरूपकाणि रचितानि सन्ति येन रूपकेषु कौतूहलं सृष्टं दृश्यते । नाटकदर्शने रुचिर्जागरितास्ति । धवललोहितकृष्णनील–पीतादिवर्णमयविद्युद्द्योतनेन नेपथ्यागत कोलाहलरणवाद्यताडनतर्जनभायनक्रियाभिः सातिशयमुत्सुकता सृष्टेति कारणाद् भाषिकप्राञ्जलतायाः कारणाद् नूतनप्रयोगप्रदर्शनाच्च लघुरूपकाणि दर्शकमनोविजयाय प्रीत्युत्पादनाय च सफलानि सन्तीत्युक्त्वा नाटककर्तुरुज्वलं भविष्यं कामयमानोऽधुना लघुविचारममुमुपसंहरामीतिच ।

जयतु संस्कृतम् ।
कलङ्की, काष्ठमण्डपम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गतिशील नाट्यशिल्पको खोजी

प्रा.डा.व्रतराज आचार्य
१५६ विद्वत्मार्ग, गणेशवस्ती
काठमाडौँ महानगरपालिका

१. विषय प्रवेश

नवराज कट्टेल (वि.सं. २०१७) नेपाली र संस्कृत भाषाका ज्ञाता हुनुहन्छ। उहाँका नेपाली भाषामा चार कृति प्रकाशित भइसकेका छन्। कट्टेलले संस्कृतमा कविता, कथा र लघुनाटक प्रकाशित गर्दै आउनु भएको छ। उहाँ संस्कृतमा एकै पटक २१ ओटा नाट्यरचना (रूपकसङ्ग्रहः) प्रकाशनको तयारीमा हुनुहुन्छ र संस्कृत नाट्यशिल्पलाई आधुनिक नाट्यशिल्पका सापेक्षतामा अघि बढाउन प्रयत्नरत हुनुहुन्छ।

संस्कृत नाट्यशास्त्रीहरूले नाटकमा वस्तु, नेता र रसलाई भेदक तत्त्व मानेका छन् (वस्तु नेतारसस्तेषां भेदकः...। दशरूपकम्, १।११) र यी तीन तत्त्वको भिन्न भिन्न ढाँचामा गरिने प्रयोगबाट रूपकका भेद उपभेद बन्दछन् भन्ने कुरा प्रष्ट पारेका छन्। 'नाटक' रूपकको सर्वोत्कृष्ट भेद भएको हुँदा आधुनिक नाट्यशास्त्रीहरू 'रूपक' शब्दलाई भन्दा नाटक शब्दलाई बढी महत्त्व दिन्छन्।

वस्तु, नेता र रस नाटकका भेदक तत्त्व भए पनि नाटकका सम्पूर्ण विशेषता यतिमा मात्र सीमित हुँदैनन्। भरतले नाट्योत्पत्तिका सन्दर्भमा पाठ्य, गीत, अभिनय र रसलाई नाटकका आधारभूत तत्त्वका रूपमा उल्लेख गरेका छन् (जग्राह पाठ्यमृग्वेदात् सामाभ्यो गीतमेव च। यजुर्वेदादभिनयान् रसानाथर्वणादपि। (नाट्यशास्त्र, १। १७)। यसैगरी रसको विवेचना गर्ने प्रसङ्गमा रस, भाव, अभिनय, धर्मी, वृत्ति, प्रवृत्ति, सिद्धि, स्वर, आतोद्य, गान र रङ्ग जस्ता तत्त्वलाई नाटकका अङ्ग भनेका छन् (रसा भावा ह्यभिनयाः धर्मिवृत्तिप्रवृत्तयः, सिद्धिः स्वरास्तथातोद्यं गानं रङ्गश्च सङ्ग्रहः (नाट्यशास्त्र, ६।१०)।

कट्टेलजीका नाटकको विश्लेषणका क्रममा यहाँ संस्कृत नाट्यशास्त्रीहरूका मान्यतालाई वस्तुस्रोत, संरचना र शिल्प गरी तीन प्रमुख शीषकमा समायोजन गरिएको छ। संस्कृत नाट्यशास्त्रीहरूले नाट्यशिल्पको छुट्टै विवेचना गरेको पाइँदैन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तर नाट्यालेखलाई रङ्गमञ्चीय सामग्रीका रूपमा प्रस्तुत गर्नका निम्ति उपयोग गरिने वस्तुका दृश्य र सूच्य अंश, संवाद र गीत, आङ्गिक, वाचिक, आहार्य र सात्त्विक अभिनय, वाद्य र नृत्य, ध्वनि र प्रकाश जस्ता तत्त्वलाई यहाँ नाट्यशिल्प मानिएको छ। संस्कृत नाट्यशास्त्रीहरूले धर्मी, वृत्ति, प्रवृत्ति, सिद्धि जस्ता तत्त्वको पनि विवेचना गरेका छन् तर यस विश्लेषणमा तिनलाई समावेश गरिएको छैन।

२. वस्तुस्रोतका आधारमा नाटकको विश्लेषण

संस्कृत नाट्यशास्त्रीहरूले नाट्यवस्तुका स्रोतलाई प्रख्यात, उत्पाद्य र मिश्र गरी तीन वर्गमा विभाजन गरेका छन् (प्रख्यातोत्पाद्यमिश्रत्वभेदात् त्रेधापि तत् त्रिधा, प्रख्यातमितिहासादेरुत्पाद्यं कविकल्पितम्, मिश्रं तु शङ्करात्ताभ्यां दिव्यमर्त्यादि भेदतः। दशरूपकम्, १।१५-१६)। यसै आधारमा कट्टेलजीका नाटकलाई पौराणिक, ऐतिहासिक, यथार्थपरक र कल्पनाश्रित गरी चार उपवर्ग विभाजन गरिएको छ। पौराणिक र ऐतिहासिक वस्तुस्रोत प्रख्यात वर्गमा पर्दछन् भने कल्पनाश्रित वस्तुस्रोत उत्पाद्य वर्गमा र यथार्थपरक वस्तुस्रोत मिश्र वर्गमा पर्दछन्। वस्तुतः कुनैपनि वस्तुस्रोत नाटकमा यथावत् प्रयोग गरिँदैन, त्यसमा कल्पनाशीलता पर्याप्त मात्रामा मिसाइएको हुन्छ तथापि वस्तुस्रोतको प्राधान्यका आधारमा नाटकलाई विभिन्न वर्गमा विभाजन गर्ने गरिन्छ।

२.१ पौराणिक नाटकमा वस्तुस्रोत

पौराणिक नाटक भनेका अठार पुराण र उपपुराणका साथै रामायण, महाभारत जस्ता आर्ष ग्रन्थहरूमा पाइने कथानकमा आधारित नाटक हुन्। कट्टेलले यस वर्गका कतिपय नाटकमा उपनिषद्हरूमा पाइने कथानकलाई पनि वस्तुस्रोतका रूपमा ग्रहण गरेको पाइन्छ।

दशरूपककारले पौराणिक वर्गका नाटकलाई दिव्य र मर्त्य गरी दुई उपवर्गमा विभाजन गरेका छन्। दिव्य वर्गका नाटकमा लोकोत्तर जगतका चरित्रहरू रहेका हुन्छन् भने मर्त्य वर्गका नाटकमा पौराणिक कालका मानवीय चरित्र रहेका हुन्छन्। कतिपय नाटकमा दिव्य र मर्त्य दुबै प्रकृतिका चरित्र पनि प्रयोग हुन सक्छन्।

यस सङ्ग्रहमा 'कर्मफलम्', 'अहङ्कारप्रशमनम्', 'महिषासुरबधम्' र 'रक्तबीजम्' दिव्यचरित्रप्रधान नाटक देखिन्छन् भने 'योजनगन्धा', 'सत्यव्रतम्', 'बालशापः' र

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

'बुद्धस्य त्यागः' मर्त्य चरित्र प्रधान नाटक देखिन्छन् । 'रत्नाकरः' र 'वाजसनेयो याज्ञवल्क्यः' मा दिव्य र मर्त्य चरित्र दुबै प्रयोग भएका छन् । 'रत्नाकरम्' र उनका सखा तथा परिवारका सदस्य मर्त्य चरित्र हुन् भने नारद ऋषि दिव्य चरित्र हुन् । यसै गरी 'वाजसनेयो याज्ञवल्क्यः' मा वैशम्पायन ऋषि र उनका शिष्य तथा याज्ञवल्क्य र उनका शिष्य मर्त्य चरित्र हुन् र अज्ञातध्वनि तथा तेजोमय सूर्यप्रकाश दिव्य चरित्र हुन् । कतिपय नाटकमा मानवीय चरित्रले श्राप, आशीर्वाद जस्ता दिव्यशक्ति प्रयोग गरेको पाइन्छ । यस्ता शक्तिका कारण ती चरित्र मर्त्य हुँदाहुँदै पनि तिनमा दिव्यशक्ति अन्तर्निहित रहेको मान्नु आवश्यक देखिन्छ ।

'कर्मफलम्' को वस्तुस्रोत ब्रह्मवैवर्त पुराणमा आधारित देखिन्छ । यसमा देवसेना र दैत्यसेनाका बिचको युद्धलाई आधिकारिक कथानक बनाइएको छ । दैत्यपक्षमा दैत्यराज, विश्रवा, र फेनप चरित्र रहेका छन् भने देवपक्षमा देवराजः, वरूण, अनील र कुवेर चरित्र रहेका छन् । पहिलो दृश्यमा दुबै पक्षका बिच वाग्युद्ध र मल्लयुद्ध देखाइएको छ र दैत्यसेना पराजित भएपछि 'देवताले छल गरी जिते' भन्ने उजुरी लिई ब्रह्माजीको शरणमा गएका छन् । दोस्रो दृश्यमा दैत्यहरू देवताहरूले छलयुद्ध गरी जितेको र ब्रह्माजीले देवताको पक्ष लिएको दोषारोपण गरिरहेका छन् भने ब्रह्माजी आफूले कसैको पक्ष नलिने र सबैले कर्मअनुसारको फल पाउने कुरा गरिरहेका छन् । यसै दृश्यमा ब्रह्माजीका मुखबाट निस्केको वेदध्वनि सुनेर देवताहरू सभामा उपस्थित भएका छन् । दुबै पक्षका उपस्थितिमा ब्रह्माजीले उपयुक्त समयमा आफ्नो निष्पक्षता प्रमाणित गर्ने वचन दिएका छन् । तेस्रो दृश्यमा ब्रह्माजीले अनौठो भोज आयोजना गरेका छन् । उनी अलग अलग भोजनकक्षमा चौरासी व्यञ्जन र थाली राखिदिन्छन् तर उनी सबैले हातका औँला कुइनो नखुम्च्याईकन खानुपर्ने नियम पनि सुनाउँछन् । देवताहरू एकले अर्कालाई भोजन गराएर तृप्त हुन्छन् भने दैत्यहरू एक्लाएक्लै खान खोज्दा तृप्त हुन सक्दैनन् । यसै दृश्यको अन्त्यमा ब्रह्माजी 'कर्मणा इमानि भूतानि जायन्ते, कर्मणा एव फलानि जायन्ते' भनेर आफ्नो पक्षपोषण गर्दछन् ।

'अहङ्कारप्रशमनम्' को वस्तुस्रोत देवीभागवतमा आधारित देखिन्छ । त्यसको ११औँ स्कन्धमा गायत्री मन्त्रको महत्त्व प्रतिपादन गरिएको छ । नाटकको पहिलो दृश्यमा देवता र दानवका बिच युद्ध भएको छ र युद्धमा देवता विजयी भएका छन् । दोस्रो दृश्यमा देवताहरू विजयोत्सव मनाउँदै आआफ्नो शक्तिका कारण

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

युद्ध जितिएको भनी होडबाजी गर्न थालेका छन् तर त्यसै बिच दृश्यमा देखापरेको तेजोपुञ्जले उनीहरूको होडबाजीलाई चुनौती दिएको छ । तेजोपुञ्जले आन्तरिक शक्ति प्रवाहित नगर्दा न त अग्निले तृण दहन गर्न सकेको छ, न त वायुले त्यसलाई हल्लाउन सकेको छ । देवेन्द्र पनि तेजोपुञ्जको स्वरूप थाहा पाउन तपस्या गर्न जाने निष्कर्षमा पुगेका छन् । तेस्रो दृश्यमा देवराज इन्द्र तपस्यामा लीन रहँदा उनले आकाशवाणी मार्फत् त्यो पुञ्ज गायत्रीशक्ति रहेको पत्तो पाएका छन् र त्यसको उपासना शक्ति सिकेर आफू पनि शक्तिमान् बन्ने प्रयत्नमा लागेका छन् ।

यस सङ्ग्रहका नाटकको शक्ति र सामर्थ्य भनेको संस्कृत (भाषा र) नाट्यशिल्पलाई प्रस्तुत गर्नु हो भन्नु उचित देखिन्छ । किनभने यस सङ्ग्रहका अधिकांश नाटकमा इतिहास र पुराणहरूका कथानकलाई वस्तुस्रोतका रूपमा ग्रहण गरिएको छ र नाट्यशिल्पमा पनि यथाशक्य संस्कृत नाट्यशास्त्रलाई आधार बनाउने प्रयत्न गरिएको छ । कतिपय नाटकमा पूर्वरङ्गको प्रयोग गर्नु, नाट्यसंवादमा गद्य र पद्यलाई समान महत्त्व दिनु, अधिकांश नाटकमा गीत र नृत्यलाई स्थान दिनु संस्कृत नाट्यशिल्प झल्काउने केही प्रयत्न हुन् । नाटककार संस्कृत नाट्यशिल्पलाई नाट्यरूढीका रूपमा भन्दा गतिशील परम्पराका रूपमा अघि बढाउन प्रयत्नशील देखिएका छन् । यसैले होला, उनले नाटकलाई अङ्क योजनाअनुरूप विन्यास नगरी दृश्य योजनाअनुरूप विन्यास गरेका छन् । यसैगरी धेरै नाटकमा समानान्तर दृश्य योजना प्रयोग गरेका छन् र चरित्रहरूलाई शिलायित गराउने आधुनिक पद्धति पनि प्रयोग गरेका छन् । कट्टेलले धेरै नाटककमा ध्वनि र प्रकाशलाई बहुविध उपयोग गरेका छन् र एउटा नाटकलाई संवादविहीन भावनाटकसमेत बनाएका छन् ।

कट्टेलका नाटकको वस्तुस्रोत, संरचना र नाट्यशिल्पको विश्लेषण गर्दा यो नाट्यसङ्ग्रह नेपालमा संस्कृत नाट्यपरम्परालाई जीवन्त बनाउन र त्यसलाई परम्परागत शैलीमा मात्र अघि नबढाई गतिशील नाट्यशिल्पका साथ अघि बढाउन गरिएको प्रयत्न हो भनी बुझ्नु उचित देखिन्छ ।

अन्त्यमा, नवराज कट्टेलजीको नाट्ययात्रा यतिमा नै नरोकिएर निरन्तर अघि बढ्दै जाओस् र त्यसले निरन्तर परिष्कार प्राप्त गर्दै जाओस् भनी शुभकामन व्यक्त गर्दछु । साथै नाट्यालेखलाई रङ्गमञ्चमा प्रदर्शन गर्नेतिर नवराजजीको ध्यान आकृष्ट बनोस् भनी सुझाव पनि दिन्छु ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रचनाकरस्योपोद्घातम्

१. विषयप्रवेशः

प्रस्तुतस्य 'कर्मफलम्' इत्याख्यस्य रूपकसङ्ग्रहस्य प्रकाशनावसरे नितरामवधार्य मुमोद्यते मम चेतः । नेपालः प्राचीनकालादेव संस्कृतस्योद्गम-भूमिर्विराजते । अतोऽत्रानेकानि ग्रन्थरत्नानि विरचितानि दृश्यन्ते । नेपालस्य शिखरिशिखरेषु, गुहायां वनराजिषु वा तपस्विनां कविकुलगुरूणां निवासो जातः । वैदिककालादेव नेपाले संस्कृताध्यायनाध्यापनकार्याणि प्राचलन्निति मम द्रढीयसी धारणास्ति । लिच्छविमल्लशाहकालेषु संस्कृतस्य विकासोऽनेकेषु चरणेष्वभवदिति दरीदृश्यते । प्राचीनकाले खल्वियं भाषा लोकभाषासीत् । लिच्छविकाले चेयं भाषा राजभाषासीच्चेद् मल्लकाले शाहकाले चेयं भाषा राजपूजिता लोकमानिता चासीत् । परन्तु राणाशासनतो नेपालेऽपि मेकालेशिक्षापद्धतिः प्रारब्धा। आधुनिकशिक्षापद्धतिप्रभावेण वैदेशिकभाषाप्रभावेण शिक्षानीतिकारैश्च नेपालस्य सर्वा च भाषा लोपोन्मुखाः सन्ति । नेपाले त्रयोविंशत्युत्तरशतं भाषा विलसन्ति । अतः स्वस्वसमूहैर्भाषाभियानसञ्चालकैः स्वकीया भाषा, साहित्यं, स्ववाङ्मयञ्च संरक्षणीयम् । अतः संस्कृतस्यानुयायिभिः, अध्येतृभिः, शिक्षकैः, प्राध्यापकैः संस्थाभिश्चास्या भाषायाः संरक्षणाय विकासाय च प्रयतनीयम् । अस्मिन्नेव संस्कृतलोकभाषाभियानेऽस्य रूपकसङ्ग्रहस्य लघुनाटक-संग्रहस्य वा रचना विहितास्ति ।

२. संस्कृतस्य विकासाय जयतु संस्कृतम् इत्यस्यावदानम्

नेपाले संस्कृतवाङ्मयस्य विकासाय, प्रचारप्रसारय च जयतु संस्कृतमिति संस्था प्रयनरतास्ति । अत एवास्य रूपकसङ्ग्रहस्य रचना संस्कृतलोकभाषायाः अभियानस्य कृते विहितास्ति । अनया संस्थया संस्कृतभाषायामनेकानि ग्रन्थरत्नानि प्रकाशितानि । संस्कृतस्य ग्रन्थकारा विद्वांसः पुरस्कृताः सन्ति । संस्कृतं लोकभाषा भवेदिति धियानया संस्थया संस्कृतलोकभाषाभियानं सञ्चालितमस्ति । तस्य कृते दशदिवसीयसंस्कृतभाषाप्रशिक्षणं, पञ्चदशदिवसीयसंस्कृतभाषाप्रशिक्षणं जूमतन्त्रेण सञ्चालितम् । प्रत्यक्षविधिना त्रैमासिकसंस्कृतभाषाप्रशिक्षणञ्च विहितम् । अनेकेषु सामाजिकसञ्जालेषु संस्कृतस्य प्रचारप्रसारो

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विहितः । संस्कृतवक्तृत्वकला-संस्कृतश्लोकवाचन-प्रतियोगिता च सञ्चालिता । संस्कृतकविगोष्ठी च पञ्चविंशतिवर्षेभ्यो नैरन्तर्येण सञ्चालिता। संस्कृतशिक्षाविकासाय नेपालसर्वकारः सर्वदैवोद्बोधितः । गोरखापत्रे, रेडियोनेपाले, नेपालटेलिभिजने च संस्कृतसमाचारप्रकाशनाय प्रसारणाय च अनया संस्थया सफलः प्रयासः कृतः ।

नेपालस्य शिक्षानीतौ संस्कृतस्य समुचितस्थानविन्यासाय अनया संस्थया महान् प्रयत्नः कृतः । उच्चस्तरीयशिक्षायोगस्य (२०७५) प्रतिवेदने च संस्कृतस्योचितस्थानस्थापनाय संस्था सफला। नेपालस्य शिक्षानीतौ माध्यमिककक्षासु प्रथमतोऽष्टमकक्षापर्यन्तं वैकल्पिकरूपेण संस्कृतपत्रस्य स्थापनाय सफलाभूत् संस्था। नेपाले संस्कृतगुरुकुलानां स्थापनाय, सञ्चालनाय, सौविध्याय च आर्थिकसहयोगाय चानेके प्रयासाः विहिताः। संस्कृतस्य विकासाय प्रचाराय विहितस्य अनेकेषु प्रयाशेषु संस्कृतनाटकलेखनं, प्रकाशनं, प्रदर्शनं नाटककारसम्मानञ्चान्यतरः प्रयासः ।

३. संस्कृतरूपकसङ्ग्रहस्य लेखनं प्रकाशनञ्च

शाहकालीने नेपाले काव्यादिग्रन्थानां बाहुल्येऽपि संस्कृतनाटकस्य अत्यन्ताभावं दृष्ट्वा नाट्यसाहित्यविकासाय, संस्कृतलोकभाषाभियानसञ्चालनाय चास्य रूपकसङ्ग्रहस्य रचनायाः सम्पादनस्य प्रकाशनस्य च प्रयासो विहितः । नेपाले संस्कृतनाटकस्याभावं विचार्य २०७४ वैक्रमाब्दे नाट्यपरियोजनाविषये विमर्शो जातः। कार्यसाधनाय सदस्येभ्यः कार्यभारोऽपि समर्पितः परन्तु विविधकारणेन परियोजनाग्रे नागच्छत् ।

वैक्रमाब्दस्य २०७६ तमे वर्षे विश्वव्यापिरूेण समागतेन कोभिड-१९ इति कोरोना-विषाणुना आविश्वं समाक्रान्तम् । तस्य भयेन विश्वं पिहितम्, नेपालश्च पिहितो जातः । प्राध्यापकाः, छात्राः, शिक्षकाः, कृषकाः, व्यवसायिनः, कलाकाराः, उद्योगाः सर्वे स्वस्वगृहे, स्वस्वस्थाने सीमिताः। एतदवसरे जयतु संस्कृतम् इति संस्थया जूमतन्त्रेण 'नेपालस्य साधारणविद्यालये संस्कृतस्यावश्यकते'ति विषये देशव्यापिरूपेण विमर्शो विहितः । तदनन्तरं नेपालस्य सप्तप्रदेशेषु पञ्चदशदिवसीय-संस्कृतभाषा प्रशिक्षणं विहितम् । जूमतन्त्रेणैव जयतु संस्कृतमान्दोलनस्य हीरकजयन्ती, जयतु संस्कृतं संस्थायाः रजतजयन्तीसमारोहश्च सम्पन्नौ । अस्मिन्नेव क्रमे नाटकानां, एकाङ्कनाटकानां लेखनाय संस्कृतस्य विज्ञाः पुनश्चानुरुद्धाः । त्रिंशदधिकान्यनेकानि एकाङ्कनाटकानि, पञ्चाधिकानि पूर्णाङ्कनाटकानि च संस्कृतसमुपासकैर्लिखितानि । अस्मिन्नेव रचनाप्रवाहे मयापि त्रीणि एकाङ्कनाटकानि रचितानि। एकाङ्करचनाकर्मणि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ममोत्साहोऽवर्द्धत । अनवरतं लिखता मया २१ एकविंशतिसंख्यकानि नाटकानि पूरितानि । तेषां पृथक्संग्रहस्यावश्यकता जाता । अतोऽस्य सङ्ग्रहस्य सम्पादनं प्रकाशनञ्चाग्रे सारितम् ।

४. संस्कृत-नाट्यपरम्परा

संस्कृतसाहित्ये आचार्यभरतस्य नाट्यशास्त्रमेव पौरस्त्यजगति समीक्षाक्षेत्रे प्रथम उपजीव्यग्रन्थोऽस्ति । अनेन शास्त्रेण नाटकस्य, प्रेक्षालयस्य, नृत्यस्य, वाद्यवादनस्य, आभिनयस्य, सङ्गीतस्य छन्दश्शास्त्रस्य विषये च विमर्शो विहितो, विद्वद्भिरनेकाश्च सिद्धान्ताः प्रतिपादिताः । भरतादग्रेऽपि नाटकान्यासन्, पश्चादपि ह्यनेकानि नाटकानि कविभिर्विरचितानि सन्ति ।

(क) संस्कृतस्य प्राचीननाटकानि : संस्कृतसाहित्ये भासः (ईशापूर्वस्य सप्तमशतकस्य) एव प्रथमनाटककारः इति विद्वांसो भणन्ति । भासस्य **प्रतिमानाटकम्, दूतघटोत्कचः, कर्णभारः, उरुभङ्गम्, प्रतिज्ञायौगन्धरायणः, स्वप्नवासवदत्ता** नाटकानि प्रसिद्धानि । ईशवीयप्रथमशतकस्य कालिदासस्य **मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलम्** इति नाटकानि विख्यातानि सन्ति। एवमेव पञ्चमशतकस्य विशाखदत्तस्य **मुद्राराक्षसम्**, शूद्रकस्य **मृच्छकटिकम्**, सप्तमशतकस्य हर्षवर्धनस्य **प्रियदर्शिका, रत्नावली, नागानन्दम्** इति नाटकानि च प्रसिद्धानि विलसन्ति । सप्तमशतकस्यैव भट्टनारायणस्य **वेणीसंहारनाटकमपि लोकप्रियमस्ति । तदनन्तरमपि संस्कृतसाहित्येऽनेकानि नाटकानि विरचितानि सन्ति ।**

(ख) नेपाले रचितानि संस्कृतस्य नाटकानि : नेपालेऽनेकेषु कालखण्डेषु ह्यनेकानि नाटकानि राचितानि सन्ति । तेषां विवरणञ्च प्राप्यते –

(अ) लिच्छविकालीननाटकानि : लिच्छविकाले संस्कृतस्य नाटकानि रचितानि न वेति विषये न कापि सूचना मिलति । तथापि चिनियायातृणा ह्वेनत्साङ्गमहोदयेन लिच्छविकाले उपत्यकायां मनोरञ्जनस्य कृते नाटकानि अभिनियते इति लिखितं प्राप्यते । मल्लकाले शाहकाले च नाटकानि लिख्यन्ते अभिनीयन्ते स्म । तयोः कालेषु लिखितानि नाटकानि मिलन्ति च ।

(आ) मल्लकालीननाटकानि : मल्लकाले संस्कृतभाषायामनेकानि नाटकानि रचितानि मिलन्ति । विभिन्नानां मल्लभूपतीनां समये अनेकानि (३३ संख्यकानि) नाटकानि रचितानि वर्तन्ते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राज्ञो जयस्थितिमल्लस्य समये **रामाङ्कनाटिका, भैरवानन्दनाटकं,** यक्षमल्लस्य समये नरपतिजयचर्याटीका, **पाण्डवविजयनाटकम्,** जगज्योतिमल्लस्य समये **वीरबाहुनाटकम्,** जगज्योतिर्मल्लस्यैव रचना **हरगौरीविवाहनाटकम्, कुञ्जविहारी-नाटकम्,** जितामित्रमल्लस्य **जैमिनिभारतम्, अश्वमेधनाटकम्,** प्रतापमल्लस्य **गीतदिगम्बरनाटकञ्च राष्ट्रियाभिलेखालयेऽधिगम्यन्ते।** धर्मगुप्तस्य (विसं. १४२७) **रामाङ्कनाटिका** प्रकाशिता चास्ति ।

यक्षमल्लः (विसं. १४८५-१४५२) **स्रग्धरास्तोत्रं किलालिखत् ।** भक्तपुरस्य रायमल्लस्य कार्यकाले शुभराज-शूद्रः (विसं. १५३८-१५५३) **पाण्डवविजयम्, रूपमञ्जरीपरिणय-नाटकञ्चालिखत् ।** राजा भूपतीन्द्रमल्लस्य (१७५३-१७७९)समये **महाभारतनाटकं, विद्याविलापनाटकं** प्रसिद्धमासीत्। जगज्जयमल्लस्य (१७७९-१७९१) **अभिनवचन्द्रोदयनाटकं मिलति चेत्** राज्ञः रणजिन्मल्लस्य (१७७९-१८२६) **गणितमञ्जरी, सङ्गीतचूडामणिरिति ग्रन्थस्योल्लेखो** मिलति । मल्लकालोद्भवानि अनेकानि नाटकानि तत्तत् समये अभिनीतानि च आसन् ।

(इ) शाहकाले लिखितानि संस्कृतनाटकानि : राज्ञः पृथ्वीनारायणस्य राजगुरुः शक्तिवल्लभ-अर्यालः (१७८१-१८६३ वै.?) १८४९ तमे वैक्रमाब्दे **जयरत्नाकरनाटकमरचयत् । एवञ्च तेन हास्यकदम्बनाटकं सानुवदं व्यलेखि ।** रामेछापाभिजनेन छविलालसूरिढुङ्ग्यालमहोदयेन (१८९६-१९६३ वै.) १९४९ तमे **वैक्रमाब्दे सुन्दरचरितम् , कुशलवोदयम् पूर्णाङ्किनाटकद्वयं** व्यलेखि । तदनु प्राज्ञः चूडानाथभट्टरायः (१९७८-०५२) **परिणामनाटकं** (२००५) व्यरचयत् ।

संस्कृतस्य महाकविः कृष्णप्रसादघिमिरेवरस्य **पूर्णाहुतिः** (वि.सं २०२८), **नेपालेश्वरगौरम् (२०३५), महामोहः** (२०४२) नाटकानि प्रकाशितानि सन्ति । एवमेव प्राध्यापकस्य खेमराजकेशवशरणस्य भक्तसुदामाचरित्राश्रितं **'मित्रसङ्गमम्'** नाटकं मिलति । पाल्पाजनपदस्य हरिहरशर्म-अर्यालस्य (विसं २०५९) **१.निरक्षरता (दृश्यद्वयि)** २. **मुद्रामेघव्रतम् (दृश्यद्वयि) ३.पश्चात्तापः (एकदृश्यम्) ४.बद्धमुष्टिविलासम् (पञ्चदृश्यम्)** इति रूपकाणि मिलन्ति । नारायणदत्त-शास्त्रिमहोदयस्य (विसं २०१४) **नेपालमाता - नामकं** नाटकं मिलति । एवमेव कविवरस्य रामहरिदाहालस्य कर्मसिद्धिः, शान्तिदूतः, प्रत्यादेषणम्, शान्तिसंविदम् इति एकाङ्करूपकाणि सन्ति। **गुरुकुलचर्यम्, सत्प्रभवम्, आचारिकम्, दृष्टिसृष्टिः** पूर्णाङ्कनाटकानि तेन कविवरेण लिखितानि सन्ति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(५) नेपाले संस्कृतनाटकानां प्रदर्शनम्

नेपालः शिवपार्वत्योः क्रीडाभिः विलसति, शिवो नटराजः शब्देन सम्बोध्यते । अतः अत्र आदिकालादेव गीतसङ्गीतनाटकादीनां प्रयोगोऽभूदिति अनुमातुं शक्यते । नाट्यप्रदर्शने लिच्छविमल्लशाहकाले च अनेकानि प्रयत्नजातानि भूवन् ।

(क) लिच्छविकालः – लिच्छविकालेऽभिनीतानां नाटकानां विवरणं न मिलति । परन्तु चिनियापर्यटकेन ह्वेन्त्साङ्गमहोदयेन तदा मनोरञ्जने गीतनृत्य-नाटकादीनां प्रयोगो भवतीति लिखितं मिलति । अतो लिच्छविकालेऽपि नाटकानां प्रदर्शनं भवति स्म इत्यनुमातुं शक्यते । तानि नाटकानि कीदृशानि आसन्, कैर्लिखितान्यासन्निति विषये न कापि सूचना मिलति ।

(ख) मल्लकालः – मल्लकालेऽनेकानि नाटकानि अभिनीतानि आसन् । तेषां स्वल्पं विवरणं मिलति । मल्लकाले लिखितानि प्रायशो नाटकानि प्रेक्षागृहेऽभिनीतनि चासन्। जगज्योतिमल्लः (वैक्रमस्य १६८५) **हरगौरीविवाहनाटकं, कुञ्जविहारीनाटकं कुवलयास्वनाटकं** लिखितवान्, तदनु तानि च नाटकानि तुलादानसमारोहे प्रदर्शितानीति चिन्तका अनुमानं कुर्वन्ति । जगत्प्रकाशमल्लेन वसन्तपुरराजप्रासादे एका रङ्गशाला च निर्मितासीदिति विज्ञा वदन्ति । जितामित्रमल्लेन अश्वमेधनाटकं लिखितं प्रदर्शितञ्च । प्रतापमल्लः पशुपतिनाथे त्रिमासपर्यन्तं स्थितवान्, मन्दिराणि निर्मितानि, तुलादानं विहितम्। तदवसरे वंशमणिविरचितं **गीतिदिगम्बरनाटकं** प्रदर्शितमिति इतिहासज्ञाः कथयन्ति । प्रतापमल्लः स्वयं कविरासीत्, तस्य रचना शिलापत्रेषु प्राप्यन्ते ।

(ग) शाहकालः – शाहकाले प्रजातन्त्रस्य प्राक् संस्कृतनाटकमञ्चनं भवेत् परन्तु तस्य विवरणं न मिलति । राणाकालेऽपि विविधराणाप्रासादे संस्कृतस्य नाटकानि अभिनीतानि भवेयुः परन्तु तेषां नाटकानां विवरणं न प्राप्यते । यदा चूडानाथभट्टराई, तोयनाथपाण्डेयः, विद्यानाथ उपाध्यायः, ऋषिरामपोखेलः नाटकक्षेत्रे समागतवान्, संस्कृतनाटकसमितिः सङ्घटितवान् ततो नेपाले संस्कृतनाटकप्रदर्शनस्य प्रारम्भो जातः । चूडानाथो नाटकसमितेः सभापतिरासीत् विद्यानथः सचिवपदे विराजितः । विक्रमस्य २०१४ तमे वर्षे संस्कृतनाट्यसमितिः नाटकमञ्चनं कुर्वाणासीत् । अनया समित्यानेकानि नाटकान्यभिनीतानि ।

२०१४ वैक्रमाब्दे भारतस्य राष्ट्रपतिः राजेन्द्रप्रसादो नेपाले समागतवान्, तदवसरे 'मुद्राराक्षस'नाटकमभिनीतमासीत्। चूडानाथतोयनाथयोःनेतृत्वेनाटकस्याभिनयादिकार्यं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्राचलत् । तथैव नेपालराजकीयप्रज्ञाप्रष्ठिानस्य वार्षिकदिवसस्यावसरेऽपि (२०१५) **स्वप्नवासवदत्तं** नाटकं प्रदर्शितमासीत् । एवञ्च चतुर्थ-बौद्ध-विश्वसम्मेनेऽपि '**नागानन्दम्**' नाटकं प्रदर्शितमासीत् । तत्र तोयनाथो नायक आसीत्, गरुडस्य भूमिकायां विद्यानाथ-उपाध्यायः आसीत् । गणेशशर्मा अन्य आसीत् । तत्र त्रिचन्दकलेजस्य प्राध्यापकस्य आशुतोषगांगुलीमहोदयस्य पुत्री नायिकायाः भूमिकायाम् आसीत् । तत्र तोयनाथो नायिका च पुरस्कृता राज्ञा महेन्द्रेण (विद्यानाथतः प्राप्ता सूचना) ।

भारतीयदूतस्य हरीश्वरस्य श्रीमत्या माता संस्कृतस्य विदुषी आसीत् । तस्याः नाम क्षमाराव इति । सा संस्कृतनाटकमपि लिखति स्म । भारतीयदूतावासे नाटकानि प्रदर्श्यन्ते स्म । एकदा रजा महेन्द्रोऽपि दूतावासे आमन्त्रितः । तदवसरे संस्कृतस्य नाटकं प्रदर्शितमासीत् । तत्रैव राजा महेद्रश्चूडानाथं समाहूय अवदत् मन्दस्वरेण 'एते संस्कृतनाटकस्य प्रदर्शने गौरवं कुर्वन्ति । नेपालेऽपि संस्कृतस्य नाटकं प्रदर्शयितुं नैव शक्यते ? शक्यते चेत् प्रयत्नं कुरु ।' चूडानाथेन साधनस्रोतसः समस्या उत्थापिता, राजा मन्त्रालयस्य चन्दमानं समाहूय संस्कृतनाटकस्य कृते साधनस्रोतसो व्यवस्था विधेया इति आदिशत् । तदा राजा महेन्द्रः **अभिज्ञानशाकुन्तलम्** अभिनीयतामिति निर्दिष्टवान् । सर्वा व्यवस्था जाता, तदनु पात्राणि निर्धारितानि, संवादः कण्ठस्थीकृतः, अभिनयस्य अभ्यासो विहितः । नाटकं सिहदरवारस्य प्रेक्षागृहे प्रस्तुतम् । नाटकस्याभिनयं व्यवस्थापनञ्च सफलं जातम् । तत्र भारतीयदूतावासस्य अधिकारिणोऽपि समागताः । अभिज्ञानशाकुन्तले विद्यानाथः सारथेः, ऋषेर्दुर्वसिसः, कश्यपस्य च भूमिकायम् आसीत् (विद्यानाथतः प्राप्ता सूचना) ।

तदनु तत्रैव **मृच्छकटिकम्** इति नाटकमपि अभिनीतमासीत् । तत्रैव त्रिभुवनविश्वविद्यालयस्य वार्षिकदिवसस्यावसरे (२०१८-१९) **मालतीमाधवमिति** कालिदासस्य नाटमभिनीतमासीत् । अस्मिन्नाटके विद्यानाथो निर्देशक आसीत् । तत्र विजयनाथो नायकः, ऋषिरामपोखेलः (सम्प्रति निवृत्तः प्राध्यापकः) कपालकुण्डलायाः भूमिकायमासीत् । तस्मिन्नेव कालखण्डे संस्कृतछात्रसंघः '**भगवदज्जुकम्**' इति नाटकं प्रस्तुतवान् । । विश्वज्योतिचलचित्रमन्दिरेऽपि कदाचित् नाटकं प्रस्तुतम् । तत्र अनेकेषु स्थलेषु विद्यानाथो नवरसस्य भावाभिनयं प्रस्तुतवान् (विद्यानाथतः प्राप्ता सूचना)।

साहित्यदर्पणे रसव्याख्याक्रमे प्रस्तुतानि पद्यानि गद्यखण्डानि च संकलय्य नवरसं निर्मितमासीत् । नवरसस्य प्रस्तुत्या राजा महन्द्रोऽपि हर्षितो बभूव । २०१३ विक्रमतः २०१७ पर्यन्तं संस्कृतस्य छात्राः सक्रियाः आसन्, अनेकेषु कार्येषु भागं गृह्णन्ति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्म। नाटकेषु तेषां महत्त्वपूर्णं स्थानं भवति स्म। तेन विद्यानाथेन छात्रजीवने एव वाराणस्यां **भगवदज्जुकम्** लघुनाटकमभिनीतमासीत्। शाण्डिल्यस्य भूमिकायं विद्यानाथः आसीत्, पश्चात् तस्य नाम एव शाण्डिल्य इति जातः। तत्रैव भारते तेन **अभिज्ञानशाकुन्तलमपि** अभिनीतमासीत्। तत्र तेन पारितोषिकमपि प्रशंसापत्रमपि प्राप्तमासीत् (विद्यानाथतः प्राप्ता सूचना)।

तस्मिन् कलखण्डे खलु 'नेपाली आमाको ऋण' च तोयनाथस्य श्यामदासवैष्णवस्य च नेतृत्वे निर्देशने च अभिनीतो जातः। तत्र केशवदीपकोऽपि भागं गृहीतवान्नसीत्। अपरञ्च संस्कृतस्य **'तमसो ज्योतिर्षि'** नाटकं तोयनाथेन लिखितं, पश्चात् जयतु संस्कृतमिति पत्रिकायां प्रकाशितञ्च। इदं नाटकं डिल्लीबजारस्थ-सांस्कृतिकभवने अभिनीतमासीत् (विद्यानाथतः प्राप्ता सूचना)।

तोयनाथस्यैव निर्देशने लेखनाथपौडेलस्य **'लक्ष्मीपूजा'** नेपालीनाटकमपि सिंहप्रासादस्य प्रेक्षागृहे प्रदर्शितं, तत्र संस्कृतस्य छात्रैरभिनये भागो गृहीतः। तत् प्रेक्षागृहं सिंहप्रासादस्थ-संसद्भवनस्य निकटे आसीत्। तस्मिन्नेव कालखण्डे संस्कृतछात्रावासे बृहदारण्यकोपनिषदो **जनकसभामधिकृत्य** लिखितं नाटकमपि अभिनीतमासीत्। संवादरचना चूडानाथभट्टरायो लिखितवान्। याज्ञवल्क्यस्य भूमिकायां विद्यानाथ आसीत्। सम्भवतश्छात्रावासस्य पुनर्निमाणं विधाय (२०२५ वैक्रमाब्दे) छात्रावासस्यैव सभाकक्षे अस्य नाटकस्य योजना विहितासीत्। यदा चूडानाथः नेपालराजकीयप्रज्ञाप्रतिष्ठानस्य उपकुलपतिर्जातः तदा च **कुमारसम्भवस्य भावाभिनयं** प्रस्तुतमासीत्। तदा प्रज्ञाभवनं निर्मितमासीत्। तत्र भव्यः प्रेक्षालय आसीदस्ति च ।

यदा संस्कृतविश्वविद्यालयस्य स्थापना जाता (२०४३) तत्पश्चात् नाटकस्य अभिनये अनेकानि कार्याणि सम्पादितानि। राज्ञः श्री५ वीरेन्द्रस्य समुपस्थित्यां सुर्खेतजनपदे **मेघदूतस्य भावाभिनयः** प्रस्तुतः। तत्रैव राज्ञः वीरेन्द्रस्य समुपथिस्तौ (२०४४।०४५ वैक्रमाब्दे) भगवदज्जुकम् इति प्रदर्शितम्।

एवञ्च तदग्रेऽपि विद्यानाथ-उपाध्यायभट्टस्य परिकल्पनायां वाल्मीकि-विद्यापीठस्य स्थापनादिवसस्योपलक्षे तत्रैव **रत्नाकरभावाभिनयम्** (२०४०-०४१), प्रदर्शितमासीत्। प्रस्तुतपङ्क्तिकारेणापि रत्नाकरस्य भूमिका प्रस्तुतासीत्। तदनु **भगवदज्जुकम्** (२०४५ वैक्रमाब्दे, महेन्द्रसंस्कृतविश्वविद्यालयस्य समुद्घाटनस्यावसरे, पञ्चश्रीकस्य वीरेन्द्रवीरविक्रमस्य समुपस्थितौ, दाङमण्डले) **मेघदूतस्य भावाभिनयं** (राष्ट्रियसभागृहे, २०५१ वैक्रमाब्दे), **कुमारसम्भवस्य**

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

– **भावाभिनयम्** (२०५१ वैक्रमाब्दे), **कौत्सस्य गुरुदक्षिणा** (२०५२ वैक्रमाब्दे) **भगवदज्जुकम्** (२०५४ वैक्रमाब्दे, राष्ट्रियनाट्यगृहे, जयतु संस्कृतम् २००४ आन्दोलनस्य स्वर्णमहोत्सवस्यावसरे, **रागविरागम्** (२०५४ वैक्रमाब्दे), **शार्दूलसम्पातः** (२०५५ वैक्रमाब्दे), **त्रिशूलप्रहारम्** (२०५८, प्रज्ञाभवने), भगवदज्जुकम् (२०६१ वैक्रमाब्दे), **अस्तव्यस्तम्,** (डीएभीविद्यापीठे २०७०), **स त्वम् अहम्,** (वाल्मीकिविद्यापीठे २०७२), **धिक् मदनम्** (वाल्मीकिविद्यापीठे २०७२), **तमसो ज्योतिषि** (सर्वनामप्रेक्षालये २०७६), विविधसंस्थाभिः प्रदर्शितानि नाटकानि सन्ति । यदा प्रा शिवहरिमरहट्टा विश्वविद्यालयस्य उपकुलपतिः जातः (२०६८–७१) तदा एका नाटकसमितिः सङ्घटितासीत् । तया समित्यापि ललितपुरे डिएभिकलेजस्य सभाकक्षे **कुमारसंभवस्य भावाभिनयं** (नृत्यनाटिकाम्) प्रदर्शितमासीत् । तत्र नाटकाभिनये घनश्यामखतिवडामहोदयस्य महती भूमिका आसीत् ।

एतेषु नाटकेषु प्रा. विद्यानाथ–उपाध्यायस्य, प्रा.डा. ऋषिरामपोखेलस्य, प्रा.डा.वेणीमाधवढकालस्य, प्रा.डा. नवराजकट्टेलस्य, प्रा.डा.श्रीराम–अधिकारीमहोदयस्य, रङ्गकर्मिणः डा. घनश्यामखतिवडामहोदयस्य च योगदानानि सन्ति । घनश्यामखतिवडा संस्कृतरङ्गमञ्चे सक्रियो दृश्यते । संस्थागतरूपेण जयतु संस्कृतम् इति संस्थायाश्च योगदानमस्ति । एवञ्च नेपालसंस्कृतविश्वविद्यालयस्य वाल्मीकिविद्यापीठस्य छात्राणां, कान्तिभैरवगुरुकुलस्य छात्राणाञ्च नाट्याभिनये योगदानानि सन्ति ।

६. प्रस्तुतस्य रूपकसङ्ग्रहस्य विषये

अस्मिन् संस्कृतरूपकसङ्ग्रहे एकविंशति (२१) नाटकानि विलिख्य सङ्कलितानि सन्ति । अत्र सङ्कलितानि नाटकानि लघुस्वरूपे निबद्धानि सन्ति । रङ्गमञ्चं विचिन्त्य नाटकमञ्चनस्य सौविध्यं, प्राविधिकपक्षञ्च विचार्य रूपकाणि विरचितानि वर्तन्ते । द्वित्रिपृष्ठतो विंशतिपृष्टपर्यन्तानि इमानि रूपकाणि विस्तृतानि सन्ति ।

अत्र सामान्यरूपकाणि, मौनरूपकं, एकालापीयरूपकं च सन्ति । तथैव ध्वनिमाध्यमेन प्रकाशमाध्यमेन वाद्यवादनमाध्यमेन प्रस्तोतव्यानि रूपकाणि चात्र विद्यन्ते । एषु रूपकेषु द्वन्द्वतत्त्वस्य उपन्यासः कृतोऽस्ति ॥ एवञ्च रूपकेषु बिम्बात्मकं, प्रतीकात्मकं तत्त्वमपि लसति । अथ च दार्शनिकबिम्बयुतानि रूपकाणि च विलसन्ति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कथ्यस्रोतसो दृष्ट्या विविधस्रोतोयुतानि रूपकाणि विलसन्ति । रूपके ख्यातः, उत्पाद्यः, मिश्रश्च कथ्यस्रोतो भवितुमर्हन्ति । अत्र त्रीणि एव स्रोतांसि प्रयुक्तानि विलसन्ति। कर्मफलम्, अहङ्कारप्रशमनम्, महिषासुरवधम्, रक्तबीजम् योजनगन्धा, बालशापम्, रत्नाकरम्, वाजसनेयो याज्ञवल्क्यः, बुद्धस्य त्यागः, इमानि रूपकाणि संस्कृतवाङ्मये विद्यमानानि कथास्रोतांसि आधृतानि सन्ति । अन्येषु रूपकेषु ऐतिहासिकाः विषयाः, व्यवहारतः सङ्कलिताः, कल्पनाप्रसूताश्च सन्ति । नेपालविजयम्, बहादुरशाहः, भानुभक्तीयम्, इत्यत्र च ऐतिहासिकं विषयवस्तु विलसति । अन्यानि रूपकाणि व्यावहारिकं कल्पनाप्रसूतानि च विषयवस्तुनि सङ्गृह्य रचितानि सन्ति ।

सत्यघटनाश्रितेषु नाटकेषु विश्वपिञ्जरम् विगतासंज्ञा मानसी इति द्वे नाटके स्तः । एवञ्च कल्पनाश्रितानि नाटकानि कामरूपः, कामरूपा, सङ्घातः, मौनम्, प्रेतात्मा, प्रतिष्ठा इत्यादीनि नाटकानि अभिलसन्ति । एवञ्च गतचेतना मानसी, कामरूपः, कामरूपा रूपकेषु शृङ्गारभावधारा च विलसति ।

एवञ्च पितृकुलं, भूकम्पनम्, जीव्यात् सदा संस्कृतम् जैनचर्या, गायत्रीगणेशः, कृण्वन्तो विश्वमार्यम् इत्यादिरूपकाणि व्यवहारतः सामाग्रीः सञ्चीय रचितानि विद्यन्ते। परन्तु एतानि अन्यानि च एकादशनाटकानि अन्यस्मिन् सङ्ग्रहे प्रकाश्यन्ते ।

अत्र संस्कृतनाट्यशैलीं समादृत्य प्राचीनार्वाचीनशैल्याः सम्मिश्रणं विधाय च नूतनशैल्यां रूपकाणि विरचितानि दरीदृश्यन्ते । कतिपयेषु नाटकेषु सूत्रधारः, नटी इत्यादीनाञ्च प्रयोगो विद्यते । कतिपयेषु नाट्यरचनासु पद्यस्य प्रयोगोऽस्ति । एकं रूपकं पद्यशैल्यामेव विरचितमस्ति । अन्येषु रूपकेषु स्थाने स्थाने पद्यानि च प्रयुक्तानि सन्ति। अत्र रङ्गमञ्चं विचार्य सहजायाः सरलभाषायाश्च प्रयोगो विहितः । संवादाः नातिदीर्घाः । नातिसमासयुतानि, नातिसन्धियुतानि पदानि चात्र प्रयुक्तानि सन्ति। कानिचित् रूपकाणि विहाय सर्वेषु एव रूपकेषु स्वल्पानि एव पात्राणि (२-५) प्रयुक्तानि विलसन्ति । अल्पपात्राणां प्रयोगस्य कारणेन रङ्गव्यवस्थापने, पात्रचयने, प्रशिक्षणे, प्रस्तुतिकरणे च सरलता, सहजता आयास्यतीति मदीया धारणास्ति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

७. धन्यवादज्ञापनम्

अस्य सङ्ग्रहस्य लेखनक्रमे उत्साहयन्तं जयतु संस्कृतमिति संस्थाया अध्यक्षं डा. बद्रिपोखेलमहोदयं हार्दं धन्यवादं विज्ञापयामि । रूपकाणि आद्योपान्तं विलोक्य समीक्षणं विधाय मामुत्साहयन्तं गुरुवरं प्रा.डा. व्रतराज-आचार्यविपश्चिन्महाभागमाभारं प्रकटयन् हार्दं धन्यवादं ज्ञापयामि । अनेन विदुषा नाटकं (रूपकं) सूक्ष्मतया विलोकितं, परिष्काराय विमर्शो दत्तः । गुरुवरस्य निर्देशनं मया परिपालितम् । आद्योपान्तं नाटकानि मनोयोगेन पठित्वा व्याकरणगतत्रुटीः संशोध्य सहयोगं प्रदातृभ्यः प्रा.डा.विष्णुप्रसाददेवकोटाविपश्चिते, प्रा. रामहरिदाहालकवये, प्रा.डा. मुकुन्दप्रसाद-लामिछानेविपश्चिते च धन्यवादं विज्ञापयामि । एवञ्च रङ्गविधाने विमर्शनशीलाय घनश्यामखतिवडावराय च हार्दं धन्यवादं व्याहरामि । प्रकाशने सहयोगशीलाय आचार्याय गोकुलप्रसादसापकोटावराय, पीपलमणि-सिग्देलाय, सहयोगशीलायै मम धर्मपत्न्यै च धन्यवादमर्पयामि ।

जयतु संस्कृतम् ।

प्रा.डा. नवराजकट्टेलः
चाबहिलः, काष्ठमण्डपः-७
नेपालः ।
२०८१, भाद्रः ३, ऋषितर्पणी, विश्वसंस्कृतदिवसः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रूपकक्रमसूची

		पृष्ठम्
प्रकाशकीयम्	डा. बद्रीपोखेलः	४
प्रकृतरूपकसंग्रहे मदीया स्थूलदृष्टिः	प्रा.डा. विष्णुप्रसादशर्मा देवकोटा	१०
शुभाशंसनम्	प्रा. रामहरिदाहालः	१६
गतिशील नाट्यशिल्पको खोजी	प्रा.डा.व्रतराज आचार्य	२४
रचनाकरस्योपोद्घातम्	प्रा.डा. नवराजकट्टेलः	५१

(क) पौराणिककथाश्रितानि रूपकाणि

१.	कर्मफलम्	६४
२.	अहङ्कारप्रशमनम्	७५
३.	महिषासुरवधम्	८६
४.	रक्तबीजम्	९५
५.	योजनागन्धा	१०६
६.	रत्नाकरम्	११४
७.	वाजसनेयो याज्ञवल्क्यः	१२४
८.	सत्यव्रतम्	१३५
९.	बालशापः	१३९
१०.	बुद्धस्य त्यागः	१४८

(ख) ऐतिहासिककथाश्रितानि रूपकाणि

११.	नेपालविजयम्	१५४
१२.	बहादुरशाहः	१७६
१३.	भानुभक्तीयम्	१९३

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(ग) सत्यघटनाश्रितानि रूपकाणि

१४.	विश्वपिञ्जरम्	२०५
१५.	विगतसंज्ञा मानसी	२२०

(घ) कल्पनाश्रितानि रूपकाणि

१६.	कामरूपम्	२२६
१७.	कामरूपा	२३०
१८.	सङ्घातः	२३४
१९.	मौनम्	२४४
२०.	प्रेतात्मा	२४७
२१.	प्रतिष्ठा	२५३

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रथमः खण्डः

पौराणिककथाश्रितानि रूपकाणि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कर्मफलम्

पात्रपरिचयः

दैत्यराजः	: दैत्यानां राजा	विश्रवः	: दैत्यसेनायाः प्रमुखः
फेनपः	: दैत्यसेनायाः सदस्य	कुबेरः	: देवगणस्य सदस्यः
वरुणः	: देवगणस्य सदस्यः,	अनिलः	: देवगणस्य सदस्यः
बिडपा	: दैत्यदलस्य सदस्यः	परिभूः	: ब्रह्मा
देवराजः	: देवानां राजा	सेवकः	: परिभुवः सेवकः

प्रथमं दृश्यम्

स्थानम् - समरशिविरम्। समयः - मध्याह्नः।

(यवनिकायाः पृष्ठभागे मधुरो विद्युद्दीपो प्रकाशते, मारय, मारय, घातय घातय, छिन्दि, भिन्दि इति शब्दः समरवाद्यञ्च श्रूयते। कुत्रचित् मां पाहि भो मां पाहि भो इति, कुत्रचित् मां समुद्धर, मां समुद्धर इति च श्रूयते)

दैत्यराजः

(बिडपा दैत्यराजो नैव दृश्यते छायैव प्रतिभाति) शान्तं पापम्। शान्तं पापम्। पुनश्च वयं पराजिता भविष्यामः किम्! प्रयत्नस्तु विहित एव। परन्तु छलेन वा बलेन देवा एव विजयं प्राप्तुं शक्नुवन्ति।

विश्रवः

(प्रकाशे घोषः, चत्वरञ्च दृश्यते) न हि बलेन तेषां विजयः, छलेन मायाबलेन वा तेषां विजयः सम्भवति।

फेनपः

(हासयन्, साभिनयम्) उग्रे मायाकर्मणि ते निपुणाः। अस्माकं योद्धारो युद्धकलायां कुशलाः सन्ति तथापि ते मायाजालेन प्रताडिता वर्तन्ते। विधिरपि अस्मान् एव विभेदं करोति। विधातापि इन्द्रादिदेवानामेव पक्षपोषणं करोति।

(कुबेरः, वरुणः, अनिलश्च युद्धमुद्रायां सत्वरं प्रविशन्ति)

कुबेरः

(साहङ्कारम्) एते पलायॄय इत आगताः सन्ति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

फेनपः

(सोद्वेगम्) रे कुबेर ! प्रलापं मा कुरु, यूयं पराक्रमेण युद्धं नैव कुरुथ, छलेन मायाजालेन समरं रचयथ। आगच्छ युद्धाय, देवदूताः ! सावधाना भवन्तु। *(खड्गम् उच्चालयति)*

दैत्यराजः

(सक्रोधम्) रे कुबेर ! प्रमादं कुरुषे ! सर्वे देवा पलायिता युद्धक्षेत्रात्, त्वमात्मानमतिमन्यसे ! न हि शब्देन समरे विजयो लभ्यते । आगच्छ, चन्द्रहासं चालय !

वरुणः

(सोद्वेगम्) अरे मूर्ख ! बिडपा युद्धक्षेत्रात् पलाय्य इत आगतः, पुनः प्रमादं प्रकरोषि ! *(चन्द्रहासं समुच्चालयति)* ।

विश्रवः

(सरोषम्) अरे कुबेरवरुणौ ! न प्रमादः कर्तव्यः, अस्माकं पितृपितामहेभ्यः पराजिता भूत्वा सुराः कतिचिद् वर्षाणि गिरिगह्वरेषु निलिल्युः, अधुना वृथा प्रलापं कुरुथ ।

अनिलः

(सक्रोधं नटति) हे विश्रव त्वमात्मानमतिमन्यसे ! झटिति एव विनाशाय जायते । आदिसमये हिरण्याक्षेण दैत्यराजेन देवान् हन्तुं प्रयासो विहितः, पृथ्वी प्लाविता, हाहाकरोऽजायत, परन्तु द्वन्द्वयुद्धेन वराहस्तं जघान ।

दैत्यराजः

(सरोषं नटति) एष एव घोरोऽन्यायः । तदा च विष्णुश्छलयुद्धेन कापट्येन च तं जघान, अधुना च कापट्ययुद्धं रचयन्तः सन्ति। पराक्रमं विना जिगीषवः सन्ति। मुष्टामुष्टियुद्धेन, खड्गयुद्धेन, शरयुद्धेन, वज्रयुद्धेन वा देवाः समरं विजेतुं नैव शक्नुवन्ति ।

कुबेरः

(सक्रोधं परितो भ्रमति) दैत्याः ! यूयं सदैव तमिस्राशक्तिं समादाय समाजे तमिस्रां विलिम्पितुं वाञ्छथ, स्वस्येन्द्रियसुखाय सर्वान् देवमनुष्यान् पीडयथ, सृष्टिरहस्यं नैव जानीथ, यः 'पूर्वेषामपि गुरुः कालेनानवच्छेदात्' तस्य रहस्यं किं नैव चिन्तयथ । चन्द्रहासस्य उन्मादे एव माद्यथ ।

दैत्यराजः

(सोद्वेगम्) सुरेन्द्राः स्वप्नजगति लीयन्ते, ते सर्वान् च स्वप्ने शाययन्ति। असत्यस्य,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अदृष्टस्य च वार्तां कृत्वा सर्वान् मोहयन्ति, सर्वाणि वस्तूनि क्षणभङ्गुराणीति गदित्वा वस्तुसत्यम् अवमन्यन्ते, असतो भावो न विद्यते, सतोऽभावोऽपि न जायते, अतीतानागतं वस्तुतः अस्ति, धर्माणामध्वभेदात् । ते असत्ये वर्त्मनि स्थित्वा सत्यं समीहन्ते, वयं तु अस्मिन्नेव सत्ये वर्त्मनि स्थित्वा सत्यं समीहामहे ।

कुबेरः

(सोद्वेगम्) नैतत् सत्यम् । एताः अपः, एतत् ज्योतिः, एषो वायुः, इमानि खलु भूतानि कुतो जायन्ते, कस्मिन् विलीयन्ते, कस्मात् पुनरुद्भवन्ति ! स्थूलदृष्ट्या, भोगदृष्ट्या च सत्यं नैव दृष्टिगोचरं भवति । यौस्माकीना दृष्टिर्भोगाय कल्पते, आस्माकीना दृष्टिस्त्यागाय कल्पते, भो पामराः !

दैत्यराजः

के पामराः ! कुतः पामराः ! *(सक्रोधं नटति)* भो दैत्यभटाः ! युद्धाय सज्जीभवत । इमे नैव पलायेरन्, अस्माकं चक्रव्यूहे पतेयुः ।

कुबेरः

(सभ्रमम्) भो वरुण ! भो अनिल ! कथय कथय, सर्वान् युद्धभटान् त्वरितमागमनाय, एते अस्मान् मारयिष्यन्ति, घातयिष्यन्ति ।

दैत्यराजः

(सोन्मादं सचन्द्रहासं भ्रमयति) ह ह ह ! भीतं चित्तम् । अपगतो भ्रमः । स्खलित उन्मादः । किं किं जल्पथ । भूमिरापोऽनलोऽनिलाः सत्यपूताः सन्ति । तेभ्यश्चैतन्यम्। अन्ये तु कल्पनैव। अयं चन्द्रहासः शिरश्छिनत्ति, एतत् सत्यम्, पश्य कथं छिनत्ति ! *(चन्द्रहासमुत्थापयति)* ।

कुबेरः

(सभयम्) दैत्यराज ! अहमत्र वार्ताकरणाय आगतोऽतो वयं दूता स्म, दूता नैव हन्तव्या, अपि तु सत्कारेण स्वकथनपूर्वकं प्रत्यावर्तनीया, तदैव अन्तिमा शान्तिवार्ता भविष्यति ।

दैत्यराजः

(खड्गमुत्थाय) अशक्तानां वार्ताकरणम्, अशक्तानां मैत्रीकरणं, सबलानां तन्न, शक्तिरेव युद्धजयकारणं, समर्थश्चेत् समागच्छ । नो चेत् क्षमां याचित्वा प्रयच्छ ।

कुबेरः

एवं मा कथय ! एवं मा कथय । वयमपि युद्धविशारदाः, समरक्षेत्रे क्षमायाचनं कथं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्भवति ! दूतत्वेन सङ्घटिता वयं, समरनीतिं विचारय, वयं नैव हन्तव्याः, परं क्षन्तव्या ।

फेनपः

(हसति) भ्रमपूर्णं वचनमुक्त्वा पलायितुं चेष्टतेऽयं मायावी ।

दैत्यराजः

(सोद्वेगम्) कुबेर ! किं प्रलापं कुरुषे । न यूयं क्षन्तव्याः । यूयं ह्यत्रैव हन्तव्याः ।

बिडपाः

दैत्यराज ! इमे अत्रैव हन्तव्याः, इमे मायाविनः सन्ति ।

फेनपः

(हासयति) छलनमेतेषां कर्म, वयं कारुणिकाः एते धूर्ताः ।

दैत्यराजः

(सक्रोधम्) भो देवद्वेषिणः कुत्र स्थ ! आगच्छत, युद्धाय कृतनिश्चयाः ।

कुबेरः

(सत्वरम्) आगच्छ वरुण, अनिल, सुनिल, नलकूबरौ, जयन्त आगच्छत !

दैत्यराजः

आक्रमणम् !

कुबेरः

आक्रमणम् !

(कुबेरो, वरुणः, अनिलः, सुनिलो, गोलाकारेण त्सरुं प्रहृत्य घर्षयन्ति, चन्द्रहासश्चमत्करोति, ततो घोषः समायाति, धूमं विस्फोटयति, रङ्गे धूमो व्याप्नोति, न किञ्चिद्दृश्यते, वाद्यध्वनिः श्रूयते, विद्युतायते गगनं, कारुण्यवाद्यध्वनिश्श्रूयते, रङ्गः क्रमशः प्रकाशितो भवति, न कोऽपि दृश्यन्ते । दैत्यराजः, अवशिष्टाः केचिद्दैत्याश्च क्रमशो दृश्यन्ते)

दैत्यराजः

(सक्रोधम्) मायाजीविभिः पुनश्च माया विहिता, अस्माकं सैन्याः विघातिताः ।

फेनपः

(नटति) जालं सञ्जालं वा वितन्वन्ति देवाः ।

दैत्यराजः

(गगनं विलोक्य) भो पितामह ! कथमस्मासु भेदं कल्पयसि । वयमपि भवतः सन्ततयः,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देवाश्च भवतः सन्ततयः । परन्तु सुराणां पक्षपोषणं करोसि । कथं त्वं परिभूः कथं विभुः । देवास्तु वञ्चयन्ति एवास्मान् । ते दुर्मनसः सन्ति । तेषां पक्षपोषणं संरक्षणं करोषि किम् ? भो दैत्या गच्छामः, ब्रह्मसदनं गच्छामः, तत्र गत्वा सर्वं विनिवेदयाम ब्रह्मदेवम् । आगच्छतो, गच्छामः । इतो गच्छामस्ततो गच्छामः । *(इति निष्क्रान्ताः सर्वे)*

द्वितीयं दृश्यम्

स्थानम् - ब्रह्मसदनम् । समयः - पूर्वाह्नस्य प्रथमप्रहरः ।

(वायुर्वाति, चमत्करोति विद्युत् गगने । प्रकाशान्धकारयोर्द्वन्द्वं प्रजायते । वाद्यध्वनिश्श्रूयते । वेदध्वनिः प्रगुञ्जति । वेदध्वनिना सह परिभूश्चतुराननो ब्रह्मा पीताम्बरधरः, सकमण्डलुको, सश्मश्रुयुतः, वरदहस्तो रङ्गे दृश्यते, तदनु दैत्यराजादयः प्रविशन्ति)

परिभूः

भो दानवाः ! किमजायत । किमर्थमत्र प्रलापं कुरुथ । का च समस्या समुत्पन्ना ! किं सुरेन्द्रैरत्याचारो विहितः !

दैत्यराजः

(पादयोः पतन्ति, साञ्जलिर्नमन्ति) किमर्थं भो विधातस्त्वमस्मान् भेदं करोषि, वयमपि तव सन्ततयः, तेऽपि सन्ततयः, तथापि त्वं तेषां पक्षपोषणं किमर्थं करोषि ! भवता समदर्शिना भाव्यम् । समानो व्यवहारः कर्तव्य इति ह्यस्माकं मतिः ।

परिभूः

(शान्त्या गभीरेण रवेण) नैतत् सत्यम् । कर्मणा हीमानि भूतानि जायन्ते, कर्मण्येव विलीयन्ते, कर्मवशगा जगत्, अहमपि कर्मवशगः, तेऽपि कर्मवशगाः, यूयमपि कर्मवशगाः, न मया भेदः सृष्टः, 'कर्माशयः' फलभाग् भवति । 'सत्कर्म' 'सत्साधनं' कुरुथ । भाग्यमुदेति ।

दैत्यराजः

अस्माभिः कर्म विहितम्, तैश्च कर्म विहितम्, परन्तु तेषां सत्फलमुदेति, अस्माकं कर्म निष्फलं कथम् !

परिभूः

सर्वेषां मनसि 'अहं सत्यं वदामि, धर्मं चरामि' इति भ्रमबोधो जायते । अतो मम

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रयासो निष्फलं, तस्य प्रयासो सफलमिति भ्रमजन्यं ज्ञानमुदेति । तान् देवानपि समाहूय अधुनैवाहं सत्यस्यान्वेषणं करोमि । *(सेवकं समाह्वयति)*, मम आज्ञास्ति, तत्कालमेव स्वर्गस्य देवादयश्च अस्यामेव सभायां समागच्छन्तु ।

सेवकः

(नत्वा नतशिरसा च) अधुनैव उपस्थापयामि प्रभो ! *(निर्गच्छति)*

(रङ्गे पुनः अलं प्रकाशो दृश्यते, परिभुवो वदनात् वेदध्वनिर्वाद्यध्वनिश्चाभिगुञ्जति । कलरवाणां, नदनदीनाञ्च मधुरो नादः समायाति । ससम्भ्रमं समायान्तो देवाः निःश्वासपूर्वकं प्रविशन्ति ।)

देवराजः

ओम् ! हिरण्यगर्भ ! भवन्तं नमस्करोमि, नमस्करोमि । किमर्थं भवता समाहूता वयम् ? कस्मिन् विषये विमर्शश्चलन्नस्ति ? *(कुबेरः, वरुणः, भास्करः सर्वे च नमस्कुर्वन्ति)*

दैत्यराजः

देवराज ! नमस्करोमि । कुशलिनो भवन्तः ?

(अन्ये च बिडपा, फेनपः, विश्रवा, उग्रशिरश्च, देवराजं नमन्ति)

कुबेरः

भो परिभू ! किमर्थं भवता वयमत्र समाहूताः !

दैत्यराजः

(जनान्तिकम्) कमलासनः सर्वदेवास्मान् विमोहयति, छलं रचयति, देवान् पोषयति । *(चतुर्वदनस्य समीपं गत्वा)* भवतो वेदध्वनिना सम्मोहिताः वयं सत्वरमत्र समागताः ।

देवराजः

अहमितोऽस्मि चतुरास्य ! शुक्रशिष्याः किमर्थं भवन्तं सेवेरन्, वयं पादपूजकाः स्म, सर्वे च ऋषयो भवन्तं स्तुवन्ति, वेदाः गायन्ति, उपनिषदो ध्यायन्ति । अतो वयमेव भवतः प्रियशिष्याः ।

दैत्यराजः

हे अण्डज ! वयं कर्मवीराः, कर्मणि अस्माकं विश्वासः । अमृतान्धसः कापट्येन स्ववैभवं वाञ्छन्ति । वयं पराक्रमेण, ते छलेन कार्यसिद्धिमिच्छन्ति, वयं तपसा बलेन समिच्छामः । ते मनसि ह्यन्यत्, वचसि ह्यन्यत्, कर्मणि ह्यन्यत् कुर्वन्ति । वयं मनस्येकं, वचस्येकं कर्मण्येकं कुर्मः, तथापि भवान् तेषामेव पक्षपोषणं करोति,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

किमर्थं भो। भवता समं व्यवहर्तव्यम् इति अस्माकं द्रढीयसी धारणा।

परिभूः

दितिनन्दनाः। यौष्माकीणी दृष्टिर्भ्रमपूर्णा दरीदृश्यते, सर्वेषां कृते मम हस्तौ सर्वदैव अभयदानमुद्रयोर्भवतः। ये यं यं वाञ्छन्ति ते तं तं प्राप्नुवन्ति। समेषां देहिनां कर्मैव फलप्रदाता। नाहं पक्षपोषणं पक्षशोषणञ्च विदधामि। सर्वे कर्मणैव जायन्ते, कर्मण्येव विलीयन्ते। कर्मफलमेव भुञ्जते।

देवराजः

(इन्द्रो नटति) भो पितामह! भवता सत्यमुक्तम्। परमसत्यमेवेदं सृष्टिः सम्पादयति, परमसत्यादेव इमानि भूतानि जायन्ते, लीयन्ते च। परन्तु मायावशादेव वयं तस्य चमत्कारकृत्यं नैव जानीमहे। वयं भोगे लीनाः, त्वामिन्द्रियजन्यसुख-साधनेऽस्मान्नियोजयसि। भवान् कदाचित् वैभिन्न्यमपि करोति, कदाचित् देवपक्षपोषणं कदाचित् दैत्यपक्षपोषणं करोति।

परिभूः

(सक्रोधं नटति) भो इन्द्र! त्वं सर्वथा अपभाषसे। नाहं कस्यापि पक्षपोषणं करोमि, स्वकर्म एव सर्वत्र प्रतिफलति। ब्रह्मादयः सर्वे एव कर्मवशगाः। 'फलञ्च पुरुषार्थत्वात्' सर्वत्र लभ्यते। कर्मफलं निश्चयं श्रुतिप्रमाणात्। सत्कर्म कुरुत। कदाचिदहं परीक्षणं करिष्यामि भो। अधुना स्वस्वकर्मभूमौ गच्छत।

(हिरण्यगर्भं प्रणम्य सर्वे परस्परं विपरीतस्य दिशो निर्गच्छन्ति। वाद्यं ध्वनति, ओङ्कारं वेदमन्त्रश्च गुञ्जति, सर्वे गच्छन्ति, वाद्यं मधुरायते, रङ्गं ह्यन्धकारायते।)

तृतीयं दृश्यम्

स्थानम् – वनकुञ्जम् । समयः – मध्याह्नः

(सवाद्यम् ओङ्कारध्वनिर्वेदध्ननिश्च श्रूयते। विद्युद्दीपः कदाचित् मधुरो कदाचित् अतिप्रकाशश्च जायते। कदाचित् वनकुञ्जे छायायां देवाः कार्याणि कुर्वन्तः इव प्रतिभान्ति, कदाचित् दैत्या कर्मकरणे सज्जा इव दृश्यन्ते, मध्ये मध्ये वाद्यध्वनिश्च गुञ्जति। ततः प्रविशति परिभूः, प्रकाशो नृत्यति, पूर्ववद् वेदध्वनिश्चश्रूयते)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परिभूः

(मौनं इतस्ततः करोति) आगच्छत देवा ! आगच्छत दैत्या ! किं कर्माणि कुर्वन्तः सन्ति ? कर्मफलं ददामि ।

(तत्र रङ्गे विचित्रं दृश्यं दृश्यते विचित्रो ध्वनिश्चश्रूयते)

देवराजः

(साभिनयं प्रणम्य) भो प्रजापते ! किमर्थं वयं स्मृताः । अस्ति कश्चित् कार्यविशेषः ?

(सर्वे च देवा परिभुवं प्रणमन्ति)

परिभूः

(अभयमुद्रां प्रदर्श्य) अस्ति । सर्वं सत्ये प्रतिष्ठितम् । सदात्मनि स्थिरो भव । कर्मणा एवापूर्वफलं मिलति । सृष्टिस्थितिलयाश्च कर्मणा समुत्पद्यन्ते ।

दैत्यराजः

(पृथक् मार्गात् प्रविश्य साभिनयं नुत्वा) भो परमेष्ठिन् ! किमर्थं भवता वयम् आहूताः ? किमस्माभिः करणीयमस्ति ?

परिभूः

(अभयमुद्रायाम्) कार्यमस्ति, भवद्भिरधुना पर्यन्तं कानि कार्याणि साधितानि ?

दैत्यराजः

(सगौरवम्) अस्माभिर्बहूनि कार्याणि विहितानि । यन्त्राणि आविष्कृतानि । सुखहेतुभूतानि भौतिकवस्तूनि निर्मितानि । तस्य क्रमे कदाचित् मानवैः साकं कदाचित् देवैः साकं युद्धं विहितम् । कदाचित् सर्वा च धरा अस्माकं वशवर्तिनी आसीत् । वयं तु कर्मकराः, कर्मणि एव विश्वासो वर्ततेऽस्माकम् ।

देवराजः

भो विधातः ! अस्माभिरपि बहूनि कार्याणि कृतानि । भौतिकसुखलब्धये आध्यात्मिकसुखप्राप्तये च तस्य मार्गो विचारितः । भवतो ज्ञानपरम्परा स्थापिता ।

परिभूः

साधु साधु ? भो देवदानवा । अद्य अत्रैव भोजनस्य सर्वापि व्यवस्था कृतास्ति । सर्वे च देवा एकस्मिन् प्रकोष्ठे भोजनाय गच्छन्तु । अपरस्मिन् प्रकोष्ठे दैत्याः तिष्ठन्तु । देवानां प्रतिनिधयो दैत्यप्रकोष्ठे, दैत्यानां प्रतिनिधिर्देवप्रकोष्ठे च गच्छन्तु ।

देवराजः

(साभिनयम्) हे पितः ! किं विचित्रं करोषि ? अस्माभिः किं कर्तव्यं तत् करिष्यामः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परिभूः

न किमपि कर्तर्व्यम्। भोजनं भोक्तव्यम्। सर्वे सज्जाः भवन्तु। यदाहं आज्ञापयिष्यामि तदैव भोजनस्य प्रारम्भो विधेयः।

(प्रकाशो मन्दायते। ओम् इत्युक्ताऽऽज्ञानुसारं सर्वे च स्वस्वप्रकोष्ठे गतवन्तः। सर्वाणि भोजनवस्तूनि स्थापितानि सन्ति। तत्र वस्त्रेण कोष्ठविभाजनं कृतं दृश्यते।)

देवराजः

भो ब्रह्मन् ? बुभुक्षिता वयम्। अग्रे च चतुरशीतिव्यञ्जनानि सन्ति। मुखं रसायते। उदरं क्षुधाग्रस्तं वर्तते।

दैत्यराजः

(नटति) विष्ठर ! भोजने सज्जा वयम्। आज्ञापयतु भवान्। क्षुधावेगेन प्रताडिता वयम्। विनाविलम्बेन शीघ्रमेव भोक्तुंकामा वयम्।

परिभूः

(साभिनयम्) अग्रे भोजनानि प्राप्तानि ? *('प्राप्तानि' इति प्रतिवचनं गुञ्जति)*। 'परमसत्याय नम' इति अर्पय। 'दिव्यपितृभ्यो नम' इति अर्पय। 'देवगन्धर्वमनुष्यपशुभ्यो नम' इति अर्पय।

देवराजः

ओम् परमसत्याय नमः। *(सर्वे)* ओम् नमः पार्वतीपते हर हर।

दैत्यराजः

ओम् परमसत्याय नमः।

परिभूः

सज्जीभूता यूयम् ? परन्तु क्षमध्वम्। क्षणं तिष्ठन्तु। मम निर्देशनं श्रृण्वन्तु–यथारुचिं इच्छाभोजनं गृह्णन्तु। परं मम एकः समयोऽस्ति, मम समयं स्वीकृत्य भोक्तव्यम्। मम समयोऽस्ति भोजने हस्ताकुञ्चनं नैव विधेयम्। सरलेन हस्तेन खादितव्यम्।

(सर्वे परस्परं विलोक्य चकितचकिता इव, बुभुक्षया पीडिता इव अभूवन्)

दैत्यराजः

(दैत्यान् विलोकयन् परस्परं नटति) हस्ताकुञ्चनं विना कथं भोक्तव्यं भो

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उग्रशिरा ! अहं तु इत्थं खादामि (इति नटति । चतुरङ्गुलचालनमात्रेण भुञ्जते, सर्वे तमनुकुर्वन्ति)

देवराजः

(साभिनयम्) भो कुबेर ! हस्ताकुञ्चनं विना कथं भोक्तुं शक्यते । किं कथयति अस्माकं पिता ? *(नटति कुवेर, अन्ये च परस्परं वदन्ति)* ।

कुबेरः

भो इन्द्रदेव ! अहं भोजनेऽसफलो जातः, हस्ताकुञ्चनं विना भोक्तुं नैव शक्यते । बुभुक्षया पीडितोऽपि अहं त्वां भोजयामि, अनेन कर्मणा भोजनदानं परसेवा च भवति, मत्कृते न भवति चेत् त्वत्कृते भवतु भोजनम् ।

(कुवेरो हस्तेन इन्द्रं भोजयति भोजनम् । सर्वे च देवा तमनुकुर्वन्ति । देवतानां प्रकोष्ठे एकोऽपरं भोजयति, अपरोऽपरं भोजयति । परन्तु दानवानां प्रकोष्ठे सर्वे च दैत्या भोजने व्यस्ता आसन् । चतुरङ्गुलचालनमात्रेण स्थिता आसन् । तेषां दैत्यानां वस्त्राणि, शिरस्त्राणि च सूपैः, व्यञ्जनैः सिक्ताः । ते विरूपा जाताः ।)

परिभूः

(सोद्वेगम्) देवा आगच्छत । कीदृशमासीत् भोजनम् ।

देवराजः

(साभिनयम्) भो पितः ! भोजनं सुस्वादुरासीत् । चतुरशीतिर्व्यञ्जनानि, दध्योदनं, घृतोदनं, हैयङ्गवीनम्, कालसेयं, मधु, इक्षुरसश्च, स्वादूनि फलानि बहुभुक्तं, बहुपीतम् ।

दैत्यराजः

(अधोमुखं कृत्वा) अस्माकं बुभुक्षा नैव शाम्यति । हस्ताकुञ्चनं विना कथं भुज्यते ? कथं चोस्यते ?, कथं लिह्यते ? वयन्तु बुभुक्षिता एव ।

परिभूः

समानेनैव व्यवहारेण निर्देशनेन वा देवा भुक्तवन्तः पीतवन्तश्च । यूयं कथं बुभुक्षया ताडिताः ? किं मया छलो विहितः ? किं मया भेदो विहितः ? पक्षपातः कृतः ? भवन्तः प्रतिनिधीन् पृच्छन्तु ।

दैत्यराजः

(सोद्वेगम्) भो पितामह ! हस्ताकुञ्चनं विना भोजनं कथं विधेयं, तत्तु काठिन्यमेवासीत् । अतो बुभुक्षिता दैत्याश्चतुरङ्गुलचालनेन भोजनाय प्रयत्नम् अकुर्वन् । तेन कार्येण कथं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बुभुक्षा शान्ता भवेत् ? तेषां वस्त्राणि एव मलिनानि अशोभनीयानि अभूवन् ।

देवराजः

(साभिनयम्, उर्ध्वबाहुं विमोचयन्) अस्माभिस्तु चतुरशीति व्यञ्जनानि अभोजिषत । शर्करादधिमधुघृतादिवस्तूनि गृहीतानि, घृतौदनादीन् अन्नप्रकारान् रसप्रकाराँश्च बहुधा भुक्तवन्तः, पीतवन्तश्च ।

दैत्यप्रतिनिधिः

(नटति) मया उभयत्र एव विलोकितम् । या व्यवस्था दैवकोष्ठे आसीत् सा एव व्यवस्था दैत्यप्रकोष्ठेऽपि विहितासीत् । न कोऽपि भेदः पक्षपातो वा विहित आसीत् ।

परिभूः

(शान्तमुद्रया) कर्मण इमानि भूतानि जायन्ते । कर्मण एव फलानि जायन्ते । प्राणिनां सुखानि दुःखानिं च कर्मण उद्भवन्ति । कर्मण एव विलीयन्ते । सतः सज्जायते, असतोऽसज्जायते । अतः सत्कर्म कुरुत । सर्वे परस्परं मिलित्वा परोपकारं कुरुत । सर्वे भवन्तु सुखिनः इति धिया कार्यं कुरुत, तदा सर्वेषां कल्याणं जायते ।

(तदा हृष्टपुष्टा देवा, मलिनाः दुःखिता दैत्याश्च दृश्यन्ते । विविधध्वनिः वाद्यञ्च श्रूयते–

सहनाववतु, सह नौ भुनक्तु सह वीर्यं करवावहै ।
तेजस्विनावधीतमस्तु मा विद्विषावहै ॥
असतो मा सद्गमय, तमसो मा ज्योतिर्गमय, मृत्योर्मा अमृतङ्गमय ।
(इति गुञ्जति । पटाक्षेपश्च जायते)

॥ इति पाराशर्य–नवराजकट्टेलविरचितं 'कर्मफलं' नाम नाटकम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अहङ्कारप्रशमनम्

पात्रपरिचयः

देवेन्द्रः	: देवराजः	असुरपतिः	: दैत्यानां राजा
सेनानी	: दैत्यसेनाप्रमुखः	दलप्रमुखः	: दैत्यसेनाया गणाध्यक्षः
यमः	: देवसेनायाः गुल्माध्यक्षः	अग्निवायू	: देवसेनागणाध्यक्षौ
गायत्री	: गायत्रीदेवी	सूर्यकुबेरौ	: देवसेनायाः गणाध्यक्षौ
उर्वशी	: स्वरङ्गना	यक्षः	: प्रश्नकर्ता, रहस्यमयपुरुषः
व्योमवाणी	: आकाशभणितिः		

प्रथमं दृश्यम्

स्थानम् – समरभूमिः । समयः – अपराह्नः ।

(यवनिकायाः पृष्ठभागे मधुरो विद्युद्दीपो दृश्यते, तत्र देवदैत्ययोः सङ्ग्रामः प्रचलति, रङ्गमञ्चे सघनं तमिस्रं दृश्यते, यवनिकायाः पृष्ठभागे देवदैत्यानां छाया, खड्गस्य, असिपत्रस्य, त्रिशूलस्य, गदायाः धनुषो वाणस्य अन्येषाञ्च आयुधानां छायाचित्रं दृश्यते। दृश्यानुसारं तत्र भीषणं युद्धं प्रचलदस्तीति परिज्ञायते। तैः परस्परप्रयुक्तैः शब्दैश्च पारस्परिकं युद्धं सूच्यते।)

देवेन्द्रः

अयि मित्र ! तं घोरमुखं दैत्यं घातय, घातय, अपरञ्च कालमुखं असुरम् असिपत्रेण छिन्धि, छिन्धि, हस्तौ भिन्धि भिन्धि । अन्ये च सैनिकाः पूर्वस्यां दिशि पलायन्तः सन्ति, तान् अवरोधय, अवरोधय ।

असुरपतिः

भो सैनिका वयं महर्षेः कश्यपस्य कुले जाताः, दैत्यवंश्या मातुर्दितिरपत्याः । अतः रणं परित्यज्य नैव भवद्भिः पलायितव्यम्, सर्वाश्च सेनाः दक्षिणस्यां दिशि गच्छत, तत्र एकत्र भूत्वा योद्धव्यम् । प्राणपणेन योद्धव्यम्, यावन्ति शरीराणि तावद् योद्धव्यम्, यावत् विजयो न स्यात् तावद् योद्धव्यम् ।

देवेन्द्रः

दक्षिणस्यां दिशि दैत्यानां महती चमूर्दृश्यते, अतोऽस्माभिश्च मण्डलाकारेण चक्राकारेण वा तान् सर्वान् आवेष्ट्य युद्धं कर्तव्यम्, अवरोधनं विधातव्यम् । चन्द्रव्यूहं विरचय्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

युद्धाय कृतनिश्चयाः वीरयोद्धारः सावधानेन शस्त्रेण अस्त्रेण च आक्रमणं कुरुत। *(मध्ये मध्ये च शस्त्रास्त्रघर्षणरवः, युद्धवाद्यञ्च श्रूयते)*

सेनानीः

(हस्तौ प्रचाल्य) भो असुराः! मत्कृते समरसङ्कल्पाः देवानां युद्धचालं वा समरजालं परिज्ञाय तैः सह योद्धव्यं, नैव भेतव्यं, नैव भेतव्यम्, प्राणपणैः योद्धव्यम्। वयम् असिव्यूहं विरचय्य, धनुर्व्यूहं, जालव्यूहं छद्मव्यूहं च विरचय्य भीषणं भार्गवयुद्धं कुर्मः। यावच्छरीरं तावद्युद्धं, यावत् युद्धं तावज्जीवनगौरवम्।

दलप्रमुखः

(सहस्ताभिनयम्) भो दीर्घबाहो! त्वं सहस्रसैन्यदलेन सह पूर्वस्यां दिशि गच्छ। भो रक्तदन्त! त्वं पञ्चसहस्रं सैन्यदलं परिगृह्य दक्षिणस्यां दिशि सत्वरं गच्छ। भो शतबाहो! त्वं षट्सहस्रेण सैन्यदलेन सह पश्चिमस्यां दिशि झटिति कूर्दस्व। भो अयःशिरः! अष्टसहस्रसैन्यदलैः सह उदिच्यां दिशि शीघ्रं व्रज।

देवेन्द्रः

(साङ्गुलिनिर्देशनम्) भो अग्ने! त्वं स्वसैन्यदलैः सह पूर्वस्यां दिशि गत्वा तान् सर्वान् दैत्यान् रुन्धि। भो यम! त्वमपि तथैव स्वसैन्यगणेन सह दक्षिणस्यां दिशि तान् युद्धकामान् मरणोन्मुखान् राक्षसान् अवरुन्द्धि, प्रवारय, तेषां शिरश्छेदनञ्च कुरु। भो वरुण! त्वं च युद्धकुशलान् स्वभटान् सङ्गृह्य पश्चिमस्यां दिशि गत्वा रणोत्सुकान् विजिगीषून् दैत्यभटान् वारय, ते प्रधावनाय आत्मगोपनाय मार्गं नैव लभेरन्।

यमः

सेनानायक सहस्राक्ष! आज्ञानुसारं समरं रचयामि।

देवेन्द्रः

भो कुवेर! त्वमपि उत्तरस्यां दिशि स्वसैन्यदलैः सह गत्वा पलायितान् च सर्वान् तमसावृतान् दैत्यकुलान् अवरोधय, ते पलायनमार्गं नैव लभेरन्। यत्कृत्वा तेषां नियन्त्रणं भवति तथैव युद्धयत्नं कुरु। त्वं यत्कृत्वा अस्माकं विजयो भवति तादृशीमेव रणनीतिमवलम्ब्य विजयं लभस्व।

(विविधा ध्वनयः श्रूयन्ते। 'भो वज्रिन् वज्रं प्रहर। तोयवृष्टिरिव शरवृष्टिं कुरु। भो भौम! भिन्दिपालेन भेदय। भो अग्ने। आग्नेयास्त्रं प्रहर' इति स्वरं रणवाद्यञ्च रङ्गे गुञ्जति।)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

असुरपतिः

(नटति) मायायुद्धं कुरुत । केचित् पाषाणवर्षणं कुर्वन्तु । अन्ये पर्वतवर्षणं, अपरे धूलिवर्षणं कुर्वन्तु । अन्ये च धूमो भूत्वा आच्छादय मेदिनीं, आच्छादय गगनमण्डलम् । नाना मायाजालं विरचय्य, कपटयुद्धं कुर्वन्तु, छलयुद्धं रचयन्तु ।

(रणघोषश्च श्रूयते, रणवाद्यं श्रूयते, शनैः शनैः रौद्रभावजनकं वाद्यं श्रूयते, धूमो रङ्गं व्याप्नोति, कोलाहलश्च जायते ।)

देवेन्द्रः

(परिभ्रम्य) केचित् घातिताः, केचिच्च मारिता, अङ्गभङ्गा अपरे, अन्ये तु पलायिता दानवा, अवशिष्टा दानवा यदि जीवितुम् इच्छथ चेत् पातालं गच्छत ।

(प्रकाशो मन्दं जायते, 'अस्माकं पराजयो जातः, आत्मरक्षणं कुरुत' इति रणवाद्यं कोलाहलश्च श्रूयते । दैत्या भूमौ लीनाः, शयाना वा सन्तः पलायन्ते ।)

देवेन्द्रः

(सगर्वम्) बहवो दैत्याः रणे घातिताः, अनेके दानवाः अङ्गभङ्गाः, अपरे तु पलायिता, अवशिष्टा दानवा यदि जीवितुम् इच्छथ चेत् पातालं गच्छत । शस्त्रास्त्ररहितान्, आत्मसमर्पणशीलान्, अङ्गभङ्गान् मा प्रहर, तेऽस्माभी रक्षणीयाः ।

यमः

(नटति) भवतः आज्ञा परिपाल्यते देवराज ! तेषामुपचारोऽपि विधीयते ।

(विजयवाद्यं गुञ्जति, हर्षप्रकर्षोन्मत्ता देवा निष्क्रान्ताः । पटाक्षेपश्च जायते)

द्वितीयं दृश्यम्

स्थानम् - युद्धक्षेत्रस्य विश्रामशिविरम् । समयः - दिनस्य चतुर्थप्रहरः ।

(वाद्यं मधुरायते, दीपस्य विविधाकृतिर्दृश्यते, युद्धेन व्रणीकृता, वस्त्रं श्लथितं, शिरोभूषणं रोमाणि च स्थानभ्रष्टाः, खड्गपाणयः इन्द्राग्निकुबेरादिदेवा दृश्यन्ते । तेऽर्धचन्द्राकरेणोपविशन्ति ।)

कुबेरः

*(सगर्वम्)*अस्माकं विजयः स्वाभाविकोऽस्ति । येषां सेनापतयः भटाश्च धनुर्वेदस्य अध्ययनेन अभ्यासेन च प्रशिक्षिताः सन्ति, यस्य आयुधागारे मुक्ताः, अमुक्ताः,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मुक्तामुक्ताः, मन्त्रमुक्ताः यन्त्रमुक्ताश्च आयुधानि सन्ति तेषां पराजयः कथम् ?

देवेन्द्रः

(सगर्वम्) धनुर्वेदस्य ज्ञानं प्रशिक्षणं विना तेऽस्मान् कथं युद्धे पराजितुं प्रभवन्ति। अस्माकं पक्षे बृहस्पतिना प्रशिक्षिताः चतुरङ्गिणीसेनाः *(पदाश्वगजरथसेनाः)* विराजते। रणकुशलाः प्रशिक्षिताः शस्त्रास्त्रैः सुसज्जिताः सेनाः अस्माकं सन्ति। अतोऽस्माकं विजयो जातः।

जयोऽस्माकं कुतो न स्यादस्माकं महिमा यतः।
सर्वोत्तमः कुतः दैत्याः पामराः निष्पराक्रमाः। (देवीभा.१२।८।१६)

अग्निः

कथं जयेयुस्ते अस्मान्, येषां सेनापतिरेव वज्रपाणिरस्ति। यस्य नामैव रणजित् अस्ति। बृहस्पतिसदृशोऽस्माकं गुरुः। मत्सदृशाःपराक्रमशालिनो योद्धारो रणभूमौ स्मश्चेत् विजयवैजयन्ती कथमस्माकं कण्ठं न शोभयेत। हा हा हा! *(अट्टहासं करोति।)*

वायुः

वेदाश्च यं स्तुवन्ति, यं गायन्ति अनुमोदयन्ति च। स एव रणजित् अस्माकं सेनापतिः। मन्त्रद्रष्टारो ऋषयो यं आशीर्वचोभिरनुगृह्णन्ति, तेषां विजयः कथं न स्यात्। धनुर्वेदस्य मुक्तममुक्तं, मुक्तामुक्तं, मन्त्रमुक्तं यन्त्रमुक्तमायुधं ते न जानन्ति। हा हा हा!

कुबेरः

(सगर्वम्) आधानं, सन्धानं, मोक्षणं, विनिवर्तनं, स्थानं, मुष्टिः, प्रयोगः, प्रायश्चित्तः, मण्डलं, रहस्यमिति च युद्धस्य दशाङ्गानि सन्ति। एता युद्धकलाः ते न जानन्ति।

अग्निः

(सगर्वम्) एवञ्च शब्दः, स्पर्शः, गन्धः, रसः, दूरं, चलः, अदर्शनं, पृष्ठः, स्थितः, स्थिरः, भ्रमणः, प्रतिबिम्बं, उद्देशः – इमानि युद्धकलाया उपाङ्गानि सन्ति। मुक्तामुक्तयन्त्रमुक्त-मन्त्रमुक्तानामायुधानां संख्या शतोत्तरास्ति।

सूर्यः

युद्धस्य अङ्गोपाङ्गानां ज्ञाता इन्द्र एवास्ति। अतोऽमुमेव इन्द्रं गायन्ति वेदमन्त्राः सूक्तयश्च। यथा-

आशुःशिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम्।
सक्रन्दनो निमिष एक वीरः शतं सेनाऽ अजयत्त्साकमिन्द्रः। (रुद्राष्टाध्यायीः ३।१)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कुबेरः

वयं सृष्टिस्थितिलयकराः, वयं सर्वे यशस्विनः स्म, अस्माकं अग्रे पामराणां हीनबुद्धीनां दैत्यानां का कथा ? कथं ते समरं कुर्युः ? हा हा हा ! *(अट्टहासं करोति ।)*

देवेन्द्रः

भो भो अप्सरसः ! भो गन्धर्वाः ! भो देवाः ! अस्माभिर्दानवैः सह शतवर्षपर्यन्तं युद्धं विहितम्, विजयश्च लब्धः, गलितो देहः, शिथिलितानि च अङ्गानि परन्तु हर्षस्य क्षणोऽयम्, अस्माकं मनोरञ्जनस्य कृते गायत, नृत्यत, वादयत च । येषां गाने कण्ठकौशलं माद्यति ते गायन्तु, येषां हस्तौ, पादौ कटी च नर्तने माद्यन्ति ते सुन्दराणि नृत्यानि कुर्वन्तु । येषां हस्तौ वाद्यवादने कुशलौ ते वादयन्तु वाद्यानि । हसन्तु हासयन्तु च ।

उर्वसी

(गन्धर्वेन सह नृत्यति, अपराप्सरा गन्धर्वेण सह गायति)

नयनयुगासेचनकं मानसवृत्त्यापि दुष्प्रापम् ।
रूपमिदं मदिराक्ष्या मदयति हृदयं दुनोति च मे ॥ (सा.द-३)
मधुरः सुधावदधरः पल्लवतुल्यो ऽतिपेलवः पाणिः ।
चकितमृगलोचनाभ्यां सदृशी चपले च लोचने तस्याः ॥ (सा.द.१०)

देवेन्द्रः

वयं सर्वे पराक्रमशीलाः, वैभवशालिनः, प्राप्तमनोरथाः, कल्पान्तजीविनः । कः तिष्ठेत् अस्माकम् अग्रे, को युद्धेदस्माभिः साकम् । हा हा हा ! नृत्यन्तु अप्सरसः । गायन्तु गन्धर्वाः । हसन्तु, हासयन्तु हास्यकारकाः । माद्यतु मदनः । वादयन्तु वादकाः । हा हाह हा ! (साभिनयं नटति ।)

यमः

(विरूपेण हसन् हासयन्) बलशालिनोऽप्यस्माकमग्रे ते कथं युद्धेरन् ! तेषां न प्रशिक्षणं, न शस्त्रास्त्रस्य व्यवस्था कथं ते समरं जयेयुः ! हा हा हा !

(वाद्यं गीतञ्च मन्दायते, दीपो विलीनायते । पुनर्वाद्यं गीतञ्च गुञ्जति, दीपस्य विविधा स्थितिर्जायते । कोणे एकं ज्योतिःपिण्डं दृश्यते । देवाः भीतभीताश्चकितचकिता दृश्यन्ते ।)

देवेन्द्रः

(कोणे विलोक्य) किं तत् ज्योतिर्लिङ्गं वा ज्योतिःपिण्डम् ?(परस्परं साश्चर्यं पश्यन्ति, हस्तेन शिरसा च चकितभावं प्रकटयन्ति ।)

अग्ने ! गच्छ, पश्य किमिति । बलाबलं रहस्यञ्च ज्ञात्वैव निर्णयो विधेय इति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अग्निः

यदि इन्द्रदेवस्य आज्ञा चेत् गच्छामि भो । *(गच्छति)*

(रङ्गे धूमो व्याप्नोति, क्रमशः तेजःपिण्डं विलोक्यते ।)

यक्षः

ममाग्रे कोऽसि कतमोऽसि । किमर्थं समागतः ?त्वयि का क्षमता अस्ति ।

अग्निः

(साहङ्कारम्) अहमग्निः, अहं हुताशनः । अहं सर्वसंहारकः, सृष्टिचक्रान्तकः । सर्वमग्निमयं जगत् । मत्तः खलु इमानि भूतानि जायन्ते । मयि किं नास्ति ?

यक्षः

कानि कार्याणि कर्तुं प्रभवसि, अहङ्कारस्य प्रतिमूर्ते ! त्वयि का शक्तिर्विद्यते ?

अग्निः

(साहङ्कारम्) अहमग्निः, मयि दाहिका शक्तिः विद्यते । आतृणं विश्वं ब्रह्माण्डं वा दग्धुं शक्नोमि, विश्वस्य ब्रह्माण्डस्य वा सर्वाणि च वस्तूनि भष्मसात् कर्तुं शक्नोमि । आब्रह्माण्डं परमाणुरूपेण शक्तिरूपेण अन्तःस्थितोऽस्मि, मत्तः प्रकृतिपुरुषात्मकं जगज्जायते, इमानि भूतानि ममैव रूपाणि । मत्तः व्यतिरिक्तं किमपि न भूतं न भव्यं न भवच्च ।

यक्षः

(साभिनयम्) हा हा हा !, भो अग्ने । त्वयि एतादृशी शक्तिर्विद्यते चेत् अहं नाधिकं कथयामि, केवलमिदं तृणमेव दाहय ।

अग्निः

आम् ! अहमवश्यमेव तृणं दाहयामि । *(साहङ्कारम्)* पश्य मां, पश्य मम कर्माणि । अवलोकय मम दाहिकाशक्तिम् ।

(तृणदहने प्रयत्नं करोति । महान्तं प्रयत्नं करोति । धूमः परितो व्याप्नोति । प्रकाशो द्योतते, वाद्यं गुञ्जति, परन्तु तृणं दग्धुं नैव प्रभवति अग्निः, सलज्जः पलायते । इन्द्रस्य समीपं गत्वा सर्वं निवेदयति ।)

देवेन्द्रः

भो वायो ! त्वयि प्रोतं जगत्सर्वं, सर्वेषां प्राणिनां त्वं प्राणाः, त्वमेव सर्वेषां शक्तिधारकः असि । अतः गच्छ तत्र किं तत् तैजसपिण्डम् ? किं भणति पिण्डम् ? गूढतमं रहस्यमनुसन्धेहि । *(धूमः परितो व्याप्नोति । वायुः सत्त्वरं गच्छति)*

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यक्षः

कोऽसि ?, किं त्वयि सामर्थ्यम् ?

वायुः

(साहङ्कारम्) अहं वायुरस्मि । मम शक्तिर्जगति ओतप्रोता विद्यते । मम शक्तिं प्राप्य एव नरा श्वसन्ति, जीवन्ति, प्रीणन्ति च । विश्वस्य ब्रह्माण्डस्य वा सर्वांश्च पदार्थान् चालयितुम्, उत्क्षेपणम् अपक्षेपणं अपसारणं च कर्तुं प्रभवामि ।

यक्षः

भो पवन ! त्वया भणितं यत् 'मच्चेष्टया जगत्सर्वं व्यापारवद् भवेत्' इति । नाधिकमुत्क्षेपणमपक्षेपणं विधेयमिति । तवाग्रे तृणं विद्यते, तदेव तृणं चालय । तृणमपि चालयितुं नैव शक्नोषि चेत् गर्वं विहाय व्रज ।

(सर्वशक्तिसमन्वितो वायुस्तत्तृणं चालयितु प्रयतते । परन्तु पवनः तृणमपि चालयितुं न प्रभवति । वायुर्वाति, धूमोव्याप्नोति, परन्तु तस्य प्रयत्नेन वा तृणमपि न चचाल । वाद्यं ध्वन्यते । लज्जितः पवनः प्रत्यागत्य सर्वं न्यवेदयत् ।)

सर्वे

वयञ्च सर्वे मिथ्याभिमानिनः । भो देवराट् ! ज्योतिःपिण्डं किमिति रहस्यमयमलौकिकं, परमदारुणं तेजो दरीदृश्यते । भवानेवास्य रहस्यस्यान्वेषणं करोतु ।

देवेन्द्रः

भो देवाः व्रजामि तत्र, रहस्यम् उद्घाटयामि, तत्तत्त्वं निरूपयामि ।

(गतः इन्द्रो यक्षसमीपं, परन्तु यक्षोऽन्तर्ध्यानमभवत् । विविधवाद्यध्वनयः श्रूयन्ते । धूमो मञ्चं व्याप्नोति । वार्तालापाभावात् लज्जितः सहस्राक्षो दैन्यं प्राप्य, ततो निवर्तितवान् ।)

सर्वे

भो सहस्राक्ष ! अवगतम् ? किं तैजसपिण्डम् ? किं रहस्यम् ?

देवन्द्रः

भो देवा ! यदाहं तत्र प्राप्तो, यक्ष एव विलुप्तो, ज्योतिस्पिण्डमेव अदृश्यं जातम्, अतो न परिज्ञातं रहस्यम् । अतः रहस्यपरिज्ञानहीनो लज्जितोऽहं सुरसंसदि नैव उपस्थास्यामि, स्वलघुत्वं सुरान् प्रति किं कथयामि । अतोऽत्रैव उपविशामि । यतो हि–

> देहत्यागो वरस्तस्मात् मानो हि महतां धनम् ।
> मानो नष्टे जीवितं तु मृततुल्यं न संशयः ॥ (दे.भा. १२।८)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सर्वे

एवं मा भणतु, स्वर्गे स्थित्वापि अध्ययनानुसन्धानं मननं भवति। अतो देवलोकस्य त्यागो नैव विधेयः।

देवेन्द्रः

न हि स्वर्गः साधनायाः भूमिरस्ति, देवलोकस्तु भोगभवनं विराजते। अतो हिमालयस्य कुक्षौ स्थित्वैव साधनां करिष्यामि। एषा एव तपस्थली, एषा एव सिद्धस्थली।

(तत्र विद्युज्ज्योतिः अद्योतत मेघध्वनिरश्रूयत। परितो धूमोऽनृत्यत्। रहस्यमयं, वाद्यमगुञ्जत्, विचित्रं वातावरणं जायते।)

तृतीयं दृश्यम्

स्थानम् – उद्यानम्। समयः – सन्ध्यामयः।

(दीपस्य विविधाकृतयो दृश्यन्ते, धूमो व्याप्नोति, करुणासूचकं वाद्यं श्रूयते, बद्धपद्मासनो, ध्यानस्थ इन्द्रः एकाकी एव नयनपथमायाति)

व्योमवाणी

(विचित्रध्वनिः समायाति) भो सहस्राक्ष! मौढ्यात् अभिमानाच्च युष्माकं शक्तिरपगता। पुनः शक्तिम् अर्जय। तस्य हेतोर्मायाबीजं जप, मायाबीजं जप, मायाबीजं जप।

देवेन्द्रः

(नटति) भो आकाशवाणि! किं नाम मायाबीजम्? किमस्य रहस्यम्? *(विशेषं नटयति)* भो! मां वद, भो आकाशवाणि! मां वद। मया किं विधेयम्?

व्योमवाणी

(अस्पष्टं गुञ्जति) अओओओअअअम्म्म्म्। (किञ्चित्कालं शून्यं प्रतिभाति।)

देवेन्द्रः

(सरहस्यं नटति, तमसा आछाद्यते) किमेतत्? किमेतत्?? किमेतत्??? अओओम्म्! *(अनुकरोति, तमसि ज्योतिर्विवर्धते।)*

व्योमवाणी

ओ३३३म्। ह्रि३३३ रि३३३ म्३३३। (ह्रीं ह्रीमिति श्रुत्वा इन्द्रः परितो भ्रमति।)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देवेन्द्रः

(व्योमवाचमनुकरोति) ओ३३३ म्३३३ ! ह्री३३३ म्३३३ !

(ज्योतिः प्रसरति, बद्धपद्मासन इन्द्रो ध्यानमुद्रायां दृश्यते ।)

ओ३३३म् ! ह्री३३३ म् ३३३ ! *(विरम्य विरम्य तमः प्रसरति, विविधवाद्यध्वनिः, प्रकाशस्य विशिष्टा छटा च दृश्यते । विविधपक्षिणां मधुररवः, जलप्रपातस्य, पवनस्य च ध्वनिः, ओंकारध्वनिश्च श्रूयते ।)*

(कति दिनानि व्यतीतानि । वाद्यं गुञ्जति । शनैः शनैः प्रकाशः सन्तनोति, तमस आवरणं परिक्षीयते, तेजोमण्डलमध्ये इन्द्रो नवयौवनां कुमारीं, बालकोटिरविप्रभां, बालशीतांशुमुकुटां, वरपाशाङ्कुशाभयमुद्रायुतचतुर्हस्तां, त्रिनेत्रां, नानाभूषणभूषिताम्, रक्तवस्त्रां, रक्तचन्दनां परमसुन्दरीं पुष्टसर्वाङ्गीं गायत्रीं दृष्ट्वा व्यामुह्यति)

गायत्री

प्रसन्नाऽहं । *(वरदमुद्रया)* प्रसन्नाऽहं सहस्राक्ष !

(प्रसन्नस्मेरवदनां, रक्तवस्त्राभूषणचन्दनां हैमवतीं शिवां सृष्टिस्थितिलयकर्त्रीं देवीं दृष्ट्वा साभिनयं पादयोर्दण्डवत् प्रणमति, विविधैः स्तोत्रैः स्तौति)

इन्द्रः

भो गायत्रि ! यदग्रे रहस्यमयो ज्योतिस्वरूपो यक्षः प्रादुर्भूतः आसीत्, तत् किमासीत् ?

गायत्री

(अभयमुद्रायां, परिभ्रम्य च) सर्वकारणकारणं, ममाधिष्ठानं, सर्वसाक्षिभूतं, निरामयं, मदीयं ब्रह्मस्वरूपमासीत् । सर्वे च वेदाः तामेवमानन्ति, स्तुवन्ति, प्रणमन्ति च । ओमित्येकाक्षरं ब्रह्म । सैव ह्रीमिति कथ्यते । ते एव द्वे अक्षरे बीजमन्त्रोऽस्ति ।

देवेन्द्रः

(करौ संयोज्य नतशिरसा) तस्य बीजमन्त्रस्य कोऽर्थः ? किं रहस्यम् ?

गायत्री

अस्मिन् विशाले अनन्तकोटिब्रह्माण्डे परमसत्यं ब्रह्म विद्यते । तस्य द्वे रूपे स्तः । एकं सत्, चित्, आनन्दरूपम् । अपरं माया प्रकृतिर्वा । सैव परमसत्यस्य ब्रह्मणः पराशक्तिः । सैव शक्तिः सकलपदार्थेषु राजते । सैव शक्तिः प्रकाशरूपेण, शुद्धशक्तिरूपेण, सकलपदर्थरूपेण च विपरिणते ।

देवेन्द्रः

किं मम शक्तिर्नास्ति तर्हि ? किं चाहं छायापुरुष इवास्मि !

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गायत्री

(नटति) अस्ति, परं परिमिता शक्तिः । किन्तु मयि या शक्तिः सा पराशक्तिः, अपरिमेया शक्तिः। अन्तर्मुखात्मिका शक्तिर्माया इति कथ्यते चेत् बहिर्मुखा शक्तिः तमोरूपा इति कथ्यते । सर्वजगतः प्रलयसमये मदभिन्ना सा शक्तिरव्यक्तरूपेण तिष्ठति । सत्वरजस्तमोगुणानां साम्यावस्था एव मूलप्रकृतिर्माया वा । सैव सृष्टिबीजम् । तस्यापि नियन्त्रयित्री शक्तिरहमेव । ऋषयः तां मम शक्तिं चिच्छक्तिरिति कथयन्ति । सैव अन्तिमा शक्तिः ।

देवेन्द्रः

(करौ संयोज्य) भो परे सृष्टिबीजरूपे गायत्रि ! तव शक्तिः कया रीत्या विराजते, कया साधनया चिच्छक्तिरधिगन्तुं शक्यते ?

गायत्री

(अभयमुद्रायाम्) अहं गायत्रीरूपा । मत्तः प्रकृतिपुरुषात्मकं जगत्, मत्तः ब्रह्मविष्णुमहेश्वराः । ते च सत्त्वरजःतमोरूपाः । मत्त इन्द्रवायुवरुणकुवेराः । मत्तः सर्वे च पदार्थाः । मत्तोऽनन्तकोटिब्रह्माण्डानि । मम सगुणं निर्गुणञ्चेति द्वे रूपे स्तः, सगुणं मायया युतं रूपम् । निर्गुणं मायया रहितं रूपम् । मायया रहितं शुद्धचित् शक्तिरूपं परं ब्रह्म । रूपगुणभावाभावरहितं स्वरूपशून्यम् । अहमेव जगत् सृष्ट्वा तदन्तः प्रविश्य स्थावरजङ्गमान्, मुनीश्वरान्, ब्रह्मविष्णुमहेश्वरान् प्रेरयामि । पुत्तलिकामिव सर्वान् परिभ्रामयामि । तपसा मम चिच्छक्तिरधिगम्यते ।

देवेन्द्रः

(नतशिरसा) भो परमब्रह्माण्डनायिके ! तवोपासना कया रीत्या क्रियते ?

गायत्री

(अभयमुद्रायां परिभ्रम्य च) अहं वेदमाता अस्मि । मां ऋषय आप्तजनाः प्रातःकाले गायत्रीरूपेण, मध्याह्नसमये सावित्रीरूपेण, सन्ध्यासमये सरस्वतीरूपेण च उपासन्ते । वेदे ब्रह्मविष्णुमहेश्वराणां पूजा, दीक्षा, अन्या उपासना वा नैवोक्ता, किन्तु गायत्र्या उपासना अनिवार्यरूपेण कर्तव्येति बहूक्ता ।

देवेन्द्रः

अन्या च का उपासनापद्धतिः ?

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गायत्री-

(करौ सञ्चाल्य परिभ्रम्य च) ऋषयो गायत्रीं जपन्ति, भजन्ते, गायत्रीं तपन्ति च। गायत्रीकवचं पठन्ति। प्रत्येकसन्ध्यायामष्टोत्तरसहस्रां गायत्रीं जपन्ति। मन्त्रद्रष्टारो ऋषयश्चतुर्विंशतिलक्षं जपित्वा गायत्रीपुरश्चरणं कुर्वन्ति। उपनयनसंस्कारोत्तरं वटवः ब्रह्मचारिणो गायत्रीमाजीवनं जपन्ति। गृहस्था वानप्रस्थिनश्च गायत्रीं जपन्ति। गृहस्थानां कृते गायत्रीमुपास्य एवान्येषां कर्मणां कर्तव्याधिकारो भवति।

देवेन्द्रः

(नतशिरसा) मातश्शरणागतोऽस्मि। मां पाहि ! मम कामक्रोध-लोभमोह-मदमात्सर्यवृत्तयः गताः। मम अहङ्कारभञ्जनं जातम्। अहङ्कारप्रशमनमभूत्।

गायत्री

नाहं वैभिन्यं करोमि, तव कर्म एव त्वां रक्षति। सत्कर्म कुरु। कर्मत एव अपूर्व प्रतिफलति। अतो द्विजैः शिखां, सूत्रं सावित्रीं च धारणीयानि। गायत्री च खलु उपासनीया।

देवेन्द्रः

(हस्तौ सम्पुटीकृत्य नतशिरसा नमति) करोमि मातः ! भवता यदुक्तं तत् परिपालनं करोमि !

(ओङ्कारध्वनिश्श्रूयते, गायत्रीमन्त्रस्य सङ्गीतमयध्वनिर्गुञ्जति, प्रकाशस्य विचित्रा स्थितिर्जायते वाद्यं गुञ्जति। पटाक्षेपश्च सञ्जायते)

॥ इति पाराशर्य-नवराजकट्टेलविरचितं 'अहङ्कारप्रशमनं' नाम नाटकम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महिषासुरवधम्

पात्रपरिचयः

सूत्रधारः : सशिखः सधौतो ब्राह्मणः
महिषासुरः : रम्भस्य पुत्रः
राजमाता : रम्भस्य पत्नी, महिषासुरस्य माता
सिंहवाहिनी : हिमालयवासिनी, देवानां हितसाधिका देवी

पूर्वरङ्गः

(यवनिकायाः पृष्ठभागे शङ्खनादश्श्रूयते । तत्रैव छायायां परस्परं, शूलेन, खड्गेन, वाणेन, भिन्दिपालेन, पाशेन वा क्रियमाणः प्रहारश्श्रूयते, दृश्यते च । मारय, मारय, घातय घातय, प्रहर प्रहर, पलायितं तम् अवरोधय, इति श्रूयते । छायायां युद्धदृश्यं, सिंहवाहिन्याः छायाश्च विलोक्यते । दीपो मन्दायते, युद्धवाद्यं शिथिलायते । कोलाहलो न्यूनीभवति । ततः एव सूत्रधारस्य ध्वनिः समागच्छति)

सूत्रधारः

परमशक्तिशालिन्याः सिंहवाहिन्याः कृपया सौन्दर्यशीला धरेयं मुक्तिकामिनी जातास्ति । आसुरिबलेन त्रस्ताः स्वर्गमर्त्यपातालादयः 'त्राहि माम् त्राहि माम्' इति वदन्तः सन्ति । दैत्ययुगस्य कृष्णकलङ्कस्य समाप्तेरन्तिमदिनमिदम् ।

(इति वदन् सूत्रधारो नमनमुद्रायां रङ्गस्य वामतः प्रविश्य दक्षिणभागं गच्छति, वाद्यं गुञ्जति, दीपो सरति । सूत्रधारो नटति)

यदा यदा आसुरशक्तेः प्रबलता जायते, दैवीशक्तिः तिरोभवति तदा तदा देवाः सत्यस्य विजयस्य कृते शक्तिं शिवां समुपासन्ते । शिवशक्तिरेव सृष्टिबीजम् । ततः एव धरा सृष्टिसञ्चालनस्य सूत्रं प्राप्नोति । तत एव प्रकृतिप्रणाल्याः सूत्रं निर्मीयते । हे सिंहवाहिनि ! शक्तिस्वरूपे देवि ! अस्माकं मनसि स्थितमसुरभावं विनाशयितुं सत्त्वभावं स्थापयितुञ्च सदा गतिशीला भवसि । चिद्रूपायै सृष्टिबीजायै मातृस्वरूपायै भवत्यै सततं नमः ।

(इति निष्क्रान्तः)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रथमं दृश्यम्

स्थानम्- दानवस्य राजप्रासादः । समयः - पूर्वाह्नः ।

(राजमाता च दैत्योचितवस्त्राभूषणे दृश्यते प्रासादीयं वातावरणं परिलसति । सशस्त्रो माहिषो दैत्यवस्त्रालङ्कारे प्रविशति, मातरं नमति । समरविजयस्य गाथां श्रावयति ।)

महिषासुरः

(प्रसन्नो मातरं नमति, बहुमूल्यं रत्नादिकमुपहरति) हे मातः ! अद्य मया दितिवंशस्य प्रतिष्ठा स्थापिता, पराजिता आदित्याः, स्वर्गं मर्त्यं पातालञ्चाहं जितवान् । भुवनत्रयं मम वशे समागतं मातः ! सर्वे वैरिणः पलायिताः, मम शत्रवो नष्टाः, त्रैलोक्यस्याधिपतिरहं जातः । अधुना मम माता राजमाता जाता ।

राजमाता

(अभयदानमुद्रायाम्) पुत्र ! विजयी भव, बलवान् भव, धनवान् भव, यशस्वी भव । अधुना राज्यश्रीः त्वां वृतवती, परन्तु इयं चञ्चलास्ति, हरिणी इवास्ति । दितिवंशे अनेके कीर्तिशालिनः भूपतयः अभवन् । परन्तु ते छलयुद्धेन बलयुद्धेन वा घातिताः । अतः तैः साकं युद्धं मा कुरु । वीराणां तव पितृचराणानां त्वमेव कुलतिलकमसि ।

महिषासुरः

(सोत्सुकम्) मातः ! कथं न युद्धे तैः सह, अवश्यमेव योत्स्यामि । पौरुषं स्थापयामि । जना युगे युगे मम गाथां गायन्तु । पितुर्गाथा जने जने ध्वनिता स्यात् । अथ चाधुना कथय मम पितृपरम्पराया वीरगाथाम् ।

राजमाता

(प्रफुल्लं नटति) तनुज ! अस्माकं कुले बहवः पराक्रमशीला, बुद्धिमन्तः, प्रविधिविज्ञा भूपा अभूवन् । परन्तु ते षड्यन्त्रेण, मायया, कपटरणेन वा युद्धे मारिताः । अतः त्वमपि अन्तश्चक्षुषा निरीक्ष्य, सहस्राक्षो भूत्वा च राज्यं कुरुस्व ।

महिषासुरः

(सविनयम्) तान् पितृशत्रून् दमयित्वा दैत्यसंस्कृतिं सम्पोष्य शासनं करिष्यामि मातः ! नाहं पराजितो भविष्यामि ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राजमाता

(परितो भ्रमित्वा) अहङ्कारं मा कुरु। श्रृणु, वयं काश्यपाः, वीरवंश्याः। कश्यपस्य अदित्यां आदित्याः, दित्यां दैतेयाः, दनौ दानवाः जाताः। यथा दित्यां दितिकुले वज्राङ्गः, मधुकैटभौ, हिरण्यकशिपुः, हिरण्याक्षः, प्रह्लादः, बलिः, वैरोचनश्च राज्यं चक्रुः। दनुकुले अयोमुखः, अश्वग्रीवः, नमुचिः, बाणः, हयग्रीवः, शरभ इत्यादयो जनिं लब्धवन्तः।

महिषासुरः

(सगर्वम्) मातः! एतेषां पितृचरणानां प्रतिष्ठावर्धनाय यावज्जीवं योत्स्यामि। कार्यं साधयेयं जीवनं पातयेयं वा इति मम सिद्धान्तः।

राजमाता

(सगर्वम्) दम्भो मा विधेयः। आम् तव पिता रम्भ आसीत्, सोऽपि रणप्रिय आसीत्। रम्भस्य भ्राता करम्भः आसीत्। रम्भस्य पिता कश्यपः, कश्यपस्य पिता स्वयम्भूरासीत्। रम्भ-करम्भौ शक्तिं साधयितुं जले निमज्य तपस्यां चक्रतुः। तदा दुष्ट इन्द्रो ग्राहरूपं धृत्वा तपस्यन्तं करम्भं जघान। तदा घोरो रणो जातः। पराजितः करम्भः पञ्चत्वं गतः।

महिषासुरः

(साश्चर्यम्) ततस्ततः किं मातः!

राजमाता

(नटति) तव पिता दुष्टान् इन्द्रादिसकलान् देवान् पराजेतुं शक्तिकामनया शङ्करस्य तपस्यायां लीनो जातः। प्रसन्नः शिवः तव पित्रे वरं दत्तवान्- 'यशस्वी भव, शक्तिशाली भव, बलशाली तव पुत्रो भवतु' इति। परमदेवस्य शिवस्य वरदानादेव त्वं जातः। तव पिता शक्रादिदेवान् पराजेतुमत्यन्तं कष्टमयं युद्धमरचयत्। कतिवारम् इन्द्रादिदेवाः पराजिताः, कदा वयं पराजिताः *(रोदिति)* परन्तु स...मारितः।

महिषासुरः

(सगर्वम्) मातः! मा रोदिहि, अहमस्मि वीरपुत्रः। ब्रह्मदेवस्य वरेण अमरो जातः, बलशाली जातः, ब्रह्मणः सृष्टिः मां व्यापादितुं न शक्नोति। अतो मम पितुर्वैरिणो मम चरणकमलस्य धूलिकणाः जाताः, ते सर्वे पराजिताः पितुरिच्छा पूरिता मातः!

राजमाता

(परिभ्रम्य) तनुज! भयस्थानं न नष्टम्। ते आदित्याः पौनःपुन्यं स्वाराज्यमिच्छन्ति, तस्य कृते षड्यन्त्रं कुर्वन्ति। पितृ-पितामह-प्रपितामहादयश्च तैः घातिताः। दृष्टिपूतं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पदं चालय, वस्त्रपूतं जलं पिब।

महिषासुरः

(हुङ्कारसहितम्) मातः ! मद्भयात् सर्वे सुरेन्द्रादयो गिरिगह्वरेषु निलिल्युः, केचित् पलायिताः, केचित् मम सेवायां समागताः, अकण्टकोऽयं त्रिलोको मम नियन्त्रणे समागतः। निर्भया राजमाता भव।

राजमाता

नायं विश्वः विकल्परहितो, न भयरहितो विश्वो, न भयरहितं मानवजीवनम्। पदं पदं विचार्य अग्रे गच्छ तनय ! ममापि एकेच्छास्ति। राजभवने एका सुरम्या बधूरायातु। तस्या कङ्कणझङ्कारेण, नूपुरझङ्कारेण च राजभवनं गुञ्जतु। राजभवने पौत्राणां पौत्रीणां खेलनं, कूर्दनं, रोदनं, हसनं प्रचलतु, राजभवनं रसमयं भवतु पुत्र !

महिषासुरः

(सगर्वम्) मातः ! राजभवनं रसमयं भवति, चिन्तां मा विधेहि।

(हस्तेन सङ्केतं करोति विजयोत्सवस्य कृते। वाद्यं गुञ्जति, गीतं गायन्ति, नृत्यन्ति च। प्रकाशो मन्दायते, क्रमशः पटाक्षेपो जायते)

द्वितीयं दृश्यम्

स्थानम् – कश्चित् हिमप्रदेशः। समयः – मध्याह्नः।

(वाद्यं गीतञ्च गुञ्जति, प्रसन्नवदना, स्मेरमुखी यौवनारुढा सिंहवाहिनी किशोरी दृश्यते। महिषासुरस्य प्रवेशो जायते। प्रकाशो मन्दायते, पुनर्द्योतते)

महिषासुरः

(सकौतुकं नटति, अट्टं हसति) केयं सुरम्या बाला, किमेकाकिनी एव विहरति ! *(मनसि)* 'माता मामेकां बधूमानयेति कथितवती, इयमेव परमसुन्दरी मम पत्नी भवितुमर्हति। एनां प्रफुल्लयामि *(निकटं गत्वा)*

मां भज बाले, त्रैलोक्याधिपतिं मां भावय, सुखं कल्याणं च जायते तव। कल्याणि ! भो चारुवदनि ! मकरन्दबाणेन आहताय मह्यं जीवनं देहि, भविष्यं देहि, प्रकाशं देहि *(पुनः साभिनयं मन्दहासं करोति)*।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सिंहवाहिनी

(सस्मितम्) को भवान्, कुतः समायातः, मया साकं किं कार्यमस्ति ? मां जानासि काहमिति ?

महिषासुरः

(सस्मितम्) नाहं जाने बाले, त्वां दृष्ट्वाऽहं मुग्धो जातः । कामरूपासि त्वमहं कामये कामिनीम् । तव नूपुरझङ्कारेण कङ्कणक्वणनेन राजभवनं झङ्करोतु ।

सिंहवाहिनी

किं ब्रूषे कामदेव ! मधुना मत्तोऽसि (साभिनयं खड्गनृत्यं नटति) । बलात् मां जित्वा नय । तव राजभवनमलङ्करोमि । अहं तु स्वतन्त्रा यौवनारूढा कामहन्त्री सिंहवाहिनी अस्मि ।

महिषासुरः

(अट्टहासं कृत्वा नटति) बाले ! त्वं तु अबलासि । स्वस्य कल्याणं नैव जानासि किम् ! इन्द्रादयः सकलदेवता यस्य वशे सन्ति, फेनपादिदैत्या यस्य अनुचराः सन्ति तं विश्वपुरुषं को जयति ! एतद् वस्तुसत्यमपि नैव जानासि मन्दभाग्ये ! *(नटति)* ।

सिंहवाहिनी

भो विद्रूप ! भो कुरूप ! अपभाषणं नैव कुरु । शक्तिश्चेत् युद्धाय आगच्छ ! बुभुक्षितो मम चन्द्रहासः, रुधिरमांसेन तृप्तो भविष्यति ! कामक्रोधतमोमूर्ते ! अधुनापि क्षमाकर्तुं शक्नोमि, गच्छ पातालं तत्रैव तव कल्याणं भविष्यति ।

महिषासुरः

(सोद्वेगम्) मन्दभाग्ये बाले ! मां नैव जानासि । अहं दैत्यराजोऽस्मि, मम वशगा सर्वे स्थावरजङ्गमाः । मद्भयात् चलन्ति वायवः, मद्भयाद् भ्रमन्ति लोकाः, मद्भयात् सूर्यः तपति, मद्भयाद् मेघो वर्षति । इमे भटा मद्भयाद् युध्यन्ते । मद्भयात् त्वं, नैव भीतासि ! बाले ! मन्दधीरसि *(साट्टहासं नटति)* ।

सिंहवाहिनी

(नटति, मनसि – मया असत्यभाषणं नैव कर्तव्यम्, यत् वस्तुजातं तद् गदितव्यम्) भो पापमूर्ते ! अहं दिव्यकार्यसाधनाय समागता, मदाज्ञां पालयसि चेद् तव जीवनं सुरक्षितं, नो चेत् अधुनैव धराशायी भवसि दैत्यराट् ! *(सचन्द्रहासं नटति, इतस्ततः करोति)* ।

महिषासुरः

(खड्गं प्रसार्य देवीमनुधावति हन्तुम्) भो दुष्टे ! किमतिमन्यसे आगच्छ, युद्धाय कृतनिश्चया किम् ! *(मनसि)* किं देवानां दूतिका भवेत् !

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सिंहवाहिनी

(तारेण अट्टं हसति) भो दैत्य ! देवान् दलयसि, मर्त्यान् मारयसि, पवित्रान् प्राणिनः पातयसि *(साक्रोशम्)* कथं कथं हन्मि पश्य भो ! त्वं स्वस्यापराधेन विहिंसितो भविष्यसि दुष्ट !

महिषासुरः

(असभ्यभावेन) सत्यमुक्तं भवत्या ! *(मनसि)* रहस्यमयं कार्यं वर्तते ।

सिंहवाहिनी

(तारेण हसति) व्रतचर्यया, उपवासेन, श्रुतिश्रवणेन, गोब्राह्मणपितृदेवता-तिथिसेवया जना धर्मार्थकाममोक्षमार्गे लगन्ति । परन्तु त्वं इमान् खण्डयसि । देवाः सत्त्वगुणे, मनुष्या रजोगुणे, दैत्याः तमोगुणे निमग्ना दरीदृश्यन्ते । विषयविषासक्तस्त्वं विषपुरुष इव प्रतिभासि । श्रुतिगोब्राह्मणर्षिहिताय जगत्परिपालनाय हन्मि त्वां पापपुरुष ! *(महिषमारणाय सोद्वेगमनुधावति)* ।

महिषासुरः

(चन्द्रहासमुत्थाप्य नटति) बाले ! अतिमन्यसे त्वम् । जन्मजराव्याधिमृत्युर्जीवनस्य अपरिवर्तनीया घटना । जातस्य हि ध्रुवो मृत्युर्भवति, मृतस्य जन्म भवति, अपरिहार्यर्थे भवाटवीविषये खेदः किमर्थो विधेयः ।

सिंहवाहिनी

(खड्गेन शिरसि प्रहरन् नटति) हा दैत्यपुत्र ! दर्शनमपि कथयसि मूढ ! धर्मं खण्डयसि, देवान् दलयसि, मनुष्यान् मर्दयसि, मेदिनीं विदारयसि ।

(स धावति, सिंहवाहिनी अनुधावति, पटहो , मृदङ्गः, शङ्खश्च ध्वन्यते) ।

महिषासुरः

(सक्रोधं खड्गेन आक्रमति) मूढे बाले ! पश्य मम शक्तिम् ।

सिंहवाहिनी

(द्वौ एव युद्धमुद्रायां दृश्येते, वाद्यं च श्रूयते) तव सेनापतिश्चिक्षुरो मया हतः, बिडालो हतः, तोमर-भिन्दिपाल-शक्ति-मूशल-खड्ग-परशु-पट्टिशादिशस्त्रास्त्रैः पामारा राक्षसाः पञ्चत्वं प्राप्ताः । त्वमपि तमेव मार्गमनुसरसि *(नटति)* ।

महिषासुरः

(क्षणं निःश्वसन् तिष्ठति, सक्रोधं परितो विलोकयति) अबले बाले त्वं मां मारयसि, मां यमलोकं प्रापयसि ! कः कं मारयति पश्याधुनैव *(खड्गम् उच्चालयति)* ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सिंहवाहिनी

(त्रिशूलं विमुञ्चन्) दैववशात् मया साकं युद्धाय समागतः, दीपे पुत्तलिकेव तव जीवनमिहैव अधुनैव समाप्तं भविष्यति। तव चतुरङ्गबलान्विताश्चामरादिसेनापतयः समरे पञ्चत्वं गताः, त्वमपि गन्तुकामोऽसि ? *(परितो मन्दं भ्रमति, आक्रामति च)*।

महिषासुरः

(सिंहवाहिनीं प्रहरति, क्षीणशक्तिको भूत्वा मौनं तिष्ठति, उत्तिष्ठति, गगने हस्तौ प्रसारयति, करुणामुद्रायां नटति, करुणावाद्यं गुञ्जति, प्रकाशेन, वाद्यध्वनिना ध्वनिना च विचित्रं वातावरणं जायते) ।

सिंहवाहिनी

(त्रिशूलं प्रहरति) सषष्टिसहस्रसैन्यक उदग्रोऽपि पञ्चत्वं गतः। मूर्ख ! मया साकं किं युध्यसे। सबलश्चामरोऽपि समाप्तः। देवराज्यं परित्यज्य गच्छ पातालम्।

महिषासुरः

(सक्रोधमाक्रमति) दुष्टे भामिनि ! अतिमन्यसे ! बाले !

सिंहवाहिनी

(साभिनयं नटति) दुष्ट ! जानासि किं सकोटिसैन्यको महाहनुरपि मया मारितः। सपञ्चकोटिसैन्यको असिलोमको महादैत्योऽपि मम चन्द्रहासस्य बुभुक्षामपूरयत्।

महिषासुरः

(विक्षिप्तमिव नटति) दुष्टे ! अतिमन्यसे मम चन्द्रहासेनाधुनैव हन्यसे।

सिंहवाहिनी

(सक्रोधं नटति) दुष्ट ! जानासि किं तव द्वितीयः सेनापतिकल्पश्चामरो मम खड्गेन विनिपातितः। उदग्रः, उद्धतः, वाष्कलः, ताम्रः, अन्धकः, उग्रवीर्यः, दुर्धरः, दुर्मुखश्च ते ससैन्या यमलोकं गतवन्तः।

महिषासुरः

(सक्रोधम्) दुष्टे ! पश्य मम मायायुद्धं कीदशं भवति। त्वां मायायुद्धेन घातयामि। *(प्रकाशो मन्दायते, धूमज्योतिः परितः विलसति, गाढतमे धूमे महिष उद्धतपूर्ण कपटयुद्धं विरचयति ।)*

सिंहवाहिनी

(सक्रोधं नटति) रे पामर ! माहिषरूपं सन्धार्य मां हन्यसे। *(त्रिशूलं प्रहरति)* अरे दुष्ट मायाविन् ! स्वर्गं मर्त्यञ्च परित्यज्य गच्छ पातालम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महिषासुरः

(गाढधूमरेखायां नटति, सिंहरूपो महिषासुरः देवीमाक्रामति, देवी अपि प्रहरति) अबले बाले ! अतिमन्यसे ! पञ्चत्वं भजस्व, अधुनैव ।

सिंहवाहिनी

(सक्रोधं नटति देवी, पुनर्गजरूपं प्रगृह्य समागच्छति माहिषो, देवीमुपरि प्रकाशो दृश्यते, अन्यत्र तिमिरं जायते)

सिंहवाहिनी

मायाविन् ! छलयसे माम् । *(त्रिशूलं प्रहरति)* पश्य मम शक्तिम् ।

महिषासुरः

(सखड्गो दैत्यपुरुषः देवीमाक्रामति) सर्वसंहारिके धूमे ! पश्य मम शक्तिम् । धरणीभेदनं करोमि, गगनच्छेदनं करोमि । यदाहं वाञ्छामि धरणी अणूयति, जलं विलीनायते, वायुः मन्दायते, आकाशो धूमायते । किं माम् अवमन्यसे !

सिंहवाहिनी

(साभिनयं) दुष्ट ! मूढ ! मत्स्वरूपं नैव जानासि । अहं जगतः कारणमस्मि, मत्तः खलु इमानि भूतानि जायन्ते, मत्त एव श्वसन्ति भूतानि, मत्त एव जीवन्ति भूतानि । अहं मूलप्रकृतिरस्मि । अहं सत् अस्मि, सत इमानि भूतानि जायन्ते । मत्तः प्रकृतिपुरुषात्मकं जगत् प्रजायते । अणोरणीयान् महतो महीयान् मत्स्वरूपं विद्यते ।

महिषासुरः

(अट्टहासं परिभ्रमति, खड्गेनैव च प्रहरति) दुष्टे ! व्यर्थं गर्वं मा वह । मच्चन्द्रहासस्तृषितोऽस्ति, अतस्तस्य तृष्णा तव रुधिरपानेन शाम्यति ।

(उत्थापयति चन्द्रहासं, प्रहरति देवीम्, देवी च प्रहरति खड्गेन, खड्गयुद्धं प्रजायते । महिषासुरो महिषस्य स्वरूपं धृत्वा छलयुद्धेन सिंहवाहिनीमाक्रामति । धूमायते रङ्गः, तदैव छायायां महिषासुरस्य शिरश्छेदनं करोति देवी । समन्ततो जयघोषो नमःशब्दश्च गुञ्जति ।)

सिंहवाहिनी

(शान्तस्वरेण) महिष एका प्रवृत्तिः । महिषः खादति, मलमूत्रं विसृजति, हिताहितं नैव विचारयति, शुचिताशुचितं नैव चिन्तयति । महिषोऽसद्वृत्तेः प्रतीकम् । सा च प्रवृत्तिः विभिन्नप्रकारेण प्रकटिता भवति । सा च प्रवृत्तिः सामान्यप्रयत्नेन नैव विनश्यति । !

(पूर्ववत् सूत्रधारो नमस्कारमुद्रायां वामतो रङ्गं प्रविशति)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सूत्रधारः

हन्यमानेऽपि आसुरिवृत्तिः पौनःपुन्यं जायते। चित् शक्तेः साधनाद्वारा देवीप्रसादसिद्धिद्वारा वा महिषवृत्तिमपाकर्तुं शक्यते ।

(अणोरणीयान्महतो महीयानात्माऽस्य जन्तोर्निहितो गुहायाम् ।

तमक्रतुः पश्यति वीतशोको धातुः प्रसादान्महिमानमस्य ॥ (देभा ७।३४।३४)

खड्गधारिणि । रिपुमर्दिनि । सिंहवाहिनि ! नमो नमः । महिषासुरमर्दिनि ! अभयप्रदायिनि ! नमो नमः । सृष्टिबीजायै नमो नमः । चिच्छक्तिस्वरूपायै नमो नमः । मातृस्वरूपायै नमो नमः । हे सिंहवाहिनि ! हे अनन्ते ! हे महिषवृत्तिसंहारिणि ! तुभ्यं नमः । युगप्रकाशिनि ! देवि त्वां नुमः । अस्मान् पाहि देवि । सृष्टिबीजे ! विश्वं पाहि देवि ! विश्सस्य दानवभावं विनाशय। विश्वमानवभावं परिपालय देवि । *(इति निगदति, क्रमशः पटाक्षेपो जायते)*

॥ इति पाराशर्य-नवराजकट्टेलविरचितं 'महिषासुरबधम्' नाम नाटकम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रक्तबीजम्

पात्रपरिचयः

सुरेन्द्रः : देवानां राजा, सेनापतिश्च
अग्निः : दहनस्य देवः, गुल्मपतिश्च
बृहस्पतिः : देवगुरुः
रक्तबीजः : दैत्यसैन्यस्य गणनायकः
दैत्यदूतः : शुम्भनिशुम्भयोर्दूतः
वायुः : शक्तिदेवता, गुल्मपतिश्च
वरुणः : जलदेवता, गुल्मपतिश्च
कात्यायनी : देवहितसाधिका देवी
उग्रकाली : रक्तपायिनी देवी

प्रथमं दृश्यम्

स्थानम् – समरक्षेत्रम् । समयः – मध्याह्नः ।

(यवनिकायाः पृष्ठभागे परस्परं युद्धरता दैत्यदानवाः अनुमीयन्ते । मन्ददीपस्य प्रकाशे तेषां कोलाहलः श्रूयते, अस्पष्टं छायाचित्रं च दृश्यते । तत्र पटहादिवाद्यवादनं श्रूयते । रणवाद्येन अभिगुञ्जति रणक्षेत्रम् । तत्र छायायां परस्परं, शूल-खड्ग-बाण-भिन्दिपाल-वज्र-प्रहाराणां शब्दाः श्रूयन्ते, युद्धं दृश्यते च । तत्र मारय मारय, घातय, घातय, छेदय छेदय, अवरोधय, अवरोधय, इत्यादिशब्दाः श्रुतिपथे गुञ्जन्ति ।)

सुरेन्द्रः

(प्रगर्जन्) वायो ! शुम्भनिशुम्भयोः सेना जगद्धक्ष्यतीव विश्वं विनाशयन्ती अग्रे समागतास्ति । तव नेतृत्वे या च सेनास्ति सा तत्र घोरं युद्धं करोतु, तान् तत्र निपातयतु ।

वायुः

शुम्भनिशुम्भयोः सेना दावानल इव अग्रे समागतास्ति । न शक्यते भो तां सेनामवरोद्धुम् । तत्र विशाला सेनास्ति, पराक्रमशीला महावीराः समरे समुपस्थिताः सन्ति । अहमपराजितोऽपि पराजित इव ।

सुरेन्द्रः

वायो ! त्वमतिशक्तिशाली वर्तसे, त्वद्भयात् स्थावरजङ्गमा भीताः भवन्ति । त्वं स्वस्य वायुवेगेन सर्वान् विनाशय । पवन ! त्वं दक्षिणतः सर्वं स्वकीयं बलं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सामर्थ्यञ्च समर्प्य समरं विरच्य विजयं लब्ध्वा समागच्छ । अस्माकं समरस्य परिणामः त्वयि निर्भरायते ।

अग्निः

(सविनयम्) भो देवेन्द्र ! अधुना दैवं विपरीतं दृश्यते, दैत्यानां चमू विशालास्ति, सबलाप्यस्ति, ते घोरेण समरशब्देन अस्मान् तर्जयन्तः सन्ति ।

सुरेन्द्रः

(करं प्रसार्य) अग्ने! वायो! मा भेतव्यमहमस्मि समरस्य अग्रभागे। शक्तिसामर्थ्यहीनत्वात् ते घटाटोपं कुर्वन्तः सन्ति । अस्माकं विश्वविजयिनीं सेनामग्रे नय ।

अग्निः

(सभीतम्) तेषां समुपस्थित्या, घोरेण रवेण च अहं छायाच्चित्रमिव जातः । अतो युद्धविरामो विधेय इति मनसि समागतः ।

वरुणः

(सदैन्यम्) मयापि तैः साकं घोरं युद्धं विहितम्, परन्त्वधुना ते दृढनिश्चया बलशालिनश्च दृष्टाः सन्ति । अतः कूटयुद्धं विधातव्यं भो !

सुरेन्द्रः

(सरौद्रम्) अस्माकं विजयः सुनिश्चितो वर्तते । बलयोगेन, कूटनीतिप्रयोगेण, वा छलनीतिप्रयोगेण च योद्धव्यं, विजयोऽधिगन्तव्यः ।

वरुणः

(नटति) भवता सत्यमुक्तं, परन्तु तेषामधुना भाग्यस्योदयो दृश्यते । तेषां सेनापि अगणिताः सन्ति । शौर्यं चापरिमितमस्ति । अतो युद्धस्य कारणं विजयस्य उपायः विमृष्टव्योऽस्ति ।

सुरेन्द्रः

(सरौद्रं परितो भ्रमति) भो ! पामरा मदग्रे इत्थं कथयन्तो युस्माकं जिह्वा कथं न पतति ? करौ कथं न छिद्येते, पदौ कथं न पततः ? युद्धे पराजयं प्राप्य नुतशिरसा स्वर्मण्डलात् कथं पलायामहे ? तदपेक्षयात्रैव पञ्चत्वं स्वीकर्तव्यम् ।

वायुः

(सविनयम्) देवराज । समय एव बलाबलं करोति, कुत्रचित् लीनो भूत्वा समयस्य प्रतीक्षां कुर्मः । यदा समयोऽनुकूलायते, प्रकृतिरनुकूलायते, देवाधिदेवोऽनुकूलायते, देवमाता प्रफुल्लायते तदा योद्धव्यमिति मदीया धारणास्ति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुरेन्द्रः

(सक्रोधं नटति) तेभ्यः पामरेभ्य भीत्वा समरं विहाय गिरिगह्वरेषु, निर्जनेषु घोरारण्येषु पलायितव्यः ? कार्यं वा साधयेयं, देहं वा पातयेयमिति मत्वा प्राणपणेन योद्धव्यम् ।

अग्निः

(सविनयम्) भो देवराज ! देवगुरुः किं कथयति तेन साकं विमर्शः कार्यः । सः उपायम् अपायञ्च गदिष्यति । तस्य विचारस्य सम्मानं विधेयमिति मदीया दृष्टिः । देवगुरुर्बृहस्पतिः समागतः सः किं कथयति तदपि श्रोतव्यम् । तत्पश्चात् निर्णयो विधेयः ।

सुरेन्द्रः

(देवगुरुं बृहस्पतिमभिवादयन्) स्वागतं गुरुदेव ! स्वागतम् । *(अन्येऽपि देवगुरुम-भिवादयन्ति)* शुम्भनिशुम्भयोः सेना प्रचण्डवेगेन समागतास्ति । अस्माकं रणनीति-रसफलेव प्रतिभाति । अस्मिन् प्राणसङ्कटे किं विधेयम् ?

बृहस्पतिः

(परितो विलोक्य) देवराज ! अधुना युष्मत्कृते क्षेमकरः कालो नास्ति, घोरतमा वेलेयं, सत्समयस्य प्रतीक्षां कुरुत । असमयस्य युद्धं घातकं कुलविनाशकञ्च जायते ।

सुरेन्द्रः

(सरौद्रम्) किम् देवराजः पराजितो भूत्वा गिरिगह्वरेषु विलुप्य स्थातुं शक्नोति, एतदुचितम् ? अवश्यमेव योद्धव्यम् । रणक्षेत्रात् नैव पालायितव्यम् ।

बृहस्पतिः

अरे ! मूर्ख देवराज ! अधुना नैव योद्धव्यम् । काल एव करोति बलाबलम् । अधुना झटित्येव हिमालयं गत्वा सुरक्षिता भवेम । मायाबीजं जप्त्वा शक्तिसन्धानं कुर्मः ।

वायुः

देवगुरुर्यत् कथयति तत् कर्तव्यमिति मे मतिः ।

अग्निः

गौरीशङ्करं गच्छामः । कौशिकीं गच्छामः । यत्रास्माकं तपःसिद्धिः स्यात् ।

सर्वे

गच्छामो गच्छामः, गौरीशङ्करं गच्छामः कौशिकीं गच्छामः ।

(रङ्गो धूमायते, प्रकाशः मन्दायते, रङ्गः तिमिरायते, वाद्यं श्रूयते, क्रमशः दूरायते च)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वितीयं दृश्यम्

स्थानम् - हैमप्रदेशः । समयः - अपराह्नः ।

(रङ्गो धूमायते, प्रकाशो मन्दायते, रङ्गः तिमिरायते, शनैः रङ्गे प्रकाशो वितन्यते, पृष्टभागे हिमालयो दृश्यते । कलरवः श्रूयते । विमृशन्तो रङ्गं प्रविशन्ति देवाः) ।

बृहस्पतिः

शृणु इन्द्र । वयं तस्याग्रे योद्धुं नैव प्रभवामः । शुम्भनिशुम्भौ सहस्रवर्षं तपः तप्त्वा भगवन्तं सृष्टिकर्तारं प्रसंन्नं कृतवन्तौ । ब्रह्मणः सृष्टिसङ्घातात् तयोः मरणं न स्यात् । अबला नारी तु किं करिष्यति पुरुषेभ्यश्चास्माकं मृत्युर्न इति तौ वरं लब्धवन्तौ । यदि द्वयोः सेनयोर्द्वन्द्वं स्यात् तेऽअस्मान् घातयन्ति स्म । अतो मया शीघ्रमेव रणक्षेत्रात् यूयमपसारिताः ।

सुरेन्द्रः

गुरुदेव ! कदापर्यन्तं गिरिगह्वरेषु विलीनाः सन्तो जीवामः । पलायनाद् युद्धं वरम् ।

बृहस्पतिः

शुम्भनिशुम्भयोः शक्तिर्ब्रह्मण आशीर्वादात् अष्टांशेन वर्धितास्ति । पुरुषसेनया तस्य सेना न पराजिता भवति । अतो देव्याः सेनया दैत्यसेना पराजिता भवति । अतो मयात्र समानीता यूयम् । अत्र जगदीश्वरीं भजामः, तां सेवामहे, ध्यानं सम्पादयामः । सेवया प्रसन्ना देवी वरं दास्यति ।

बृहस्पतिः

(करौ चोत्थाय) श्रृणुत देवाः । कामक्रोध-लोभमोह-मदमात्सर्यादीन् परित्यज्य देवीबीजेन जगदीश्वरी समुपासितव्या ।

(धूमायते रङ्गः । वाद्यं गीतञ्च गुञ्जति । रङ्गस्य प्रकाशो मन्दायते)

> जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
> दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥
> नमो देव्यै महादेव्यै शिवायै सततं नमः ।
> नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥ *(दुर्गासप्तसती)*

बृहस्पतिः

बद्धपद्मासना भूत्वा तिष्ठत । पूरक-कुम्भक-रेचक-प्राणयामेन शरीरशोधनं,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्राणशोधनमिन्द्रियशोधनञ्च सम्पादयत । करन्यासं, अङ्गन्यासं कुरुत । अजपा गायत्रीं जपत *(रङ्गः निःशब्दायते)* ।

सुरेन्द्रः

भो गुरो ! प्राणशोधनं शरीररशोधनं विहितम् । अन्यत् किं करणीयम् ?

बृहस्पतिः

षट्चक्रध्यानं कुरुत । स्वाधिष्ठान-मणिपुराऽ-नाहत-विशुद्धि-आज्ञा-सहस्रारचक्रेषु ध्यानं कृत्वा मनश्शोधनं कुरुत ।

सुरेन्द्रः

भवत आज्ञा परिपालिता । त्रिशोधनं विहितम् ।

बृहस्पतिः

(परितः परिभ्रम्य) सर्वे सावधाना भवन्तु । 'ओम् क्लीं महाकाल्यै नमः' इति देवीबीजं जपन्तु । यदापर्यन्तं देवी अस्मान् सनाथं न करोति तदापर्यन्तं मनोयोगन देवीबीजं जपत ।

(रङ्गे दीपस्य विचित्रा गतिः, निःस्तब्धता, घनतिमिरता दृश्यते, पक्षिणां कूजनञ्च श्रूयते । कति दिनानि गच्छन्ति । ओङ्कारस्य ध्वनिर्गुञ्जति । मध्यभागे पार्वती प्रकटिता भवति । प्रकाशपुञ्जस्तत्रैव सुघनायते । पार्वत्याः दक्षिणभागात् कात्यायनी (अम्बिका), वामभागात् कालिका क्रमशो निर्गच्छतः । ता रङ्गे नटन्ति। द्वयोर्मध्ये स्थिता पार्वती विलीनायते । रङ्गे प्रकाशो व्युदेति । देवीं दृष्ट्वा नमन्ति, स्तवन्ति देवाः)

देवाः

सर्वमङ्गलमाङ्गाल्ये शिवे ! सवार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि ! नारायणि नमोऽस्तु ते ॥
सर्वरूपसर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहिनो देवि दुर्गे देवि ! नमोऽस्तु ते ॥ (दुर्गासप्तसती)

कात्यायनी

(परितः परिभ्रम्य) देवाः कुशलिनो भवन्तः किमर्थं स्मृताऽहम् ?

सुरेन्द्रः

(प्रफुल्लमुखमुद्रया) भवत्याऽविज्ञातं किमपि नास्ति । पश्यतु मातः ! दैत्यसेनया त्रस्ता वयमत्र गिरिगह्वरेषु गुप्तरूपेण स्थिताः स्मः । दैत्यसंस्कृत्या सर्वे च ऋषयो धर्मादिसत्यमार्गो मानवसमुदायाश्च त्रस्ताः सन्ति । अस्माद्घोरशङ्कटात् समुद्धर मातः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कात्यायनी

देवा ! मा भयं कुरुत ।

तिष्ठन्तु निर्भया यूयं हनिष्यामि रिपूनिह ।
कार्यं वः सर्वथा कार्यं विहरिष्याम्यहं रणे ।
निशुम्भादीन् वधिष्यामि युस्माकं सुखहेतवे ॥ (दे.भा ५।२३) ।

(देवी नटति । विचित्रं दृश्यते । वाद्यं गुञ्जति । क्रमशः पटाक्षेपो जायते)

तृतीयं दृश्यम्

स्थानम् - कश्चन हैमप्रदेशः । समयः - दिनस्य द्वितीयप्रहरः ।

(वाद्यं गीतञ्च गुञ्जति । रङ्गो धूमायते । सिंहस्य नादो घोषायते, तस्य छाया च दृश्यते । पृष्ठभागे नदी विलोक्यते । प्रकाशपुञ्जे कात्यायनी दृश्यते ।)

दैत्यदूतः

(साश्चर्यं सविनयञ्च) कात्यायनि ! अस्माकं राजा शुम्भस्तव रूपस्य वर्णनं श्रुत्वा मोहितोऽस्ति । अधुना सर्वे देवाः पराजिताः सन्ति, गिरिगह्वरेषु शिखरिशिखरेषु भ्रमन्तः सन्ति । अस्माकं दैत्यराजः त्रैलोक्यस्यैव महाराजाधिराजो भूत्वा त्रिषु लोकेषु सम्मानितोऽस्ति । तेन साकं विवाहं कुरु ।

कात्यायनी - *(साट्टहासम्)* त्वया सत्यमुक्तं परन्तु मया बाल्ये एव प्रतिज्ञा कृताऽस्ति-

यो मां जयति संग्रामे यो मे दर्पं व्यपोहति ।
यो मे प्रतिबलो लोके स मे भर्ता भविष्यति ॥ (दुर्गासप्तसती) ।

दैत्यदूतः

अस्माकं दैत्यराजः त्रैलोक्यस्याधिपतिरस्ति । तस्याग्रे इन्द्रादयो राजानः पराजिताः, ते पलायिताः, अतस्तस्याग्रे बालायाः युद्धस्य का कथा ? त्वं क्षणमपि समरे स्थातुं न प्रभवसि बाले !

कात्यायनी

अरे दूत ! मया यदुक्तं तत् कथय तव स्वामिनोऽग्रे । नो चेत् त्वमत्रैव हनिष्यसि । *(मेघो गर्जति, विद्युद् द्योतते, प्रकाशः तिमिरायते । रङ्गः धूमायते । रणवाद्यं श्रूयते । सिंहो गर्जति । मारय मारय । घातय घातय इति ध्वनिश्श्रूयते । खड्*

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गस्य, बाणस्य, करवालस्य, चटचटाशब्दश्च ध्वन्यते । तिमिरस्य धूमस्य च छायायां रणदृश्यमनुमीयते । शनैः शनैः शान्तं वातावरणं जायते । प्रकाशे सखड्गो रक्तबीजो दृश्यते))

रक्तबीजः

अबले बाले कुत्रासि, समागच्छ ममाग्रे, नयामि स्वामिराज्ये *(इतस्ततः परिधावति)* ।

कात्यायनी

(साभिनयं नटति) कोऽयं सखड्गो दानवः ! मदग्रे योद्धुं वाञ्छति ! *(हुङ्कारं करोति)* दीपं प्रति पुत्तलिका इव मृत्युम् उपधावति *(सक्रोधं परिभ्रमति)* ।

रक्तबीजः

(अट्टं हसति) केयं सुरम्या बाला, कुतः समायाता, किं ते नाम कर्म च,

कथमेकाकिनी एव विहरसि बाले ! अस्माकं त्रैलोक्याधिपतिं शुम्भं पतिं वरय, तव सुखं कल्याणञ्च जायते । चारुवदने ! *(पुनः साभिनयं अट्टं हसति)*

कात्यायनी

(परिभ्रम्य) किं वदसि मूर्ख ! मधुना माद्यसे *(खड्गनृत्यं नटति, रणवाद्यं श्रूयते)* यमभटैः परितो वेष्टितोऽसि । पश्य मम चन्द्रहासम् !

रक्तबीजः

(साट्टहासं नटति) बाले । त्वं बालेव प्रतिभासि, परन्तु वार्ता करोसि बुद्धिमतीव । हंहो खेदस्य विषयः स्वस्य कल्याणं नैव जानासि किम् ! *(नटति)* ।

कात्यायनी

(सक्रोधम्) जानासि किं मूढ । चण्डमुण्डौ मया निपातितौ । तयोः साकं बहवो भटाः घातिताः । कोटिशः सैन्यैः साकम् उदायुधोऽपि पञ्चत्वं गतः । चतुरसीति-सैन्यनायकैः सह कम्बुनामको वाहिनीपतिः, तस्य चमूश्च नष्टा दुर्मते !

रक्तबीजः

(सरौद्रम्) अयि सुमुखि । वीरभोग्या वसुन्धरा । शक्तिश्चेत् वृथा वार्ता मा वह । आगच्छ युद्धाय भामिनि ! मम पार्श्वे कीयती विशाला चमूर्विद्यते ! किं शक्नोषि तां हन्तुम् !

कात्यायनी

(साहङ्कारं हस्तमुत्थाय) अरे मूढ । तव सेना मया पूर्वमिव हता ! रणस्तु निमित्तमात्रम् । धौम्रकुलं, कालककुलं, दौर्हृदकुलं, मौर्यकुलं, कालकेयकुलं मम ज्यास्वनैरेव पञ्चत्वं गताः । जानासि मूढ ! एकस्मिन् कुले दशसहस्रभटाः भवन्ति । पूर्वमिव मया शतं कुलानि हतानि ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रक्तबीजः

अरे सुभगे ! गर्वं मा वह । त्वाम् अधुनैव पञ्चत्वं नयामि *(हुङ्करोति, साभिनयं नटति)* । अहं रुद्रस्य वरेण अमृतो जातः । मम शरीराद् ये रक्तबिन्दवः पतन्ति ते बिन्दवः सर्व एव ममाकारं धारयन्ति, मादृशो भूत्व युध्यन्ते च । कथं त्वं मां जयसि बाले !

कात्यायनी

(उग्ररूपं दर्शयति, सक्रोधं नटति च) अहङ्कारमूर्तिः मा वदोग्रम् ।

रक्तबीजः

(साभिनयम्) कृशोदरि ! किं जिजीविषा नास्ति ! तर्हि शुम्भं निशुम्भं वा पतिं भजस्व । क्षमां च याचस्व ।

कात्यायनी

(सक्रोधम्) किं कथयसि ! मया पूर्वमेव उक्तं यः कोऽपि मां जित्वा अपहर्तुं शक्नोति स एव मम भर्ता भवितुमर्हति । मया बाल्यकाले प्रतिज्ञा एव कृता । *(पुनः मनसि स्मरति च 'यो मां जयति संग्रामे स मे भर्ता भविष्यति'* इति*)* ।

रक्तबीजः

(सरोषम्) आक्रमणम् !

(उभौ नटतः । त्रासदो वाद्यध्वनिः श्रूयते, धूमो व्याप्नोति, कात्यायनी छायातः उग्रकालीं प्रकटयति ।)

उग्रकाली

(भीषयन्ती परितो भ्रमति) किमर्थमहमाहूता भो महादेवि !

कात्यायनी

(साभिनयम्) अथ रक्तबीजो योद्धुं समागतोऽस्ति । तस्य शरीरात् यावत् रक्तबिन्दवः पतन्ति तावन्त एव समानवीर्यबल-पराक्रमशीलाः पुरुषा जायन्ते ।

उग्रकाली

(जिज्ञासापूर्वकम्) ततस्ततः किम् ।

कात्यायनी

(सोद्वेगम्) ते समानबलविक्रमा दैत्या अस्माकं साकं सङ्घातयुद्धं कुर्वन्ति । अस्माकं देवानाञ्च विनाशो जायते । देवताः सत्यकामाय सत्त्वाय यतन्ते, दैत्या असत्यकामाय असत्त्वाय तमसे युध्यन्ते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उग्रकाली

(भीषयन्ती नटति) अथ च मया किं कर्तव्यम् ! मया कैः साकं योद्धव्यम् ! अहं सृष्टिहन्त्री । सर्वाणि च वस्तूनि अहम् उपसंहरामि । रक्तबीजः पुनः पुनरपि स्वमुत्पादयति, अहं तमुपसंहरामि । सूर्यमुपसंहरामि, सुधाकरमुपसंहरामि, वसुन्धरामुपसंहरामि । ब्रह्माण्डमुपसंहरामि । अज्ञापयतु महामाये मातः !

कात्यायनी

(सक्रोधम्) पश्य, अयं रक्तबीजो यदाहं तं हन्मि तदा अस्य शरीरात् रक्तबिन्दवः पतन्ति, ततः सहस्रशः पुरुषा जायन्ते, समानबलशलिनः ते जगत् व्याप्नुवन्ति । अस्माकं पराजयो जायते, दैत्यराज्यं विजयते, देवराज्यं पराजयते ।

उग्रकाली

(सोद्वेगम्) कथं ते मां जयन्ते ! कृष्णास्मि, कृष्णविवराऽस्मि, जगत् कर्षामि । ब्रह्माण्डं कर्षामि, मयि स्वात्मनि लीनं करोमि । तस्य कापुरुषस्य का कथा ! पश्य, मम मराक्रमं, तमोव्यूहध्वंसनञ्च ।

रक्तबीजः

(सक्रोधम्) भीता किं ! पलायिता किम् ! आगच्छ युद्धाय रणक्षेत्रे । परस्परं किम् अपलपसि भामिनि ! अबले ! रूपेश्वरि ! वचनम् सुकरम्, समरो दुष्करो भवति ।

कात्यायनी

(साभिनयम्) क्षणं तिष्ठ मूर्ख ! न वयमपभाषणं कुर्मः । अपलापं तु त्वं करोषि, कुर्वन्नसि च ।

रक्तबीजः

(सोद्वेगम्) अहं तु युयुत्सुरस्मि भो मोहिनीरूपे ! केयं अङ्गारिका ! विभीषयति अस्मान् । परन्तु रणं परित्यज्य युवां पलायितुं वाञ्छथः । दैत्यशक्तिरपि ह्यजेया बीजशक्तिरस्ति बाले !

उग्रकाली

(आक्रमणमिव नटति) अरे रक्तबीज ! अधुनैव त्वां यमलोकस्यातिथिं कारयामि *(सा भीमरूपं दर्शयति)* ।

रक्तबीजः

(सक्रोधं नटति) अबले कृष्णे । वृथा गर्वं मा वह ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उग्रकाली

(साभिनयम्) वयं तु मित्रस्य चक्षुषा समीक्षामहे, परन्तु दैत्यः, दैत्यपक्षश्च शत्रुचक्षुषा विलोकयति । अतः आवयोः युद्धम् । अधुनापि अवसरो विद्यते, 'दैत्या यदि जीवितुं वाञ्छन्ति चेत् पातालं गच्छत, तत्रैव देवं परमात्मानं भजत ।'

रक्तबीजः

(उग्रं नटति) युद्धविजेत्रा मया पातालं गन्तव्यम् ! किम् अपलपसि भो बाले !

उग्रकाली

(जगत् कम्पयन्) सत्यं कथयन्ती अस्मि भो ! यूयं पातालं गच्छत । *(मधुरेण स्वरेण)* देवराजः इन्द्रः स्वर्गासनमधितिष्ठतु । देवानां कृते यज्ञभागो मिलतु, अद्यपर्यन्तं यत् कृतं तत् कृतम्, परन्तु अधुना अयं सन्धिर्विधेयः । द्वयोः पक्षयोः कल्याणं भवतु । सर्वे भवन्तु सुखिनः ।

रक्तबीजः

(अट्टं हसति) वयं जेतारः, कथं रणं परित्यज्य गन्तुं शक्नुमः ! नीतिविपरीतं कथयन्ती असि कृष्णे !

उग्रकाली

(बिभीषयमाणः) बलदर्पेण युद्धं वाञ्छथ चेत् मम योगिन्यो दैत्यानां रुधिरमांसेन तृप्ता भविष्यन्ति ।

रक्तबीजः

(अट्टं हसति, चन्द्रहासम् उत्थापयति) कृष्णे ! भामिनि ! वृथा ब्रूषे, नार्योऽबला एव भवन्ति, इयं प्रकृतिप्रदत्ता प्रवृत्तिः । शक्तिश्चेत् आगच्छ युद्धाय, वाग्बाणेन किं भवति मूर्खे !

कात्यायनी

(कोदण्डटङ्कारेण दिशं भाषयन्ती नटति) कालि ! क्षणं तिष्ठ । एतमहं हन्मि, येन अपभाष्यते आस्मकीनं साकम् । एषः काम-क्रोध-लोभ-मोह-मद-मात्सर्य-वृत्तिभिर्निर्मितः पुरुषः । एताः कामादयः प्रवृत्तयो मारिताऽपि पुनः पुनरुद्भवन्ति । एषः 'अविद्याऽस्मितारागद्वेषाऽभिनिवेशानां पाशेन' बद्धः । अत एषः पापपुरुषः स्वर्गकामाय रणयज्ञं रचयन्नस्ति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रक्तबीजः

(नटति) सृष्टिधारायां स्मृतिसंस्कारौ बीजौ स्तः । अतः 'तासामनादित्वं चाशिषो नित्यत्वात्' । अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत । अव्यक्तनिधनान्येव तत्र का परिदेवना । (भगद्गीता) मा भैषीः, आगच्छ युद्धाय मूर्खे बाले !

कात्यायनी

(हुङ्कृत्याक्रामति) मूर्ख ! दैत्य ! पश्य मम संहारशक्तिम् *(नटति सचन्द्रहासम्, रणवाद्यञ्च गुञ्जति)*

रक्तबीजः

(खड्गेण आक्रामति) मूर्खे अबले बाले ! हन्मि त्वाम् एतेन चन्द्रहासेन, खण्डं खण्डं कारोमि तच्छरीरम् । *(मनसि – नारी खलु अवध्या भवतीति गुरुः शुक्रो गदति स्म, कथं हन्मि एनाम् !)* । *(नटति युद्धम्)* ।

कात्यायनी

(सरोषमाक्रामति) मां खण्डयसि दैत्य ! कः कं खण्डयति पामर ! पश्य ! *(सा विशेषमुद्रां प्रदर्शयिति, हस्तेन, नेत्राभ्यां, आकृत्या च दैत्यस्य शक्तिम् आकर्षयति ।)* उग्रकालि ! अहं खड्गेन हन्मि दैत्यम्, अस्य रुधिरं भूमौ नैव पततु भो !

रक्तबीजः

(परस्परं खड्गयुद्धं जायते) भामिनि ! (आक्रोशमुद्रायाम्) हन्मि त्वां हन्मि त्वाम् भो ! *(किञ्चित् विरम्य मनसि– अस्या मुखमण्डले द्वादसभास्करस्य ज्योतिरिवि ज्योतिः प्रकाशते, एषा घ्नति माम्, यदि पराशक्तिरस्ति चेद् मम मुक्तिर्जायते । गतप्राण इव, गतरक्त इव, गतनेत्रज्योतिरिव नटति रक्तबीजः)*

कात्यायनी

(युद्धं नटति, खड्गं प्रहरति, उग्रकाली रक्तं पिबति) असत्यप्रतिरूप ! दैत्य ! *(भीषणम् उग्ररूपं दर्शयति)* पञ्चत्वं गच्छ ।

(म्रियते वीरगीतं गुञ्जति । तत्र तिस्रो देव्यः संहारनृत्यं कुर्वाणा दृश्यन्ते ।)

देवाः स्तुवन्ति–

देवि प्रपन्नार्ति हरे प्रसीद, प्रसीद मातर्जगतोऽखिलस्य ।
प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य ॥ (दुर्गासप्तशती)

(गीतं नृत्यं च प्रचलति, क्रमशः पटाक्षेपो जायते ।)

॥ इति पाराशर्य–नवराजकट्टेलविरचितं 'रक्तबीजम्' नाम नाटकम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

योजनगन्धा

पात्रपरिचयः

योजनगन्धा : पोतवाहकस्य पुत्री, कृष्णद्वैपायनस्य माता

पराशर : वसिष्ठस्य पौत्रः, शक्तेः पुत्रः, कृष्णद्वैपायनस्य पिता

प्रथमं दृश्यम्

स्थानम् – सेतीमाद्योर्निकटः, नाविकस्य कुटीरसमीपम् । समयः – मध्याह्नः ।

(तत्र मधुरो वेदध्वनिश्श्रूयते, मधुरो वाद्यध्वनिः गुञ्जति, नद्याः कलरवश्चानुभूयते । परितः सुन्दरं, शान्तं घनवनं, मत्तमयूराणां कूजनं मनो रञ्जयति, कोकिलकलनादो मनो विनोदयति । नद्यास्तटे एकस्सुघोषो दरीदृश्यते । तत्र प्रविशति एकः गौरवर्णः, जटामण्डितः, सधौतवस्त्रो समाल-कमण्डलुकः रविकर इव तेजस्वी पराशरनामा महर्षिः)

पराशरः

अयि ! भो ! के सन्त्यत्र पोतवाहाः । अये कर्णधार ! कुत्र विराजसे । *(सत्रिपुण्ड्रः, सधौतः पराशरः साभिनयं परितः त्वरया गच्छन्, उच्चैस्वरेण)* अरे नौकाजीविनः ! के सन्ति अत्र । एष वशिष्ठपौत्रः, शक्तिसूतो नद्याः पारं जिगमिषति ।

(घोषनिकटं गत्वा) केऽपि जनाः न सन्ति । किं खलु निर्जनोऽयं देशः । रे पोतवाहाः क्व तिष्ठथ !

(सोद्वेगम्) झटित्यागच्छ ममाग्रे नोचेत् ... । *(सत्त्वरं परितो भ्रमति)*

योजनगन्धा

(नेपथ्ये) भो आर्य ! एषा आगच्छति ।

(स्थूलनयनी, शिरसि वनपुष्पा, यौवनाङ्कुरभारालसा, आजानुवस्त्रवेष्टिता, सकङ्कणा, सनौकादण्डहस्ता बाला आगच्छति)

एषा अबला बाला चारुनयना क्षमां याचते । भो ऋषिवर्य ! क्षणमस्मिन्नासने तिष्ठ, पयोस्तक्रं वा पिब, आगमिष्यतो मम पितरौ । *(स्मितं विहस्य, साभिनयम्)* तिष्ठतु

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भवान् । अलङ्करोतु अमुं घोषं, पावयतु कुलं, रञ्जयतु जीवनम् । भो भवान् ! मा क्रोधं वर्धय । क्रोधो विनाशकारणम् ।

पराशरः

(साश्चार्यं नटति, मनसि– केयं बाला ! कुतश्चागता !) भो बाले ! बालवद् दरीदृश्यसे, वार्ताङ्करोषि वृद्धवत् ? । व्यथयति मम मनः, आलोडयसि मां किम् ! विमोहयसि मां किम् ! *(समधुरम्)* सत्वरं पारङ्गमनीयमस्माभिः । क्व ते पितरौ ! बाले !

योजनगन्धा

भो आर्य ! अहं नाविकपुत्री ! भवादृशं तापसं ऋषिप्रवरं दृष्ट्वा मोमुद्यते मम मनः । मा क्रोधं कुरु । मम माताऽरण्ये प्रयाता गवाञ्चारणाय । अस्माकं गोष्ठे गावः, अजाः, महिष्यः, मेषकाश्च सन्ति । सा गाश्चारयति, घासमाहरति । सा आगच्छन्ती भवेत् ।

पराशरः

(सस्मितं समधुरञ्च) क्व गतस्ते जनकः, कश्चालयति नावं, ब्रूहि ! ब्रूहि ! मया सत्वरं गमनीयं हिमप्रदेशं हिमाह्ववर्षं वा ।

योजनगन्धा

आर्य ! मम तातश्चालयति नावं, स मत्स्य इवास्ति जलक्रीडायाम् । अधुना स केदारान् प्रस्थितः, सहलः, सवृषभः, सबीजश्च बीजवपनाय । अहमेकाकी एवास्मि, गङ्गातीरे, भवदीयेन पदरजसा रञ्जितेन मोमुद्यते घोषः, भवतो मन्दहास्येन मनो माद्यति मम, क्षणं तिष्ठ । भो तपोधन ! अस्माकं कुलं पवित्र कुरु ।

पराशरः

(साभिनयं नटति, खं विलोक्य) केयं खेचरे ! मां विमोहयति । व्योम्नि कः किं घोषयतीव प्रतिभाति । अव्यक्ते ब्रह्मणि किं विस्फोटकमिव स्फोटयति, किं व्यनक्ति ! पूर्वरङ्गमिव रङ्गम् । *(सावेगम्)* बाले ! त्वं किं मां नौकायां नैव पारं नयसि । नय सत्वरम् । मयि त्वरा वर्त्तते ।

योजनगन्धा

(सस्मितम्) भो आर्य ! अहन्तु अप्रशिक्षिता, तत्र कार्ये बाला एव । नाहं पारये नावं चालयितुम् । तीव्रधारया शीघ्रं वहन्त्यां, महत्यां गण्डक्यां लघुपोतं चालयितुं न प्रभवामि । जलक्रीडां करोमि । नद्यां चिक्रीडिषामि । पोतम् चालयामि । परन्तु मां रुणद्धि तातः । अहञ्च जलप्रवाहं दृष्ट्वा बिभेमि भो आर्य !

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पराशरः

(जनान्तिकम्) केयं बाला मामन्तःप्रेरयति । कुतः केयम् ! 'एकोऽहं बहु स्याम्' ! कः किमनागतं संसूचयति ! *(किञ्चित् उन्मिलिताक्षः क्षणं विमुह्यति)*

योजनगन्धा

(साट्टं विहसति) ह ह ह ह ! किं मूर्च्छाङ्गतः, आर्य ! किं समाधिङ्गतः ! किं पलायिता चेतना, पलायितस्तदिन्द्रियग्रामः !

पराशरः

(पराशरः परितो भ्रमन् गगने हस्तौ प्रसार्य ध्यानेन विलोकयति, साभिनयं नटति) आं भो ! औपरिचरेयि ? ध्यानं स्मारयति पूर्वजातिम् । 'संस्कारसाक्षात्करणात् पूर्वजातिज्ञानम्' । किं बिम्बयति आकाशः, किं प्रतिबिम्बयति प्रकाशः ! मां 'दूरङ्गमय, तन्मे मनश्शिवसङ्कल्पमस्तु !' इति स्मारयति । बाले ! त्वं नौकां नेतुं शक्नोषि । मया ज्ञातं भूतं, भव्यं, भवच्च यत् ।

(सगद्गदया, सप्रेम्णा) नय बाले नय, मां तारयितुं शक्नोषि, मां विस्तारयितुं शक्नोषि, मम जीवनस्य संरक्षणं कर्तुं प्रभवसि ।

योजनगन्धा

आर्य ! नैव बुध्यते भवतो रहस्यमयी वार्ता । भवतो रसमयं श्रुतिमधुरं कथनं श्रुत्वा मम मनश्चोत्फुल्लायते । गात्राणि स्फुरन्ति । वपुः कोषाणि विजृम्भन्ते, मनो माद्यति । रोमहर्षः प्रजायते । परन्तु नाहं नौकां वोढुं शक्नोमि नाविक इव, अपि तु भवतः सान्निध्येन स्वप्न इव शान्तम् आनन्दञ्चानुभवामि ।

पराशरः

मत्स्यगन्धे ! मां नौकायां नय, मया गमनीयः शैत्यप्रदेशः । तत्र तपस्तप्त्वा ध्यानेन ब्रह्मणि लीनो भविष्यामि । येन मन्त्रद्रष्टारो ऋषयः सच्चिदानन्दब्रह्मणि लीनाः ।

योजनगन्धा

पश्यतु दूरं ऋषिः, अत्र कदा भल्लूकानां, कदा हरिणानां, कदा व्याघ्राणां समूहः जलपानाय वा इतस्ततो गमनाय आगच्छन्ति । तेभ्योऽहं बिभेमि ।

पराशरः

मा भेतव्यं, मत्स्यापाङ्गि ! अहिंसाप्रतिष्ठायां सर्वभूतवैरत्यगो जायते । अवैरभावे श्वासं निरुध्य स्थाणुवत् स्थीयते चेत् ते भयरहिता अग्रे गच्छन्ति ।

(तत्र भल्लुकानां समूहः शनैः शनैः ततः गच्छन्नस्ति, मत्स्यगन्धा तं दृष्ट्वा भीता

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भवति, द्ववावेव मौनं तिष्ठतः भल्लूकानां ध्वनिः, कलरवः, वाद्यध्वनिश्च श्रूयते, प्रकाशः कदा मन्दायते, कदा दीर्घायते । *(मत्स्यगन्धा नौकां चालयितुं नैवेच्छति । परन्तु पराशरः संस्नेहं नौकाचालनाय विवशं करोति । पराशरः योजनगन्धायाः हस्तं निष्पीड्य गङ्गां प्रति गच्छति ।)*

द्वितीयं दृश्यम्

स्थानम् – सेतीमाद्योस्तटम् । समयः – मध्याह्नस्यान्तिमप्रहरः ।

(द्वयोर्गङ्ग्योः सङ्गमो दृश्यते । नदीतीरे नौका दृश्यते । परितो वनानि, हिमशृङ्खलाश्च दृश्यन्ते । योजनगन्धा नौकादण्डं दधाना नौकायामधिरोहति ।)

योजनगन्धा

(सभीतेव ससम्भ्रम्) भो ! भो ! ऋषिवर्य ! मया कदापि पूर्णरूपेण नौका नैव चालिता । यदि नदीवेगेन दुर्घटना जायते चेत् आवयोर्जीवनं परिसमाप्तं स्यात् ।

(तौ नौकायां स्तः । मधुरं वाद्यवादनध्वनिर्गुञ्जति, मन्दं गीतं विश्रूयते । पराशरोऽभय-मुद्रायां शान्तं मौनं तिष्ठति, विद्युच्चकास्ति । सा नौकां चालयितुं बिभेति)

परांशरः

कल्याणि ! सुभगे ! मा भैषीः । वयं सर्वे सञ्चितकर्मणः फलं लभामहे । शृणु कामरूपे !

आयुःकर्म च वित्तञ्च विद्या निधनमेव च ।
पञ्चैतान्यपि सृज्यन्ते गर्भस्थस्यैव देहिनाम् ॥ (हितोपदेशः)

योजनगन्धा

(परितो विलोकयन्, सलज्जया, सभीतया च) भो शाक्तेय ! भवान् ऋषिरसि, कोविदोऽसि, किं किं कथयसि नाहं जाने । मां किमर्थं मोहयसि ?

पराशरः

(सशान्तम्) मम चेतनायां दिव्यं स्फुरणमजायत । दैवीप्रेरणया मम मनसि वासनाया व्युत्थानमभवत् । शुभा च वेला । शुभं ह्यरणिमन्थनम् । ऋतुदानाय मम चेतोऽकामयत । अतोऽहं मोहयन्नस्मि बाले । आगच्छ ममोरसि सुभगे !

(पराशरः साभिनयं पाणिं समादाय समाकर्षति, वाद्यध्वनिश्श्रूयते)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

योजनगन्धा

(सलज्जयाभिनीय) ऋषिवर्य ! किमेतत् भवति शोभते ! हन्त ! छलपूर्वकं वा बलपूर्वकं मम सतीत्वहरणं करोषि ! ऋषय एव मन्त्रवेत्तारः, ते धर्मशासकाश्च भवन्तीति मया श्रुतमासीत् । अधुना कथं वैपरीत्यम् । अनग्न्याधानपूर्वं ऋतुदानं निषिद्धं शास्त्रे विहितमिति श्रुतं मया, ऋषिप्रणीतनियमं कथमतिक्राम्यसि ! पितरि निवेदयामि, राज्ञि निवेदयामि ! हं हं ! *(हूङ्करोति सव्रीडया)*

पराशरः

सुभगे बाले ! माल्लेयि ! अधुना सौमुहूर्तिकी वेला । इदं पवित्रं स्थानं । हिमालयाद् दक्षिणस्यां दिशि, सेतीमादीनद्योः कालीसरस्वत्योः वा गङ्गयोः साधुसङ्गमे नौकायामेव ऋतुदानं कर्तव्यम् । आवयोः शुक्रशोणितयोः निषेकेण आर्यावर्तस्य दीपः समुदेष्यति । स बाल आहिमालयात् हिमाह्ववर्षात् विश्वं शिक्षयति, विश्वगुरुर्भविष्यति । सः शिशुः वेदस्य समुद्धर्ता, विभाजकश्च, धर्मार्थकाममोक्षपुरुषर्थचतुष्टयस्य सम्पोषको भविष्यति बाले ! तवापि यशोवर्द्धनं भविष्यति ।

योजनगन्धा

(सस्मितेन सव्रीडया च) शाक्तेय ! किं विलपसि पथिक ! कथमहं स्वधर्मं परित्यजामि ! धर्मे हि लोकाः प्रतिष्ठिताः इति विज्ञातम् । धर्मो रक्षति रक्षित इति विश्रुतम् । धर्महानिर्नैव कर्तव्या । अहमधुनापर्यन्तमक्षतयौवना आनन्यपूर्वा चास्मि ।

पराशरः

(स्मितेन) हे आद्रिकेयि ! एषा विशिष्टा दैवीघटना । न धर्महानिर्भवति अनया । अपितु सनातनवैदिकमार्गस्य रविरुदेष्यति, स बालो वेदानां विभाजकः संरक्षकश्च भविष्यति । असतः सत्यं गमयिष्यति, तमसो ज्योतिषं गमयिष्यति, मृत्योर मृतङ्गमयिष्यति । बाले त्वं अक्षतयौवनानन्यपूर्वा च भविष्यसि । आगच्छ मम वक्षसि, आश्लिष्टा भव ममोरसि ! *(बलात् समाकर्षति)*

योजनगन्धा

(सव्रीडया क्रोधमुद्रया, नौकादण्डं उत्थाप्य) नाहं विश्वसिमि । स्मश्रुघनजटायोगिकल्पाः पुरुषाः ग्रामे, पर्वतेऽरण्ये पर्यटन्ति, मोहयन्ति च ग्राम्यजनान् । लोभयन्ति सरलान् अशिक्षितग्राम्यमर्त्यान् । कोमलभावभरितमहिलागणं छलयन्ति योगिकल्पाः ।

(हस्तौ नैव सरतः, मनसि 'मम करौ उत्क्षेपणापक्षेपणौ, आकुञ्चनाप्रसारणौ नैव कुरुतः, ओ ! पादौ अपि नैव सरतः, सिद्ध एव ऋषिर्भवेत् किम् ! परन्तु नैव भेतव्यं, मां खेदे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निमज्जयति खलु हैषः । समुद्धरणीयम् अस्माद्घोराच्च सङ्कटात्' पादौ च पीडयतः ।)

पराशरः

(ससम्भ्रमं सोद्वेगञ्च) बाले ! गन्धकालि ! किं प्रलपसि । अयं ऋषिः शक्तिपुत्रः, वशिष्ठपौत्रः, ब्रह्मणः प्रपौत्रो नैव मिथ्यां भाषते। तस्य सत्यसिक्ता दृष्टिः सत्यं प्रकाशते, सत्यपूतः पराशरः यन्निगदति सत्यं गदति। भूतं, भव्यं, भवच्च यत् सत्यं विलोकयति।

योजनगन्धा

(सोद्वेगम्) नाहं विश्वसिमि योगिकल्प ! आदृश्यन्तेय ! भवादृशा योगिकल्पा यायावरा नौकातरणे कति समागच्छन्ति कति ! ते किं किं जल्पन्ति, किं किं विलपन्ति, किं तेषामनुधावनं कर्तव्यं खलु मया ! भवतः कथने किं प्रत्यक्षानुमानशब्दप्रमाणानि सन्ति ! मम पितरौ किं कथयतः ! प्रतिवेशिन्यः किं भणिष्यन्ति ! देवपुराच्च देवाः किमनुशासन्ति, पितृलोकात् पितरः किम् अनुभविष्यन्ति ! *(रौद्रमिव सस्मितं नटति)*

पराशरः

(सस्नेहम्) बाले! योऽन्तः प्रविश्य मां प्रेरयतीश्वरः। 'क्लेशकर्मविपाकाशयै-रपरामृष्टपुरुषविशेष ईश्वरः' मां नियोगं विदधाति, स 'पूर्वेषामपि गुरुः कालेनानवच्छेदात्'। मामित्थमेव आज्ञापयति वेदमाता गायत्री। सैव विश्वजननी, सृष्टिस्थितिलयहेतुभूता सनातनचितिशक्तिः।

योजनगन्धा

(साश्चर्यम्) चितिशक्तेरनुभवः कथं जायते ऋषिवर !

पराशरः

कामरूपे ! तव बुद्धौ यत् चैतन्यं प्रतिभाति सैव चितिः । 'चितिः स्वतन्त्रा विश्वसिद्धिहेतुः' सैव 'स्वेच्छया स्वभित्तौ विश्वमुन्मीलयति' । प्रकृतिपुरुषात्मको मायासम्बलितश्चैतन्यो मां प्रेरयति बाले ! सा मामन्तःकरणे इत्थमेव आज्ञापयति बाले ! एतद् महदाश्चर्यं मत्कृतेऽपि बाले ! मायामयोऽसौ कापटपुरुषः रौद्ररूपं धारयति, त्वाञ्च माञ्च विदारयति। *(द्वौ रौद्रमुद्रायां नटतः)*

योजनगन्धा

(सक्रोधम्) अरे भिक्षुक । यायावर ! किमधिकं जल्पसि । किम् अतिमन्यसे ! स्वयमेव नय नौकाम् । तर तरण्या । भञ्जय जलधाराम् । मानय मनोधाराम् ।

पराशरः

अरे मत्स्यगन्धे । अरे भामिनि । मां विलोकय, मम मनसि उन्मीलय । नयनयोः नम *(अभयमुद्रायां नयने उन्मील्य)* ओम् । ओ३३३३३३३ म् ३३३३३३३ ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(विचित्रं वातावरणं जायते, परितः वेदध्वनिः समागच्छति, योजनगन्धायाः मनसि कामवृत्तिरुदेति)

योजनगन्धा

(साश्चर्य सकौतुकम्) सत्यमेतत् ! कथं विश्वसिमि ! प्रमापयतु भवान् केनापि चाकचिक्येन चमत्कारेण । पारावारे जनाश्च सन्त्यधुना । ते किं कथयिष्यन्ति ! सज्जाहं । मम जन्म तु मत्स्याज्जातम्, अतो मम शरीरान्मत्स्यगन्धो वाति । अतः ऋषिप्रवरैःसह कथं ऋतुमथनं कर्तुं प्रभवामि ।

पराशरः

बाले ! मा भीता स्याः । *(अभयमुद्रायाम्)* ऋतुमन्थनोत्तरं तव कुमारित्वमक्षतं भविष्यति । मत्स्यगन्धे ! मत्संसर्गात् योजनगन्धा भवसि, रूपवती भवसि । पश्य परितो नीहारावृतं सर्वं, न कोऽपि परिलक्षयन्त्यावाम् । सज्जीभव कल्यााणि ऋतुमन्थनाय ।

(मन्मथ उभयोर्मनसी मथ्नाति । परितो धूमो व्याप्नोति, तयोश्छाया दृश्यते । हस्तान्नयनाच्च ज्योतिषः पिण्डं गत्वा शिरसि, नयनयोः, हृदि च प्रविशति । सा मोहङ्गता इव दृश्यते, वाद्यध्वनिश्श्रूयते । पुनर्निहारिका विलीनायते पूर्ववत् नदी दृश्यते ।)

योजनगन्धा

(प्रसन्ना सा सव्रीडया सलज्जयाचाधोमुखं कृत्वा) ऋषिवर ! मम जीवनं किं भवति ? भवान्तु यायावरोऽस्ति, शैत्यप्रदेशे तपोवने स्थित्वा धारणाध्यानसमाधौ लीनो भविष्यति ।

पराशरः

(अभयमुद्रायाम्) त्वमनन्तजीवा वेदगर्भा भवसि, यशोवती भवसि, पुत्रवती भवसि । कुलमाता भवसि । राजमाता भवसि । शतसंवत्सरं ते जीवनम् । तव पुत्रः भारतवर्षमाविश्वञ्च ज्ञानप्रकाशं तनोति, त्वाञ्चामृतां कारयिष्यति ।

(मधुरं वाद्यं श्रूयते । सा सलज्जया भ्रामं भ्रामं ऋषिं नमति । कलरवश्श्रूयते । जलरवो विमोहयति । धूमः परितो व्याप्नोति ॥ ओंकारध्वनिश्श्रूयते । प्रकाशो विविधरागेण रङ्गं रञ्जयति । नेपथ्येऽनेकमन्त्रा उच्चरिताश्श्रूयन्ते ।)

(उपह्वरे गिरीनां सङ्गमे च नदीनाम् ।
धिया विप्रोऽअजयत । (शु.य. २६।१५।)
(पारकोटेऽन्यतीर्थञ्च वर्तति पुण्यदायकम् ।
माद्रिकाशुक्लगण्डक्यो सङ्गमे शङ्कराभिधम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तपश्चकार तत्रैव पराशरमहामुनिः ।
पराशरगुहा तत्र तपःसिद्धिप्रदायिनी ॥
जज्ञे मत्स्योदरीपुत्रस्तत्र द्वीपे पराशरात् ।
पुराणसंहिताकर्ता वेदशास्त्रप्रवर्तकः॥)
(हिमवत्खण्डे गण्डकी महात्म्यम् अ. ५ को ५४, ५५ र ५६)
(तिमिरायते । पराशरबीजाय नमः)
(नमोऽस्तु ते व्यास ! विशालबुद्धे, फुल्लारविन्दायतपत्रनेत्र ।
येन त्वया भारततैलपूर्णः प्रज्वालितो ज्ञानमयः प्रदीपः ।)

(इति गुञ्जति, पटाक्षेपश्च जायते)

॥ इति पाराशर्य–नवराजकट्टेलविरचितं 'योजनगन्धा'नाम नाटकम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रत्नाकरम्

पात्रपरिचयः

रत्नाकरः	: दस्युनायकः	रत्नसखः	: रत्नाकरस्य सखा
रत्नसहयोगी	: रत्नाकरस्य सहयोगी	नारदः	: देवर्षिर्नारदः
वल्लरी	: रत्नाकरस्य पत्नी	रत्नजनकः	: रत्नाकरस्य पिता
पुत्राः	: रत्नाकरस्य पुत्राः		

प्रथमं दृश्यम्

स्थानम् - हिमालप्रान्तस्य घोरारण्यम् । समयः - अपराह्नः ।

(घनवनं दृश्यते, कलरवश्श्रूयते, मृगव्याघ्रभल्लूकादीनां ध्वनिर्गुञ्जति, तेषामाकृतिश्च विलोक्यते । तत्र पशूनाम् आखेटकानां परस्परं धावनं, कूर्दनं, 'मारय, मारय, अवरोधय, अवरोधय, उपरि गतः, अधोगतः, उत्पलुत्य गतः' इति श्रूयते । दृश्यं शब्दश्च क्रमशो मन्दायते । परशु-बाण-शूलाङ्कुश-खड्गधराः क्लान्ताः त्रिपुरुषाः क्रमशः शनैश्शनैः समागत्य तिष्ठन्ति । तैर्मध्यवस्त्रं, कच्छं, शिरस्त्रञ्च धारितानि सन्ति । वाद्यध्वनिश्च ध्वन्यते)

रत्नाकरः

(शुष्कस्वरेण) अद्यतनं तु दिनं वन्ध्यं जातं, किमपि हस्तगतं नाभवत् । एको मृगोऽदृश्यत, तस्य वधाय यत्नो विहितः, सोऽपि उत्प्लुत्य पलायितः, घनवनेऽदृश्यो जातः । अपरो वन्यशूकरः समागतः सोऽपि घनारण्ये तिमिराच्छन्नो जातः, अद्य कथं रिक्तेन हस्तेन गृहं गन्तव्यम् ! मया तु कथितमासीत्- अस्मिन्नरण्येऽद्य नैव गन्तव्यमिति ।

रत्नसखः

अरे मित्र ! *(इतस्ततः कुर्वन्)* तव एव कुबुद्ध्या वध्यः पलायितः, मां कथयसि ! मया तु कथितमासीत् हरिण एव हन्तव्यः, दृष्टो हरिणः, तस्मिन्नेव काले वन्यशूकरोऽपि समागतः, भवान् शूकरे आकृष्टः, हरिणो निकटे एव उपाधावत् । भवतो मनोद्वन्द्वेन द्वैतविचारेण वा पलायित आखेटः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रत्नाकरः

अहं किंकर्तव्यविमूढ इव जातः । *(नटति)* शूकरं हरिणं वा, शूकरं हरिणमिति कं हन्मि कं हन्मीति मम मनसि द्वैतभावना ह्युपस्थिता, परन्तु हरिणस्तु भवतः समीपत एव अपगतो मयि दोषारोपणं करोषि ! मया धनुःप्रहाराय नैव निषेधित आसीत् ।

रत्नसखः

(सोद्वेगम्) अरे अरे अरे मूर्ख ! मया पृष्टमासीत् किं करोमीति परन्तु भवता वन्यशूकरस्यैव अनुधावनाय निगदितम्, अतोऽहं मृगं परिहाय शूकरमनुगतवान् । सुदृष्टेरभावात् शूकरोऽपि गतः, मृगोऽपि गतः ।

रत्नसहयोगी

इतोपि *(परिहासयति)* पलायितः, ततोपि पलायितः *(प्रहारमुद्रां प्रदर्श्य)* प्रहर्तुं नैव जानन्ति, बहुजल्पन्ति कापुरुषाः ।

रत्नसखः

भो रत्न ! मयापि प्रयत्नो विहितः, तथात्वेऽपि पलायितः । अतोऽद्यकृते तु अत्राध्वनि स्थित्वा प्रतीक्षां कुर्मः, कोऽपि पान्थः समागच्छेत्, तस्यैव वस्त्रभाण्डमुद्रादिकं निगृह्य निलयं गच्छाम ।

रत्नसहयोगी

आम् एवं विधातव्यम् । *(हासयति)* ।

रत्नाकरः

(साक्रोशं नटति) सूर्योऽस्ताचले गच्छन्नस्ति, रजनीमुखे को मूर्खोऽस्मिन् घनारण्ये समागच्छति ! अत्र तु व्याघ्राणां, भल्लूकानां, सर्पाणां भयं जायते, अत्र तु दिनेऽपि भयावहो मार्गः प्रतीयते, जना बिभ्यति ।

रत्नसखः

कोऽपि मूर्खो भवेत्, मार्गस्य अज्ञानेन, ग्रामस्याज्ञानेन वा आगच्छेत् ! स एव अस्माकं भाग्यविधाता भवेत् ।

रत्नाकरः

(साक्रोशम्) मां मूर्खं मन्यसे त्वम् ! अस्मत्तोऽप्यधिको मूर्खः कः भवेत् ! तमिस्रायां घोरे विपिने समागच्छेत् !

रत्नसखः

अधुना न तमिस्रा, अपितु रजनीमुखं विद्यते । ग्रामवासाय ईहमानः आगन्तुं शक्नोति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कोऽपि मूढः। *(तत्र व्याघ्राणां समूहः दृश्यते, विविधध्वनिश्श्रूयते, धूमः परितो व्याप्नोति)*

रत्नसहयोगी

(विहसति) ध्वनिस्तु इतः एवागच्छति, यः कोऽपि भवेत्, स अस्माकं स्वामिनश्शोकहर्ता, सुखकर्ता, आनन्दविधाता च भवेत् । सर्वे सावधानेन श्रुणुत । दूरे दृश्यते च 'आगच्छन्नस्ति एकः पुरुषः, सावधानेन स्थातव्यं, हरिण इव नैव पलायताम्, शूकर इव नैव धावतु' ।

(इति परस्परं वदन्ति । साभिनयं नटन्ति च । चन्द्रहासं गृहीत्वा छायायां निलीनास्तिष्ठन्ति । सधौतवस्त्रो वीणापाणिनारदः, काष्ठपादुकायां, सोर्ध्वपुण्ड्रो हरिश्शरणं, हरिश्शरणमिति गायन् प्रविशति)

नारदः

किमिदं भैमारण्यं, मया कदापि नैवानुगतम् *(परितो विलोकयति, सभयम्)* शीघ्रं गन्तव्यं, शीघ्रं गन्तव्यम् *(त्वरितं हासयन् गच्छति)*

रत्नाकरः

घातय !

(उभाभ्यां दिग्भ्यां चन्द्रहासौ नारदस्याग्रे ह्युत्पततः, एकः चन्द्रहासः नारदस्य पृष्ठभागे, अपरोऽग्रभागे उत्पतति । नारदः सक्रोधं नेत्रवक्रविकारेण विलोकयति)

रत्नसखः-

(आक्रामति) आक्रमणम् । *(उत्प्लुत्य मार्गमवरुणद्धि)*

नारदः

कोऽयं पापपुरुषो मम मार्गं बाधते । *(हूङ्करोति)* । न मया कोपि अपराधो विहितः, न कस्यापि वस्तूनि निगृहीतानि, नैव घातितः एकोऽपि जीवः । न कुत्रापि विहितोऽसत्यवादः, किमर्थं मां हंसि । पापचराः ! हे पामराः ! मां मा अवरुधन्ताम् ! मां मा अवरुधन्ताम् ! नोचेत् *(तर्जनीम् उत्थाय सोद्वेगम्)* भस्मसात् कर्तुं शक्नोमि *(वाद्यध्वनिश्श्रूयते, प्रकाशो विद्योतते)* ।

रत्नाकरः

(साट्टहासम्) हा हा हा ! अयि भिक्षुक ! *(साभिनयम्)* त्वमस्मान् भस्मसात् करोषि ! वयमेव त्वां भूमिसात्कुर्मः । पश्य अत्र, दण्डम् कुठारं, वाणं, शूलं, पाशं, प्रहारं, अन्ये च शस्त्रास्त्राणि भवेयुः, त्वमस्मान् मारयसि, हँ । वा वयं त्वां मारयितुं प्रभवामो वा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(परस्परं क्रोधेन विलोकयतः परितो चक्रमिव भ्रमतः । वाद्यध्वनिः, प्रकाशश्च जायते)

रत्नसखा- *(दण्डेन नारदम् अपसारयति)* दुर्बलोऽपि बलीयते हुङ्कारेण !

नारदः

सुबलोऽपि दुर्बलायते हुङ्कारेण *(वीणया तं दुर्वारयति, स भूमौ उत्पतति)* ।

रत्नसहयोगी

भिक्षुशरीरात् किं प्राप्यते ! आलोडनं विलोडनं उदरचापश्च क्रियते चेत् अपानवायुः समागच्छति । उत मलं वा उद्‌भविष्यति ! *(साभिनयं हसति च)* ।

रत्नाकरः

अयि भिक्षुक ! *(सक्रोधं, चन्द्रहासेन नारदम् आक्राम्य, नारदश्च वीणया अपसारयति, रत्नाकर उत्पतति । स्वमनसि 'भिक्षुको बलवान् अस्ति, एकेनैव प्रहारेण मामुदपातयत्' उत्थाय)* तव पार्श्वे यानि वस्तूनि सन्ति तानि सर्वाणि देहि । वस्त्रं देहि, धनं देहि, आभूषणं देहि, देहि झोलिकामपि ।

नारदः

अरे मूर्ख पामर ! किमतिमन्यसे ! अहं यायावरीयो यतिराडस्मि । न मम भवनं, न पत्नी, न भूमिर्न च भारो, न सम्पत्तिर्न च विपत्तिः । मम मरणेऽपि न कोऽपि रोदिति, न च हसति । साधुः समत्वेन विमुक्तो भवति, खलः स्वपापेन हतो भवति । मुञ्च, मां मुञ्च । नोचेत् ! *(तर्जनीमुत्थापयति)* ।

रत्नसखः

हे वैरिणेय ! त्वं प्रमादं कुरुषे चेत् हन्यसे, वृथाभिमानं मा कुरु । वयं शस्त्रपाणयः, त्वं वीणापाणिः, किमतिमन्यसे स्वात्मानम् !

रत्नाकरः

हे कालावतेय ! भिक्षोः । *(हस्ताभ्यां निष्पीडयति)* सर्वं देहि, सर्वं देहि, नोचेत् हन्मि, अत्रैव, निपातयिष्यामि ।

नारदः

(सशान्तम्) रत्नाकर ! त्वं महापातकं कुर्वन्नसि । किं तव पत्नी, पुत्राः, पितरौ च तव दुःसहमतिपापं विभज्य गृह्णन्ति ! त्वमतिचारैः स्वं परिवारं भरसि, पशुहिंसया चौरेण वा पालयसि परिवारं, परन्तु मरणान्ते पुण्यापुण्यमेव अनुगच्छति । जाया किमपुण्यं वण्टयति । तव पितरौ पापं वण्टयतः ! गृहं गत्वा तान् पृच्छ, 'किं ते पापं वण्टयिष्यन्ति' वा नेति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रत्नाकरः

अरे दण्डिन् ! त्वं चतुरोऽसि, पलायनस्यावसरं रचयन्नसि ।

नारदः

(सस्मितम्) अहं तु तपोधनोऽस्मि । विशाले ब्रह्माण्डे मम मरणेन किं नश्यति, मम जीवितेन च किं भवतीदानीम् ! अहन्तु सिन्धौ बिन्दुरिवास्मि । यावत् त्वं नैवागमिष्यसि तदाहं ह्यत्रैव निवसामि, इमौ च तिष्ठतः । नायं मिथ्यावादी नारदः । अथवा मम प्रच्छदवस्त्रखण्डेन मां वधान वृक्षे, तवागमनं प्रतीक्षिष्येऽहम् ।

रत्नाकरः

(सभ्रमम्) आम्, एतत्तु प्रष्टव्यम् ! चीवरधारिणा सत्यमुक्तम् । ते निलये ह्युपविश्य भुञ्जते, अहं पापाचारं कृत्वा द्रव्यसञ्चयं करोमि, पशून् घातयामि, मनुष्यान् मारयामि ।

(निःश्वसन् इतस्ततः परिभ्रमति, स्वेदो वर्षति शिरस्तः, स विमना इव जायते)

नारदः

किं शोचसि रत्नाकर ! त्वं गृहं गच्छसि चेदहमत्रैव निवसामि, नो चेद्धरिश्शरणम् ! हरिश्शरणम् ! *(वीणां क्वणयति)*

रत्नसहयोगी

(साभिनयम्) अयं चीवरवान् पलायितुं वाञ्छति, दण्डेन ताडनीयम् । *(हसति, अभिनयेन परिहासयति च)*

रत्नाकरः

मित्र ! *(नटति)* अत्रैव स्थित्वा नारदमवलोकय, स छलेन पलायितुं शक्नोति, भिक्षुको वञ्चकोऽपि भवेत्, छलछद्मकारी च भवेत्, कदाचित् मोहयेत्, कदाचित् वशीकुर्यात् ! महता यत्नेन रक्षणीयोऽयम् !

रत्नसखः

मित्र ! अहं महता प्रयत्नेन रक्षणं करोमि, न कुत्रापि पलायितुं शक्नोति अयं पामरः चीवरवान् ।

रत्नाकरः

नारद ! अहं निलयं गत्वा तान् पृच्छामि किं ते मम कृत्यफलं वण्टयित्वा भुञ्जते न वा ! अत्रैव तिष्ठ, विश्रम । अहं व्रजामि । *(गच्छति)* ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रत्नसख

गच्छामः, वृक्षच्छायायां गत्वा तिष्ठामः, समय एव बलाबलः। *(निष्क्रामन्ति)*

(वाद्यं ध्वन्यते, गगनं वैद्युतायते, मेघो गर्जति च)

रत्नसहयोगी

(परिहासयति) घोरेऽरण्ये तपः करोतु, तव ईश्वर इत एव भवेत् आगमिष्यति, रक्षिष्यति च।

(अट्टहासं करोति। तत्र भल्लूकानां समूहः समागच्छति, ते शिलायन्ते। दीपस्तमिश्रायते विविधवाद्यध्वनिः गुञ्जति, रङ्गं धूमायते)

द्वितीयं दृश्यम्

स्थानम् – रत्नाकरस्य घोषः। समयः – रजनीमुखम्।

(रङ्गस्य कोणे घोषः विलोक्यते, तत्र सखड्गपाणिः रत्नाकरः सस्मितेन स्वप्रियां वल्लरीं समाह्वयति, सा घोषात् बहिः समागच्छति)

रत्नाकरः

प्राणवल्लभे! हे प्राणवल्लभे! किं कुर्वाणासि!

वल्लरी

प्राणेश्वर! किमर्थं सम्बोधिताहम्, इतो भवतः पादयोरस्मि, किं विधानीयं मया नाथ!

रत्नाकरः

सुकृत्या वा दुष्कृत्या, संहननेन वा चौर्येण वस्तूनि आहरामि, तस्य पुण्यापुण्ये फलं भवति, पापफलं वण्टयित्वा त्वं भुङ्क्षे वा न!

वल्लरी

(साश्चर्यम्) पतिदेव! अहं तु भवतः सुभगा अस्मि, पत्नीधर्म एव मया वोढव्यः, त्वं तु भर्तासि, भरणात् भर्ता, अहं जायास्मि, पुत्रपुत्रीः सन्तनोमि। अहं गृहं परिपालयामि, सम्पोषयामि च। भवतः पापफलं नैव वण्टयितुं शक्नोमि, कर्मकृदेव भुनक्तु स्वकर्मफलम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रत्नाकरः

(प्रेमपूर्वकम्) त्वं मम अर्धाङ्गिनी असि, पत्युः कर्मफलं पत्नी भुङ्क्ते, पत्न्याः कर्मफलं पतिः भुङ्क्ते। आवयोर्भेदो न विद्यते, यथा शिवपार्वती अर्धनरनारीस्वरूपेण विराजेते तथैव आवयोः स्थितिरस्ति प्राणवल्लभे !

वल्लरी

(सविनयम्) भवता सदुक्तं, परन्तु मम स्वीकारेण किं भवति ? विधातुर्विधाने कर्मफलविभागस्य व्यवस्था नास्ति । स्वस्य शुभाशुभयोः कर्मफलयोर्भोगः स्वेनैव भोक्तव्यो भवति। जीव एकाकी एव जायते, एकाकी एव लयं यास्यति। प्रकृतिपुरुषात्मकं जगद् विद्यते, प्रकृतेर्नियमं जगदीश्वरोऽपि नोल्लङ्घयति। प्राणवल्लभ ! स्वयं विचारय।

रत्नाकरः

(पितुः समीपं गत्वा) भो पित ! अहं सुकर्मणा वा दुष्कर्मणा द्रव्याणि आहरामि, तस्य दुष्कृतस्य पापस्य फलं वण्टयित्वा भवता भुज्यते वा न !

रत्नजनकः

अरे पुत्र ! अहं तु वृद्धोऽस्मि, किमपि कार्यं कर्तुं नैव प्रभवामि, पुत्रस्य धर्मः, पितृसेवनम्, 'मातृदेवो भव, पितृदेवो भव, गुरुदेवो भव !' इति वेदाः शिक्षयन्ति। त्वया कृतस्य दुष्कृतस्याहं कथं भोक्ता भवेयम् !

रत्नाकरः

(सोद्वेगम्) भवान् मम पितास्ति, माता प्रथमो गुरुर्भवति, पिता द्वितीयो गुरुर्भवति। अहं भवतः पुत्रोऽस्मि। अहं भवता पालितोऽस्मि। भवान् शुभाशुभं न वण्टयति चेत् को वण्टयति ?

रत्नजनकः

(सशान्तम्) तनय ! मम स्वीकृत्या किं जायते ? कर्मफलस्य विभाजनस्य विधानं विधेर्व्यवस्थायां नास्ति। प्रियवाक्यकथनेन किं जायते ! यदि कर्मसिद्धिर्न स्यात् !

रत्नाकरः

(पुत्रान् विलोक्य) पापफलस्य वण्टनविषये युष्माकं को विचारः ?

पुत्राः

वयं तु बाला एव पापस्य वण्टनं कृत्वा कथं भुञ्जीमहि।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रत्नाकरः

(सक्रोधं, श्रमेण शिथिलो भूत्वा) मया किं विहितं भो ! किं पापाचारः साधितः ! परिवारस्य कृते मया भूरि परिश्रमो विहितः, पापं विहितम्, पापं कोऽपि वण्टयितुं नैव वाञ्छति । इमे मया ह्यर्जितं द्रव्यमेव इच्छन्ति । धिग् धिग् ! भोगसम्बन्धा अपत्यवान्धवाः । *(इति रौद्रेण सकरुणो निष्क्रान्तः)* ।

तृतीयं दृश्यम्

स्थानम् - घोरारण्यम् । समयः - रजनीमुखम् ।

(दीपो मलिनायते, मन्दं मन्दं पुनः प्रकाशते च । पुनः घनवनं विलोक्यते, तत्र व्याघ्राणां समूहः अग्रे गच्छति । 'हरिः शरणं हरिः शरणम्' इति नारदस्य मुखात् गुञ्जति । शनैः शनैः क्लान्तो दुःखितश्च रत्नाकरः प्रविशति)

नारदः

(मधुवचसा साभिनयम्) आगतो रत्नाकरः, अहमित एवास्मि, रत्नाकर ! भो रत्नाकर ! तव परिवारजनाः त्वया विहितस्य दुष्कृतस्य फलं वण्टयितुं तत्परा न वा ! पापस्य महापापस्य वा फलं भोक्तुं तैः स्वीकृतम् ? अरे रत्नाकर ! किमर्थं रोदिषि !

रत्नाकरः

हे देवर्षिनारद ! आलयं गत्वा तान् जाया-पुत्र-पितॄन् प्रश्नो विहितः । परं सर्वैरपि अस्वीकृतं पापफलम् ।

नारदः

जाया किम् कथितवती !

रत्नाकरः

पत्न्या तु 'अहं सुभगा अस्मि, पत्नीधर्म एव मया वोढव्यः' 'भरणाद् भर्ता कथ्यते, यः पाति, पालयति वा सः पतिर्भवति' भवान् भर्तास्ति इति निगदितवती, देवर्षिनारद !

नारदः

पिता किम् भणितवान् !

रत्नाकरः

पिता तु 'अहं वृद्धोऽस्मि, पितृसेवनं तव कर्तव्यम्' तव पापफलं नाहं स्वीकरोमीति अगादीत् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नारदः

पुत्रौ किम् अकथयताम् !

रत्नाकरः

'वयं तु बाला एव बालसंरक्षणं भवतः पितुः कर्तव्यमेवास्ति । यः पाति स एव पिता भवति' इति बाला अकथयन् ।

रत्नसहयोगी

(परिहसति) सर्वे स्वार्थपरायणाः, **सर्वः स्वार्थं समीहते** ।

नारदः

ज्ञातं किमस्ति सत्यम् ! *(रुदन् कम्पमानः इतस्ततः करोति रत्नाकरः)* सदसत्कर्मफलभोक्ता तत्कर्तैव भवति नान्यः । रत्नाकर ! पशुघातेन, चौर्येण, महापापाचारेण च परिवारं पालयसि, परमाणुतः महान्ति कार्याणि त्वमतिकरोषि, तेन सदसत्संस्कारो निर्मीयते, ततः कर्माशयो जायते, तेन दुष्कर्मणा महापातकं जायते । त्वं किं महापातकी भवितुमिच्छसि !

रत्नाकरः

भो यतिवर ! मां पाहि माम् पाहि भो ! अस्मात् घोरनरकात् मां समुद्धर यायावर । *(नटति, नारदस्य पादयोः पतति)* ।

नारदः

(अभयमुद्रायाम्) आत्मानमस्मात् घोरनरकात् त्वं स्वयमेव समुद्धर, न कोऽपि त्वां समुद्धर्तुं शक्नुयात्, रत्नाकर ! श्रृणु 'न जायायै कामाय जाया प्रिया भवति, आत्मनस्तु कामाय जाया प्रिया भवति । न पत्युः कामाय पतिः प्रियो भवति, आत्मनस्तु कामाय पतिः प्रियो भवति । न पुत्रस्य कामाय पुत्राः प्रिया भवन्ति, आत्मनस्तु कामाय पुत्राः प्रिया भवन्ति । न वित्तस्य कामाय वित्तं प्रियं भवति, आत्मनस्तु कामाय वित्तं प्रियं भवति । न राज्यस्य कामाय राज्यं प्रियं भवति, आत्मनस्तु कामाय राज्यं प्रियं भवति । अतः **'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निधिध्यासितव्यः।'** इति वदन्ति तत्त्ववेत्तारः । तथ्यमप्येतदेव रत्नाकर !

रत्नाकरः

भो देवर्षे ! मदुद्धारः कथं भवेत् !

नारदः

(क्षणं विश्रम्य, ध्यात्वा च) रत्नाकर । त्वया तपः कर्तव्यम् । त्वमृषेः प्रचेतसः पुत्रोऽसि । तव नाम अग्निशर्माऽऽसीत् । किरातप्रदेशस्य घोरारण्ये यात्रायां पितृपुत्रयोः वियोगो जातः । किरातरूपो व्याधोऽनाथं शिशुं त्वां पुत्रत्वेन संरक्षितवान् । व्याधसङ्गत्या, व्याधो

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जातः, रत्नाकरो जातः, पश्चाद् घोरे लुण्ठनाद्यसत्कार्ये कुकर्मणि च संलग्नोऽभूः ।

रत्नाकरः

(सहयोगिनौ निरीक्ष्य) हे सखायौ श्रृणुतमद्यतो भवन्तौ मुक्तौ स्तः, मया अतिघोरे कर्मणि नियुक्तौ, मां क्षमेताम् । सत्कर्म विधाय जीवनं सत्पथेन सफलीकुर्वाताम् । *(आलिङ्गनं कृत्वा निष्क्रान्तौ, सकरुणं सवाद्यं नदति)* ।

रत्नसहयोगी

(गच्छन् सन् जनान्तिकं प्राप्य परिहासयति) अस्माकं नायकं प्रति यायावरः किं मायाजालमतनोत् ? क्षणानन्तरमेव एतादृशं परिवर्तनम् !

रत्नाकरः

देवर्षे ! मया कया पद्धत्या तपः कार्यम्, का च साधनापद्धतिः ! केन मार्गेण महापातकस्य क्षालनं भवेत्, कस्य ध्यानेन दुष्कर्मसंस्कारो निर्बीजीकर्तुं शक्यते तामेव पद्धतिं मामुपदिशतु ! *(नटति)*

नारदः

(गभीरया वचसा) रत्नाकर ! त्वया परमसत्यं धारणा-ध्यान-समाधिमार्गेण समुपासनीयम् । असद्वृत्तयो ध्यानहेयाः । यदि समाधिसिद्धिर्भवति चेत् ततः क्लेशकर्मनिवृतिर्जायते । *(पद्मासने स्थित्वा स्थापयित्वा च ध्यानमुद्रायां धारणा-ध्यान-समाधीन् शिक्षयति, मन्त्रं श्रावयति च नारदः)*

नारदः

(अभयदानमुद्रायाम्) तपःसिद्धिर्भवतु । कल्याणं भवतु । कविर्भवतु । अमरो भवतु । कालजयी भवतु । ईश्वरप्रणिधानेन तपसा च मुक्तो भवतु । ईश्वरस्य कृपा भवतु *(निष्क्रान्तः)* ।

(रत्नाकरः पद्मासने स्थित्वा ध्यानमुद्रायां 'मरामरामरा' जपति । तत्र गीतं गुञ्जति । ओङ्कारध्वनिर्गुञ्जति । विद्युद्विद्योतते । सङ्गीतमयः श्लोको गुञ्जति-

कुजन्तं राम रामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥
तपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ।) ... *(पटाक्षेपः)*

॥ इति पाराशर्यनवराजकट्टेलविरचितं 'रत्नाकर'नाम नाटकम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वाजसनेयो याज्ञवल्क्यः

पात्रपरिचयः

वैशम्पायनः	:	वेदव्यासस्य शिष्यः, याज्ञवल्क्यादिशिष्याणां गुरुः
याज्ञवल्क्यः	:	वाजसनेः पुत्रः, वैशम्पायनस्य प्रतिभावान् ज्येष्ठशिष्यः
		आलम्बिः, आसुरिः, श्यामायनिः : वैशम्पायनस्य शिष्याः
सामश्रवा, मध्यन्दिन	:	याज्ञवल्क्यस्य शिष्यौ,
छात्राः	:	वैशम्पायनगुरुकुलस्य वटवः
शिष्याः	:	याज्ञवल्क्यस्य शिष्याः । अज्ञातध्वनिश्च ।

प्रथमं दृश्यम्

स्थानम् – मिथिलाप्रदेशसस्थं वैशम्पायनगुरुकुलम् । समयः – प्रातःकालः ।

(गुरुकुलस्य कुटीरेऽरुणोदयात् प्राक् छात्राणां सन्ध्योपासनादिकार्याणां वेदध्वनीनाञ्च सङ्केतो मिलति । दधिमन्थनस्य स्वाहाकारस्य घोषश्च श्रूयते । गोकुले गवां, तर्णकानां वत्सानाञ्च परस्परं ध्वनिः समायाति । कलरवश्च विश्रूयते)

वैशम्पायनः

(अश्रूणि विमुञ्चन्, स्वमनसि) कस्माद् दैववैपरीत्यात् बालहत्यायाः दोषो माम् अलगत् । (परितः मन्दं भ्रमति, विलोकयति च) दोषस्य परिहारो मया कर्तव्य एव । परन्तु कया पद्धत्या कर्तव्यम्, वैदिकेन वा तान्त्रिकेण अन्येन वा । धर्मसूत्राणि यत् कथयन्ति, यद् निर्धारयन्ति तेनैव मार्गेण कर्तव्यं प्रायश्चित्तम् । **वेदोऽखिलोधर्ममूलम् ।** **वेदविहितो धर्मः ह्यधर्मस्तद् विपर्ययः** इति शास्त्रेषु प्रसिद्धम् । जयतु श्रुतिमाता । *(वैशम्पायनो मौनं तिष्ठति, उत्तिष्ठति, गगने हस्तौ प्रसारयति, करुणामुद्रायां नटति, करुणावाद्यं गुञ्जति, प्रकाशेन, वाद्यध्वनिना तीव्रध्वनिना च विचित्रं वातावरणमनुभूयते । ततः प्रविशति समित्रगणो याज्ञवल्क्यः)*

याज्ञवल्क्यः

वयं तु भवन्तं अदृष्ट्वैव इतस्ततोऽन्वेषयन्त समागताः । भो गुरो ! सन्ध्यामतिक्रामते इयं वेला । अनिष्टशङ्कया वयं भीताः स्म, परन्तु गुरुः कुशलो विद्यते । गुरोर

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नुपस्थित्या आश्रमधर्मा अवरुद्धा इव जाता, वयं तु शिष्याः, गुरोरनुसरणं कुर्मः, गुरोरभावे किं कुर्मः । गुरो !

वैशम्पायनः

आम् ! एका विपत्तिः समागता । **'उत्तमा तारकोपता'** इति नीत्यां प्रातिष्ठम् । गाङ्गायां स्नातुमहं गतवान्ः, मार्गे एका अप्रिया घटना जाता । तमिस्रायामियं मेदिनी मग्ना आसीत्, सुधाकरोऽपि अस्तङ्गत आसीत्, नक्षत्रमालापि नीले नभसि विलीना इव आसीत् । *(मौनं तिष्ठति)*

श्यामायनिः

(परितः परिभ्रम्य) ततस्ततः किम् ! भवता यदुक्तं तत्तु न कापि नवीना घटना !

वैशम्पायनः

(नतशिरसा) एको मार्जारो मार्गे उत्पतितः, इतस्ततो गत्वा अरावीत् । वनात् व्याघ्रो विभीषयन् व्यक्रन्दत् ।

आसुरिः

एवंविधा परिघटना तु भवति एव । न किञ्चित् वैचित्र्यम् ।

याज्ञवल्क्यः

भो गुरो ! किं कष्टं समागतम् ! गुरोर्मनसि काचिदन्यैव समस्या भवेत्, गुरुर्गदितुं नैव वाञ्छति । वयं तु अन्तेवासिनः, अस्माकमग्रे तु न किञ्चिदपि गोपनीयं भवति । गुरोः कष्टमपाकर्तुं वयं यतामहे । एष एव शिष्यधर्मः ।

वैशम्पायनः

याज्ञवल्क्य ! मार्गे एकं वस्तु पदा हतम् । ततो ध्वनिः समागच्छत् । स ध्वनिः मामशान्तमकरोत् ।

(मनसि- शावकस्य पिता 'येन जातेन मम कुलं पावितम्, येन जातेन सफलीभूतमासीत् गृहस्थजीवनम् । पत्न्या सह धर्मार्थकाममोक्षसाधनमेव गृहस्थजीवनस्य सारः, तस्यापि सारः सन्ततितन्तुवितानमेव । मृते पुत्रे किं जीवितेन मया, भो देव ! कष्टम् !' इति कथयन् रुदन्नासीत् । एतत् मां व्यथयति)

याज्ञवल्क्यः

तेन स्वनेन किमभवत् प्रभो ! अग्रे च का घटना ! समस्यायाः किं कारणम् ?

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वैशम्पायनः

अग्रे निविडतमिस्रायां निमग्नो घोषः समागच्छत् ।

(मनसि- तदाहं शान्तं पापम् । शान्तं पापम् । किमिदं वस्तु मया तमिस्रायां पदाहतम् । पथि के जना सन्त्यत्र वा भूतप्रेतोऽयं वा ।' इति विचारः समागत्य भीतवान्) ।

आलम्बिः

घोषस्तु मार्गे अस्ति एव । ततस्ततः किं गुरुदेव ! भवतो मनश्चञ्चलो दृश्यते ।

वैशम्पायनः

तत्र द्विजदम्पती रुदन्तौ आस्ताम् । गवेषयन्तौ आस्ताम् । इतस्ततो धावन्तौ च आस्ताम् । *(मनसि)*

(बालकस्य पिता – तव जातेन पितरः तृप्ता आसन्, बान्धवाः प्रफुल्लायिता आसन्, कुलदीप ! त्वं कुलस्य रविरिव आसीः । मत्स्यस्य जलमिव, प्राणिनां प्राणवायुरिवासीः । पुंनामनरकात् त्रायते इति पुत्रः इति शास्त्रे श्रुतं, सम्प्रति को मां भवबन्धनात् तारयति, को मां कर्मबन्धनात् उत्तारयति, निमग्नोऽहं भवसागरे' इति निगदन् उभौ भूम्यां पतितवन्तौ, तां घटनां स्मृत्वा रोरुद्यते मम मनः ।)

आसुरिः

(नटति) किमर्थमितस्ततो अधावतम् ! गुरोर्मनसि महती चिन्ता प्रवर्धते ।

वैशम्पायनः

तेषां शावकः शृगालेन केनापि वा भवेत् अनीयत । पुत्रस्यापहरणभयाद् मृतभयाद् वा तौ रुदन्तौ चास्ताम् । ताभ्याम् अहं पृष्टः । तौ 'अस्मकं पुत्रः शयान एव लुप्तो जातः, अहं माता श्रमेण महत्यां निद्रायां निमग्ना आसम् । निविडे तिमिरे कोऽनयत्, न परिज्ञायते !' इति पृष्टवन्तौ ।

आसुरिः

ततस्ततः किम् ?

वैशम्पायनः

मया निवेदितम् मार्गे एकं वस्तु मम पदाहतमासीत् स एव शिशुर्भवेत् । सा गता तत्र मृतं पतितं बालमपश्यत् । सा क्रोडे निधाय स्वकं बालकं रुदती आगता, कथितवती च 'भवतः पदाघातेन मम बालो मृतः । बालघातकस्तु भवानेव' इति न्यवेदयत् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बालकस्य मरणात् स ब्राह्मणो माह्यमायुर्यशोहानिर्भवेदिति श्रापं दत्तवान्। अतोऽहं तेन बालहत्याया दोषेण पीडितो व्यथितश्च।

याज्ञवल्क्यः

अज्ञानेन कृतं पापं न दोषाय कल्पते। मा भेतव्यं गुरो!

(मनसि- गुरुरतीव दुःखितोऽस्ति बालहत्यादेषेण, मयापि किञ्चित् कार्यं करणीयं भवति)

वैशम्पायनः

(गगनं विलोकयन्) याज्ञवल्क्य! मम मानसं एषा घटना पीडयति। किम् अज्ञात्वैव वह्निस्पर्शनं जायते चेत् नैव दहति! किम् अज्ञात्वैव गरलपानं क्रियते चेत् नैव मरणाय कल्पते! अज्ञात्वैव नद्या वेगधारायामुत्पतति चेन्नद्याः जलधारा नैव वाहयति तम्!

याज्ञवल्क्यः

भवता सत्यमुक्तम्। तथापि अज्ञानेन कृतं, न कारितं नानुमोदितम् अतो न दोषभाक्।

वैशम्पायनः

हा! कष्टम् भो हा कष्टं समापतत्।

(मनसि- नेत्रवाष्पैः रुदती सा बालजननी 'भवान् तु ऋषिकल्प एव, ऋषयः सत्यवक्तारः, मुनयः 'क्रियाफलाश्रयत्वेन' जायन्ते। जीवयतु मम पुत्रं, मम पुत्रः पूर्ववत् हसतु, इतस्ततः खेलतु। स्मितेन, मधुरेण बालशब्देन माम् आह्लादयतु, पितृन् तर्पयतु, देवान् प्रसादयतु, कुलं पावयतु च' इति गदती मम पादयोरपतत्, खल्वेषा दुःखदायिनी घटना)

आसुरिः

कष्टं दूरं पलायते, भवतः प्राणभूताः शिष्याः स्मः। वयञ्च किञ्चित् कुर्मः।

वैशम्पायनः

मम मानसपीडां कथमपाकर्तुं शक्यते, इयं पीडा बाह्यजगति नैव दृश्यते।

(मनसि- बालजनको मम पादौ पतित्वा रुदन् पुत्रजीवनस्य भिक्षां याचते स्म, 'भो ज्ञानिन् गुरो! ऋषयः कर्तुम्, अकर्तुम्, अन्यथाकर्तुञ्च शक्नुवन्ति इति मया श्रुतम्। विधिवसात् इयं दुर्घटना जाता, मन्त्रतपोबलैर्जीवयतु भवान् मम बालम्' इति। परन्तु तस्य बालस्य...)

याज्ञवल्क्यः

सा तु प्रकृत्याधीना घटना, प्रकृतिः विपरिणमते। क्रियाप्रतिक्रियात्मिका प्रकृतिः, एका क्रिया अपरक्रियायाः जननी भवति। अत्र तु मानसी पीडा प्रबाधते गुरो!

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वैशम्पायनः

मनश्च प्रकृतिपरमेव । मनो न चैतन्यं, चित्तबुद्ध्यहङ्कारा ह्यन्तस्करणसमुदयः, स प्रकृतिधर्ममनुसरति, अतो मां व्यथयति । तौ दम्पती व्यथया येन प्रकारेण अरुदिताम्, तेनैव रोदनेन मम हृदयं विगलितं, तेन गर्ह्येण कर्मणा पीडितञ्च ।

(मनसि) तदा क्षणं ध्यानेन विलोकितवानाहं तस्यायुर्नासीत्, 'स्वल्पायुष्कोऽयं बालः, अतो गतवान्, पुत्रकामनया जगदीश्वरं भज, पुत्रेष्टियागं सम्पादय, पुत्रो भविता । मा रुदिहि । ईश्वरं स्मर, शं ते करिष्यति ।' इति मया तौ स्मारितौ । मृतबालं संगृह्य संस्काराय रुदन्तौ अगच्छताम्,तत्स्मृत्वा मनसि महती पीडा समुत्पद्यते)

याज्ञवल्क्यः

(सगर्वम्) सच्चिदानन्दब्रह्मणि मनो निधाय ध्यानधारणासमाधि-माध्यमेन मनोविकारं विनाशयितुं शक्यते गुरो । अथवा ह्यष्टाङ्ग -योगसाधन- मार्गेणापि अन्तःकरणमलविक्षेपसमुदयः अपाकरणीयः । नेयं हिंसा, हिंसा तु 'कृतकारितानुमोदिता' जायते, तदपि 'लोभक्रोधमोहपूर्वकं' भवति, नेदं विगर्ह्यकर्म, तत्तु विहितं भवति, तत्तु मनसा, वचसा, कर्मणा साधितं प्रभवति ।

वैशम्पायनः

ब्रह्मवाह ! मा ब्रूहि अधिकम् । पूर्वमपि मां ब्रह्महत्यायाः दोषमलगत् । अधुना च ममोपरि बालहत्यायाः दोषं समापतत् । अतोऽहं वैदिकेन मार्गेण प्रायश्चित्तं कर्तु कारयितुञ्च वाञ्छामि । सर्वैः ममान्तेवासिभिः सम्भूय श्रुतिविहितेन मार्गेण प्रायश्चित्तं करणीयम् । किं कुरुथ छात्रा !

छात्राः

भवदाज्ञां मनोवचःकर्मभिः परिपालयामो गुरो ! तर्हि अस्माभिः बालच्छात्रैः किं विधातव्यं गुरो !

वैशम्पायनः

व्रतमाचरणीयं कठिनं, चान्द्रायणं, कृच्छ्रचान्द्रायणं वा अन्यच्च सम्पादनीयम् ।

छात्राः

वयं बालच्छात्राः तत् कठिनं व्रतसाधयितुं शक्नुमः किम् । परन्तु वयं तु गुरोराज्ञां परिपालयामः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

याज्ञवल्क्यः

भो व्यासशिष्य, गुरो ! एते बालशिष्याः सन्ति, ते कठिनं प्रायश्चित्तव्रतं कथमाचरिष्यन्ति ! अहं समर्थोऽस्मि, अहं गुरोः प्रियशिष्योऽस्मि, ज्येष्ठशिष्यश्चामि, अतोऽहम् एकाकी एव भवतः कृते प्रायश्चित्तं सम्पादयामि ।

वैशम्पायनः

वाजसनेय ! *(सक्रोधम्)* प्रमादं मा कुरु । प्रमादं हि मनुष्यान् धूलिसात्करोति ।

याज्ञवल्क्यः

(सोद्वेगम्) नाहं प्रमादं कुर्वन्नस्मि । विशम्पज ! हे गुरुदेव ! भवतः षडशीति *(८६)* शिष्याः, परन्तु श्यामायनिः, आसुरिः, आलम्बिः, याज्ञवल्क्योऽहं शिष्यनायकः । अन्ये शिष्यनायकाः कुत्र सन्ति नाहं जाने, भवतश्चाग्रेऽहमस्मि, अतो मयोक्तम् ।

वैशम्पायनः

(सक्रोधम्) हे ब्रह्मरातसूत ! त्वमतिमन्यसे । अन्यानि मित्राणि तिरस्करोषि ! तिरस्कारेण न कार्यं सिध्यति । तिरस्कारेण न कोऽपि प्रसीदति । वाजसनिपुत्र ! अहङ्कारी मा भूः । अहङ्कारः पातयिष्यति ते विद्याम् ।

याज्ञवल्क्यः

(सोद्वेगम्) द्वैपायनान्तेवासिन् । हे गुरुदेव ! भवानपि व्यासस्य प्रमुखेषु शिष्येषु एकः । व्यासेन साकं कति प्रवादा विवदेयुः । यथा द्वैपायनशिष्याः पैलः, भवान् वैशम्पायनः, जैमिनिः, सुमन्तुश्च । भवद्भिः क्रमशः ऋक्, यजुः, साम, अथर्वसंहिता च अधीता, चतुर्दिक्षु प्रचारिता च । वयमपि तथैव भवता अध्यापितस्य वेदस्य चतुर्दिक्षु प्रचारं कुर्मः ।

वैशम्पायनः

यज्ञवल्क्यस्यात्मज । त्वं शिष्यशिरोमणिरसि । त्वमात्मनं वृथा मन्यसे, अतिमन्यसे, अहङ्कारः सर्वान् विनाशयति । रावणस्याहङ्कारो राक्षसकुलं व्यनाशयत् ।

याज्ञवल्क्यः

(सोद्वेगम्) नायं किल अहङ्कारप्रदर्शनम् । मया सत्यमुक्तम् । एते बालाः सन्ति, ते कठिनं चान्द्रायणादिकं व्रतं कथमाचरयेयुः । भवतः कृतेऽपि सौकर्यं जायते, एकेन कार्यं साध्यते चेत् शैशवानां प्रयासः किमर्थं ग्रहीतव्यः ! इमे बालसखायो मे, गुरुकुले एव स्थित्वा वेदवेदाङ्गं पठेयुः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वैशम्पायनः

(सरोषम्) याज्ञवल्क्य ! त्वमतिभाषसे ! अन्येषां छात्राणामपि कर्तव्यं भवति, गुरोः सेवनम् आशीर्वचोग्रहणञ्च । साहङ्कारो भूत्वा त्वमेकाकी एव सम्पादयसि सर्वाणि कार्याणि ! नैतत् त्वयि शोभते, त्वं तु छात्रनायकोऽसि ।

याज्ञवल्क्यः

व्यासशिष्यशिरोमणे ! भवता एवाहं वाद-विवाद-जल्प-छल-तर्कवितर्कैश्च शिक्षितः, वाक्पटुता च समागता, **'शिष्यादिच्छेत् पराजयम्'** इति गुरवो वाञ्छन्ति ।

वैशम्पायनः

(सरोषम्) याज्ञवल्क्य ! त्वं गुरोरग्रे बहुभाषसे ! **'शिवे रुष्टे गुरुस्त्राता, गुरौ रुष्टे कस्त्राता !'** गुरुरग्रे विकथनमपि ह्यपुण्यमेव । ह्यपुण्यात् त्वयि अपयशो जायते ।

याज्ञवल्क्यः

(सगर्वम्) गुरो ! अहं तु भवतोऽनुचरः एव, सेवकः एव । भवतश्छत्रच्छायायां पालितः, पाठितश्च । परं सत्यन्तु सत्यमेव भवति, न मया कोऽपि प्रलापो विहितः, परं सत्येन धार्यते मही, सत्येन पूज्यते गुरुः । सत्यात् परं न किमपि मित्रम्, न कापि शक्तिश्च । *(करौ प्रचाल्य इतस्ततः पर्यटति ।)*

वैशम्पायनः

(सक्रोधम्) याज्ञवल्क्य ! ममाग्रे सतर्जनीम् अहंयुः प्रदर्शयसि । तारेण वदसि, मां दिशसि अनुशासनं, गुरुशिष्यमर्यादां समुल्लङ्घ्य रौद्ररूपं धरसि ।

(सवेगं, हस्तौ प्रसार्य, सतर्जनीम् उच्चैर्जटाविमोचनपूर्वकं वदति, भैमं वाद्यं ध्वनति, विद्युत् चमत्करोति) मत्तः अधीताः सर्वा अपि विद्या वमतु, वमतु ! सर्वा अपि विद्याः परावर्तय ।

याज्ञवल्क्यः

(नतशिरसा) गुरोराज्ञां स्वीकृत्य सर्वामपि विद्यां परावर्तयामि, वमामि च ।

(परितो भ्रमति, विशिष्टा चेष्टा दृश्यते । वाद्यध्वनिर्गर्जति, रङ्गो धूमायते, सर्वं वेदवेदाङ्गं वमति, छायाचित्रे तित्तिरा दृश्यन्ते, प्रकाशो मन्दायते, कृष्णायते याज्ञवल्क्यः । खञ्ज इव इतस्ततः करोति । प्रकाशः सरति, वाद्यं गुञ्जति विद्युद्द्योतते, पटाक्षेपश्च जायते)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वितीयं दृश्यम्

स्थानम् : जनकपुरस्य तपोवनम् । समयः – प्रातःकालः ।

(प्रकाशो मन्दायते। एकान्ते प्रकृतिकुक्षौ भ्रमन्त एकपादेनोत्थितो गगने करौ चोत्थापयन् ध्यायन्नस्ति यज्ञवल्क्यः । कोकिलमत्तमयूरादीनां गोमृगहरिणादीनां ध्वनिश्च समायाति । निष्तेजो याज्ञवल्क्य इतस्ततो कुर्वन् कदा ह्यन्धकारे, कदा प्रकाशे चलति । कदा मन्ददीपे कृष्णकायो याज्ञवल्क्यो भ्रमन् दृश्यते, विविधवाद्यध्वनिश्च श्रूयते ।)

याज्ञवल्क्यः

(कदा छायायां कदा प्रकाशे) 'वेदवक्तो विधातः ! मां किमर्थमन्धकारे निक्षिपसि भो ! किं करोमि क्व गच्छामि, वेदमूर्ते !

अज्ञातध्वनिः

सदक्षरं स्मृत्वा तप ! सदक्षरं स्मृत्वा तप !

याज्ञवल्क्यः

(निस्तेजो भ्रमति स कदान्धकारे कदा प्रकाशे च । म्लानेषु ह्यन्धकारेषु छायाचित्रं पर्यटति । विविधवाद्यध्वनिश्श्रूयते, रङ्गश्च धूमायते ।)

हिरण्यगर्भ ! क्व गच्छामि, क्व तपस्यामि भो !

(भ्रमति, कदा प्रकाशे, कदा छायायाम्)

अज्ञातध्वनिः

याज्ञवल्क्य ! तेजोमण्डलं सूर्यं स्मर, सः शं ते करिष्यति ।

याज्ञवल्क्यः

(एकं पादं समुत्थाप्योर्ध्वबाहुभ्यां सूर्यं नमति, कदा प्रकाशः कदा छाया दृश्यते । याज्ञवल्क्यः ..... स्वरेण मन्त्रं जपति)

> तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः, शतञ्जीवेम शरदः शतं श्रृणुयाम शरदः शतं प्रब्रवाम शरदः, शतम्भूयश्च शरदः शतमदीनाः श्याम शरदः शतम्भूयश्च शरदः शतात् ।

(विविधहस्तमुद्रया, सूर्यासनमुद्रया च सूर्यं नमस्करोति । एकपादेन उर्ध्वबाहुना सूर्यमुपास्ते ।)

'हे सूर्य । मह्यं वेदविद्यां देहि, अमरविद्यां देहि, आत्मविद्यां देहि, परापरां विद्यां देहि । नोचेत् तव गगनपथं अवरुणध्मि ।'

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(रङ्गे दीपानां रङ्गविरङ्गा विचित्रा गतिर्दृश्यते। दीपो भ्रमति। वाद्यं, कलरवश्च श्रूयते। भल्लुकानां समूहः ततो गच्छति। वातावरणं शून्यं प्रतिभाति। शनैः शनैः वेदमन्त्रस्य ध्वनिः समायाति।)

उदुत्यञ्जातवेदसन्देवं वहन्ति केतवः दृशे विश्वाय सूर्यम्।
चित्रन्देवानमुदगादनीकञ्चक्षुर्मित्रस्य वरुणस्याग्नेः।
आप्राद्यावापृथिवीऽअन्तरिक्षगुं सूर्य ऽआत्मा जगतस्तस्थुषश्च॥

(पुनः शून्यं प्रतिभाति। विविधा ध्वनयः समागच्छन्ति। व्याघ्रस्य ध्वनिः श्रूयते। शार्दूलस्य समूहः ततो गच्छति। कोकिलकूजनं श्रूयते। रङ्गे कदा तिमिरं, कदा प्रकाशो राजते, कदा याज्ञवल्क्ये प्रकाशः। सर्वं शून्यमनुभूयते)

(तेजोमयः सूर्यप्रकाश इतस्ततो भ्रमति पृष्ठतो ध्वनिरायाति) हे उद्दालकशिष्य!

उत्तिष्ठोत्तिष्ठ धौरेयो वेदविद्याप्रकाशकः।
यजुर्वेदस्य शुक्लस्य समुद्धारक! हे मुने॥
वेदविद्यां ब्रह्मविद्यां सुधां विद्यां परापराम्।
ददामि याज्ञवल्क्याय शिष्याय मम धीमते॥

याज्ञवल्क्यः

सूर्याय नमः। भास्कराय नमः। महते नमः। सृष्टिबीजाय नमः। अनाद्यन्ताय नमः।
(प्रकाशो मुनिं शनैः प्रकाशयति, कान्तिहीनो याज्ञवल्क्यः शनैः शनैः तेजस्वी दृश्यते। स इतस्ततो भ्रमति। सूर्यं नमस्करोति। वाद्यस्य वेदस्य च ध्वनिः समायाति। दीपस्य विविधा छटा नरीनर्ति।)

यज्जाग्रतो दूरमुदैति दैवन्तदुसुप्तस्य तथैवैति। दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मे मनः शिवसङ्कल्पमस्तु॥ मित्रस्य चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्। मित्रस्य चक्षुषा सर्वाणि भूतानि समीक्षामहे॥

(सश्मश्रुको जटामुकुटमण्डितो याज्ञवल्क्यः प्रकाशस्य पुञ्जे वेदमन्त्रानुच्चारयन् गायत्रीं जपन् दृश्यते। वेदस्य ध्वनिं श्रुत्वा क्रीडन्तो ऋषिकुमाराः समागच्छन्ति।)

सामश्रवा

(साश्चर्यम्) सखायः सिद्धं तपस्विनं श्रुतिमुच्चारयन्तं ऋषिवर्यं पादयोः नमामः। (अग्रे सम्प्राप्य वामहस्तेन दक्षिणकर्णं, दक्षिणहस्तेन वामकर्णं सङ्गृह्य) भो आचार्य! वशिष्ठगोत्रीयो स्वपितृकुले पठन् सामश्रवाहं भवन्तमभिवादये *(पादयोः शिरसा नमति)।*

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मध्यन्दिनः

भो आचार्य ! अत्रिगोत्रीयो स्वपितृकुले पठन् मध्यन्दिनोऽहं भवन्तमभिवादये *(पादयोः शिरसा प्रणमति । एवंरीत्या मधुकपैँग्यः, आसुरिश्च स्वस्वनामगोत्रपितृकुलस्य च सम्बोधनपूर्वकमाचार्यं याज्ञवल्क्यं नमतः)*

याज्ञवल्क्यः

(हस्तयोरुत्थापयन् शिरसि स्पृशन्) आयुष्मान् भव सौम्य । यशस्वी भव । वेदविज्ञो भव । ब्रह्मविद् भव । वेदरक्षको भव । वेदप्रचारको भव सौम्य !

(दीपो मन्दायते । धूमायते रङ्गः ।)

ग्रामवासिनः

(विमृशन्ति, तेषां छायैव दृश्यते) जानकपुर्यामस्याचार्यस्य कृते सम्यक् आश्रमो रचनीयः । आश्रमे आवासशाला, पाठशाला, यज्ञशाला, पाकशाला, गोशाला आसमन्ताद् रचनीयाः । देवरातो जनकश्च निवेदनीयः । ऋषिकुमाराः आनीयाः ।

(इति निगदन्तो विविधशालारचने संलग्नाः सन्तीति परिज्ञायते ।)

शिष्याः

(आचार्यः समुच्चारयति तदन्वध्ययनं कुर्वन्ति)

ईषित्त्वोर्ज्जेत्त्वाव्वायवस्थदेवो वः सविताप्प्रार्प्पयतु ...।

(वेदाध्ययनस्य घोषं श्रुत्वा ऋषिकुमाराः कण्वः, वैधेयः, शालिन्, (मध्यन्दिनः), शापेयिन्, विदग्धः, उद्दलः, ताम्रायणः, वात्स्यः, गालवः, शैषरिन्, आटविन्, पर्णिन्, वीरणीन्, परायणः समागत्य छायायामाचार्यं ब्रह्मरातं याज्ञवल्क्यं कर्णस्पर्शपूर्वकं नामगोत्रपितृकुलोच्चारणसहितं नमन्ति ।)

याज्ञवल्क्यः

(प्रकाशे) आयुष्मान् भव । यशोवान् भव । सूर्यतः प्राप्तस्य शुक्लयजुर्वेदस्य रक्षकः शाखाप्रवर्द्धको भव सौम्य ।

> **ईशावास्यमिदं सर्वं यत्किञ्च जगत्याञ्जगत् । तेनत्यक्तेन भुञ्जीथाः मा गृधःकस्यस्विद्धनम् ।**

*(छायायां '**त्रिः सप्त सस्रा नद्यो महीरपो वनस्पतीन् पर्वताँऽअग्निमूतये । कृषनुमस्त्रीन् तिरव्यं सधस्थ आ रुद्रेषु रद्रियं हवामहे**' (ऋग् १०।५।६४।८) इति वेदस्य ध्वनिश्श्रूयते । 'सामश्रवा मध्यन्दिनश्च गोदोहनं सम्पादय' 'आसुरिः कण्वश्च दधिमन्थनं कुरु' 'मधुकपैंग्यो वैधेयश्च यज्ञं सम्पादय' केचिच्छात्रा भोजनशालायां गच्छत इति*

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गुरुराज्ञापयति । क्रमशो गोदोहनस्य, दधिमन्थनस्य स्वाहाकारस्य ध्वनिश्च श्रूयते ।)

याज्ञवल्क्यः

(मध्ये प्राचार्यो याज्ञवल्क्यः, अर्धचन्द्राकारेण शिष्याः तिष्ठन्ति, गुरुरुपदिशति)

प्रणवं प्राक्प्रयुञ्जीत व्याहृतिस्तदनन्तरम् ।
सावित्रीं चानुपूर्वेण ततो वेदान् समारभेत् ॥
ऋक्संहितां त्रिरभ्यस्य यजुषाञ्च समाहितः
साम्नाञ्च सरहस्यञ्च सर्वपापैः प्रमुच्यते ॥
शतेन द्विगुणिता विद्या सहस्रेण च तिष्ठति ।
शतानाञ्च सहस्रेण प्रेत्येह चावतिष्ठति ॥
अञ्जनस्य च क्षयं दृष्ट्वा वल्मीकस्य च सञ्चयम् ।
अवध्यं दिवसं कुर्यात् दानाध्ययनकर्मसु ॥ (याज्ञवल्क्यशिक्षा)

(वैद्युतप्रकाशो नरीनर्ति, प्रकाशस्य विविधा गतिर्जायते । वाद्यं ध्वन्यते । श्रुतिवाक्यञ्च श्रूयते । परितः शान्तं वातावरणं, कूजन्ति मत्तमयूराः, कोकिलाश्च ।

न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति । न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति । न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रिया भवन्ति । न वा अरे वित्तस्य कामाय वित्तं प्रयं भवत्यात्मनस्तु कामाय वित्तं प्रियं भवति । न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति ।

आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निधिध्यासितव्यः (मैत्रेयूयात्मनि) खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम् । ओम् तत्त्वमसि । सर्वं खल्विदं ब्रह्म । ओम् खं ब्रह्म । (बृहदारण्यकोपनिषद्)

(रङ्गे विविधाः ध्वनयोऽभिगुञ्जन्ति । मन्ददीपस्य विविधा गतिर्दृश्यते । उपदेशपुरःसरं पटाक्षेपश्च जायते ।)

॥ इति पाराशर्यनवराजकट्टेलविरचितं 'वाजसनेयो याज्ञवल्क्य' नाम नाटकम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सत्यव्रतम्

पात्रपरिचयः

सत्यव्रतः : आचार्य

वनराट् : व्याधः

दन्तुरः : छात्रः

स्थानम् : तपोवनम् । समयः - दिवसस्य चतुर्थप्रहरः ।

(यवनिकायाः पृष्ठभागे तत्र पशुकूर्दनस्य ध्वनिः, मारय, मारय, भिन्दिपालं प्रक्षिप, प्रक्षिप,बाणेन घातय, इति श्रूयते । प्रकाशे घोषो दृश्यते वेदध्वनिश्च गुञ्जति । ततः प्रविशति सकच्छः, मलीन-शिरस्त्रयुतः सशस्त्रो व्याधः)

वनराट्

अयि ! भो ! के सन्त्यत्र आश्रमे । *(साक्रोशम्, परितः त्वरया भ्रमन्, उच्चैः)* अरे ब्राह्मण ? किं कुर्वन्नसि, मम वार्ता नैव श्रुता ? कियद्वारं मया आहूतः ! शिलोञ्छजीविन् ! *(सक्रोधम्)* झटिति ह्यागच्छ ममाग्रे नो चेत् विध्वंशाय कल्पते । *(सरौद्रं परितो भ्रमति)*

दन्तुरः

(सधौतो सत्रिपुण्ड्रः । सहास्यं, साभिनयम्) अत्र तु न कोऽपि सन्ति, एकश्श्रेष्ठी अस्ति, उञ्छवृत्तिमान् । *(हसति, पुनः परिभ्रम्य वदति)*

> वने स्थिता दिव्यतपस्थलीयं नृत्यन्ति चैणेयकशावकाश्च ।
> ददाति दुग्धं नववत्सकाय धेनुः सदा नृत्यति वेदगानम् ॥
> नीडं विशालं रचयन्ति नित्यं खगाः स्वशिल्पैर्मधुरैश्च गानैः ।
> क्रीडन्ति बाला मुदितैर्मनोभिर्मा ब्रूहि चोच्चैर्व्यथयन् वचोभिः॥

वनराट्

(कुटिलनेत्राभ्यां पश्यन्) कोऽयं हास्यपुरुषः । मम बाणविद्धो हरिणो दृष्टः किम् ?

सत्यव्रतः

(जटिलो रुद्राक्षमालाधारी तपस्वी, सस्मितवचसा) भो वनराट् ! एष आगच्छति, का च तव समस्या, किं भूतम् ? मा वृथा ब्रूहि तारेण । एषा तपःस्थली, मा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रोटय, एकमपि पत्रं, तेषु वनस्पतिषु च चैतन्यं विराजते, मा क्रोधम् एधि । क्रोधो विनाशाय जायते ।

वनराट्

(साश्चर्यं नटति) कोऽयं जटाधारी मां वनाधिपतिम् उपदिशति ! मम वचनमनादृत्य अस्मिन् मम महाटव्यां स्थातुं न शक्नोषि ! बाणविद्धो हरिण इत एव पलायितवान्, दृष्टः किं वा ।

दन्तुरः

(सोद्वेगं, साभिनयम्) गुरुं हुङ्कृत्य तुङ्कृत्य वदति, कोऽयं परशुहस्तः !

सत्यव्रतः

भो वनराट् ! नेदं जगत् कस्यापि, नेदं वनं कस्यापि, 'ईशावास्यमिदं सर्वम्' । कोटिशो जना ममेदं ममेदं गदित्वा दिवङ्गताः, गमिष्यन्ति च । वृथाऽहङ्कारं मा कुरु । संसाराद् भवतापि गन्तव्यं, मयापि गन्तव्यम् । अतः कुरु प्राणिषु दयाम् । दयध्वम् । दत्त । दमध्वम् । आत्मनि चात्मानं विलोकय ।

वनराट्

(सरौद्रम्) नाहं यायावरः, न च यतिः, नापि भिक्षुः । अहं भुजदण्डेन जीवितोऽस्मि । आखेटवृत्या जीवामि, परिवारस्य भरणपोषणे च करोमि । इदमरण्यं मम । अस्य अरण्यस्याहं सम्राट् । हिंसा एव मम वृत्तिः ।

सत्यव्रतः

मा हिंस्याः सर्वाणि भूतानि । अहिंसा हि परमो धर्मः । पशुहिंसा नैव कर्तव्या । अहिंसया भाव्यम्, पशवोऽस्माकं मित्राणि भवन्ति । **'अहिंसा- प्रतिष्ठायां तत्सन्निधौ वैरत्यागः ।'** इति पतञ्जलिना उक्तम् ।

वनराट्

(साभिनयं हुङ्कृत्य) नाहं तादृशो भीरुः । वीरभोग्या वसुन्धरा । हिंसा तु सर्वत्रैव सर्वदैव भवति । यत्र हिंसा न भवति तत्र जीवनमपि न भवति । उक्तं च **'जीवो जीवस्य जीवनम् ।'**

दन्तुरः

(साभिनयं नटन्) कोऽयं पाशधरः, गुरुमुपरि ! .....अपमानं करोति ! हुः हुः ! *(परावृत्तेन तेन पातितो दन्तुरः)*

सत्यव्रतः

(परितो भ्रमन्) अरे जीवघातक ! मां जीवहत्यायै प्रेरयसि ? हिंसादयः कृतकारितानुमोदिता भवन्ति । नाहं हिंसां करोमि, न कारयामि च ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वनराट्

(सक्रोधम्) अरे भिक्षाजीविन् ! मम भोजनं निन्दसि ! वयं तु मांसभोजिनः । कियान् आनन्दः स्वादुता चानुभूयते, शरीरपोषकश्च भवति भोजनम् । मांसस्वादं दण्डिनो नैवानुभवन्ति *(साट्टं परिहसति)* ।

सत्यव्रतः

अरे असिजीविन् ! अस्यां तपःस्थल्यां समागत्य कोलाहलं कुरुषे, वटवः पठन्तः सन्ति । ऋषयः ध्यायन्तः सन्ति । मत्तमयूरा नृत्यन्तः सन्ति । मृगशावकाः उत्प्लवन्तः सन्ति । उच्चैर्मा ब्रूहि ।

वनराट्

(सक्रोधम्) रे भिक्षुक ! माम् आज्ञापयसि । सत्वरं ब्रूहि, इत एव समायातो बाणविद्धः हरिणः कुतः कुत्र गतवान् ?

सत्यव्रतः

(अभयमुद्रायाम्) नाहं जाने घातक ! अहन्तु सदैव तपस्यायां लीनो भवामि, कदाचित् पठामि, कदाचित् अन्तेवासिनः पाठयामि । शिलोञ्छवृत्या यद् मिलति तदेवास्माकं भोज्यम्, अस्यां ज्ञानभूमौ जलं मिलति, परितोऽरण्यानि सन्ति, तत्र फलानि मिलन्ति, परितो नीवारा सन्ति । एतेषां प्रकृतिप्रत्तानां पदार्थानामुपभोगेन जीवामः ।

वनराट्

(सावेगं परिवृत्य) भवान् जीवतु शाकाहारेण, जलाहारेण वा न मम चिन्तायाः विषयः । परन्तु इत एव समायातो हरिणः कथं न दृश्यते !

('विनाशस्त्रमपि यायावरो भयरहितं वीरसदृशं ब्रूते, अस्मिन् का शक्तिरस्ति !' इति मनस्युत्पद्यते, भ्रमित्वा चित्रायते ।)

सत्यव्रतः

(व्याधस्य नेत्रयोर्नेत्रौ संयोज्य) व्याध ! किमर्थं चित्रीयसे !

(मनसि– 'अस्य मनसि ईश्वरस्य वातावरणस्य वेदध्वनेश्च प्रभावः प्रविष्टः, अग्रेऽपि उपदेष्टव्यम्')

व्याध ! वद, तव कथनीयं यदस्ति ।

दन्तुरः

(निकटं गत्वा हासयन्) अयन्तु मम गुरुवाक्यं श्रुत्वा स्थाणुरिव जातो, हा हा हा ! (व्याधस्य उरसि कर्णं संयोज्य) गतप्राणाः किम् !

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वनराट्

(साभिनयम्) अहम् आखेटजीवी, मम परिवारस्य भरणपोषणमनया वृत्त्या भवति। दिनान्ते हरिणः प्राप्तः तदपि पलायितः, इति चिन्तया गतचेतन इवाभवम्। गुरुवर! हरिणः कुत्र गतः ?

सत्यव्रतः

> **या पश्यति न सा ब्रूते या ब्रूते सा न पश्यति**
> **अहो! व्याध! स्वकार्यार्थिन्! किं पृच्छसि पुनः पुनः॥ (दे.भा)**

वनराट्

(सविनयम्) अद्य मम परिवारो बुभुक्षया मरिष्यति, अतः मया येन केन प्रकारेणापि हरिणमांसं नेतव्यं गृहे। अहं तेषां पालकोऽस्मि।

सत्यव्रतः

(अभयमुद्रायां परिभ्रमन्) भो व्याध! त्वं पालको न, वनस्य हरिण- व्याघ्र-महिष-गजादीनां पालकः कः ? नरेषु, पक्षिषु, विविधजन्तुषु वनस्पतिषु च येन प्राणा भरितं ते त्वां तव परिवारञ्च पालयिष्यति।

> **येन चित्रीकृताः हंसाः येन चित्रीकृतं वनम्।**
> **चित्रीकृताः केकिनश्च स ते वृत्तिं विधास्यति॥**
> **येन त्वं चालितो व्याधो येनाहं चालितो मुनिः।**
> **येन सुरचितं विश्वं स ते वृत्तिं विधास्यति॥**

व्याधः

मम पालकः कोऽस्ति ऋषिवर ? नाहं पालकः ? तर्हि कः ?

सत्यव्रतः

> **एकं सद् विप्राः बहुधा वदन्ति, मित्रस्य चक्षुषा समीक्षन्तां सर्वाणि भूतानि।**
> **मा हिंस्याः। (वेदः)**

व्याधः

(नटति) आचार्य! मया पापमयं जीवनं यापितं, तर्हि अधुनैव त्यजामि। मामज्ञानिनं पापपुरुषं तपोमयं जीवनं देहि, ज्ञानं देहि।

(धनुः, खड्गं परशुञ्च त्यक्त्वा आचार्यस्य पादौ निपतति। प्रकाशो नृत्यति, वाद्यं गीतञ्च गुञ्जति पटाक्षेपश्च जायते)।

॥ इति पाराशर्यनवराजकट्टेलविरचितं 'सत्यव्रत' नामकं लघुनाटकम्॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बालशापः

पात्रपरिचयः

राजा	:	भरतवंशीयो राजा	सारथिः	:	राज्ञो रथवाहकः
शमीकः	:	शृङ्गिऋषेः पिता	शृङ्गी	:	शमीकऋषिपुत्रः
शृङ्गस्य मित्राणि	:	बैजवापः, रैभ्यः, वात्स्यः, यास्कः			

प्रथमं दृश्यम्

स्थानम् । कोशीनदीनिकटस्थ-शमीकऋषेराश्रमः, समयः मध्याह्नः ।

(यवनिकायाः पृष्ठभागे आखेटस्य ध्वनिश्श्रूयते । पृष्ठभागस्य प्रकाशो मन्दो जायते । अग्रभागे क्रमशः प्रकाशो द्योतते । रङ्गस्य पृष्ठभागे वनं, गिरयो हिमालयश्च विलोक्यन्ते । तत्र पर्णकुटी दृश्यते, तत्रैव ध्यानस्थो योगिराजश्च विलोक्यते । ऐकान्तिकं पवित्रं प्रकृतिसुशोभितं कलरवयुतं शान्तस्थानं दृष्ट्वा राजा रमते । आखेटश्रमेण पिपासितः सश्वेदः क्लान्तश्च राजा रङ्गं प्रविशति । राजोचितवस्त्रभूषायामस्ति । प्रकाशः सरति, वाद्यं गुञ्जति)

राजा

(साभिनयं नटति) ऋषिवर ! पिपासया भृशं पीडितोऽहम्, पातुं पानीयं देहि मे ऋषे !

सारथिः

(नटति) कीदृशोऽयं सुरम्य आश्रमः, कोऽयमृषिकल्पः, जानाति भवान् किम् ! वयमाखेटं कुर्वन्तः कुत्र समायाताः ।

राजा

किं वदसि सारथे ! मधुना माद्यसे *(विद्युत् द्योतते, मेघो गर्जति, कलरवश्श्रूयते)* यत् किञ्चिदपि भवतु अधुनाहं पिपासया पीडितः, अतो मया जलं याचितम् ।

सारथिः

(साभिनयं नटति) राजन् ! भवान् बालक इव प्रतिभाति, अयं तु गतप्राण इव दृश्यते । अनेन साकं का वार्ता विधेया ! भवान् किं याचते !

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राजा

(सक्रोधम्) जानासि किम् मूढ ! गृहस्यान्तःकोष्ठे सन्ति के जनाः । शृण्वन्ति किम् माम् । अस्य देशस्य भूपतिराखेटं कुर्वन् अस्मिन् तपोवने समागतः । बुभुक्षया पिपासया च भृशं पीडितो भूपतिर्जलं याचते परन्तु केऽपि जना नैव वदन्ति, कुत्र पलायिताः सर्वे । किं चेतना नष्टा ऋषिवरस्य ! *(सक्रोधं इतस्ततो भ्रमति)* ।

सारथिः

(साभिनयम्) क्षम्यतां क्षम्यतां भो भूपते ! इदमृषेः तपोवनम् । क्रोधं मा कुरु । अपयशो जायते, ऋषिः क्रुध्यति चेत् हानिश्च जायते । राज्ञा खलु रक्षणीयं तपोवनम् । राज्ञा रक्षणीयम् ऋषिकुलम् ।

राजा

(सोद्वेगम्) अहं खलु क्षुत्पिपासया पीडितः, जलं याचितवान् । अस्माकं शास्त्रं कथयति **'अतिथिदेवो भव'** इति परन्तु शास्त्रवचनस्य पालनात्र कथं न क्रियते !

सारथिः

(हस्तौ संयोज्य साभिनयम्) राजन्, ऋषिः समाधौ स्थित्वा परेब्रह्मणि लीन इव दृश्यते । न शरीररस्य न श्वासस्य च गतिर्दृश्यते । क्रोधेनास्माकं षट्शत्रवः अस्मान्नेव पराजयन्ते । क्रोधेन दैत्यवृत्तिर्विजयते । क्रोधो दैववृत्तिं पराजयते ।

राजा

(सोद्वेगम्) भो रथवाह ! ऋषेरपि कर्तव्यं भवति, ऋषिपत्न्याः वा परिवारस्य च कर्तव्यं भवति, परन्तु ते कर्तव्यस्य पालनां नैव कुर्वन्ति ! अतः ते दण्डनीयाः सन्ति !

सारथिः

(नटति) राजन् ! **क्रोधात् भवति सम्मोहः, सम्मोहात् स्मृतिविभ्रमः, स्मृतिभ्रंशाद् बुद्धिनाशः, बुद्धिनाशात् प्रणश्यति** इति श्रीकृष्ण उक्तवान् । अतो मा क्रुध्यतु ! क्षम्यतां, क्रोधोऽनर्थस्य कारणं भवति ।

राजा

(हुङ्कारं करोति, सक्रोधं परिभ्रमति) राज्ञोऽपरनाम दण्डधरः, ये जनाः स्वकीयस्य कर्तव्यस्य पालनां नैव कुर्वन्ति ते अवश्यमेव दण्डनीयाः । आस्माकमृषिप्रणीतस्य शास्त्रस्य अयमेव निर्देशः सारश्च ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सारथिः

(हस्तौ संयोज्य कोदण्डवद् नम्रीभूय) क्षम्यतां महाराज । क्षम्यतां ! कामक्रोधलोभ-मोहमदमात्सर्याः एकैकम् अपि पापस्य कारणं भवति । यत्र षट् शत्रवः सन्ति तत्र अनर्थो जायते ।

राजा

(सोद्वेगं इतस्ततो भ्रमति) एषः पर्णकुटीरको मम अवज्ञां करोति, ध्यानस्थ इव अभिनयं करोति, अस्य अहङ्कारं शमयामि *(इतस्ततो विलोकयति)*।

सारथिः

(शान्तस्वरेण हस्तौ संयोज्य साभिनयम्) गच्छाव। भो महाराज! एतादृशि विशालेऽरण्ये अन्यत्रापि जलं मिलति, फलं मिलति शीतलवायुश्च मिलति। मृगशावकनृत्यं मिलति, जलप्रपातो मिलति, गच्छाव !

राजा

(रौद्रमुद्रायामितस्ततः भ्रमति भूपः) अहं भूपालो नृपालो धर्मपालश्चास्मि । ये वर्णाश्रमधर्मं नैव पालयन्ति खलु ते दण्डनीयाः। ऋषिर्भूत्वापि **'अतिथिदेवो भव'** इति वेदवाक्यं नैव पालयति । अतोऽयं दण्डेन शिक्षणीयः ।

सारथिः

(हस्तौ संयोज्य निवेदयन्) भो महाराज ! भवते एतद् दुष्कार्यं नैव शोभते । भवान् पाण्डुवंशस्य कुलतिलकोऽस्ति, महावीरस्य धनुर्धरस्य अर्जुनस्य पौत्रः, अभिमन्योः आत्मजोऽसि । समाधौ लीनो मुनिवरो नैव दण्डनीय इति मम निवेदनमस्ति ।

राजा

(सरौद्रम्) एष ऋषिकल्पो मां दृष्ट्वा ध्यानाभिनयं करोति। ऋषिकापि आश्रमे नास्ति किम् ।

(गच्छतः, परन्तु राजा पुनः परावृत्य इतस्ततो विलोक्य मृतसर्पं दृष्ट्वा कोदण्डेकोणेन उत्थाप्य ऋषिस्कन्धे उरसि च मालाकारेण धारयति, हुङ्कृत्य गच्छति। विद्युद् द्योतते, मेघो गर्जति अनर्थम्, अनर्थमिति ध्वनिः गुञ्जति, रङ्गस्य प्रकाशः मन्दमन्दो भूत्वा तिमिरायते।)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वितीयं दृश्यम्

स्थानम् – कोशीनद्याः तटम् । समयः – मध्याह्नः ।

(पृष्ठभागे गिरिः, वनं नदी च विलोक्यते । ततः प्रविशन्ति शिशवः । बालाः इतस्ततः कौशिकीनद्यां क्रीडन्तः सन्ति, केचिन्नदीतीरे केचिच्च नद्यामेव सन्तीति सूच्यते । ते च सर्वे सधौता, सत्रिपुण्ड्राश्च)

बैजवापः

(सोत्फल्लम्) मित्र ! कुत्र धावन्नसि ! अहं तु इत एव, *(साभिनयम्)* अहं तु घर्माधिक्यात् जलक्रीडायै नद्यां समागतवान् । पानीयमपि पिबामि, जलविहारं च करोमि । अद्य समित्कुशादीनां व्यवस्था तु माता एव सम्पादयति । अहं तु स्वातन्त्र्येण विहरामि ।

शृङ्गी

(नटति) मम माता तु गृहे एव व्यस्ता भवति, गृहे तस्या बहूनि कार्याणि सन्ति । सापि कन्दमूलफलान्याहरणेऽरण्ये गतास्ति । अतोऽहं समित्कुशार्थं गच्छन्नस्मि । गृहे यज्ञसम्पादनाय शालवृक्षस्य समिधाम् आवश्यकता भवति, फलानि मिलन्ति चेत् तान्यप्याहरामि, कदाचित् शाकसञ्चयनमपि करोमि ।

बैजवापः

(सहास्यम्) समित्कुशं नयसि, जलं नयसि ! भारं वहसि ! हहह ! गोश्चारयसि ! भक्तमपि पाचयसि किम् ! भाण्डमपि मार्जयसि किम् ! हहह ! त्वं तु बालोऽपि वृद्ध इव आचरसि ।

शृङ्गी

(विहस्य) एषा एव आस्माकीनी परम्परा । ब्रह्मचारी स्वस्य कार्याणि स्वयमेव समाधत्ते । पितृकुलं सर्वं शिक्षयति स्वकीयान् पुत्रशिष्यान् । तस्य प्रयोगश्च कर्तव्यः । पितरौ एव अस्माकं प्रथमौ गुरू । अतः पितरौ यत् कथयन्ति तत् पालनीयं भवति । 'मातृदेवो भव । पितृदेवो भव' इति पितृचरणैरुपदिष्टाः वयम् ।

रैभ्यः

(परितो भ्रमित्वा) आचार्यदेवो भव इत्यप्यस्ति । आचारहीनं न पुनन्ति वेदाः इति वदन्ति पितरः ।

वात्स्यः

(हस्तमुत्थाय) अस्माकं पितृचरणाः सर्वदैव 'अर्थशुचिरन्नशुचिः, स्त्रीशुचिरवलम्बिनीयाः' इति कथयन्ति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बैजवापः

(इतस्ततो भ्रमन्, हस्ताभिनयेन) परन्तु वयं शिशवः स्म । अतोऽस्माकं खेलनस्य, कूर्दनस्य, हासपरिहासस्य वेलेयम् । शिशौ वयसि मनोरञ्जनपूर्वकं समयावगाहनं नैव क्रियते चेत् कदा बालजीवनस्य रसमाधुर्यमनुभूयते । नेपालखण्डस्य हैमवत्याः कौशिक्यास्तटे स्थित्वा कदाचित् समतलभूमौ स्थित्वा, कदाचिच्च गिरिगह्वरेषु, कदाचित् शिखरिशिखरेषु, वनराजिषु वा पर्यटनं कृत्वा बालजीवनं रसमयं विधातव्यम्। *(बैजवापः, शृङ्गी, रैभ्यः, वात्स्यः परस्परं खेलन्ति, हसन्ति, हासयन्ति च)* ।

शृङ्गी

(नटति) अस्माभिः खेलनमपि कर्तव्यम् । ममापि नान्यथा मतिः, परन्तु अस्माभिः पितृचराणानां वचनं ग्राह्यम् । तेऽस्माकं हितसाधनाय सर्वदैव कष्टकराणि कार्याणि कुर्वन्ति । ते हि अस्माकं प्रथमगुरवः । ते हसनाय शिक्षयन्ति, पादौ चालनाय शिक्षयन्ति, वर्णोच्चाणाय शिक्षयन्ति, शब्दान् उच्चार्य पाठयन्ति, विश्वं दर्शयन्ति, जीवनं दर्शयन्ति । अतस्ते वन्दनीया भवन्ति ।

यास्कः

(विहस्य) तत्तु सत्यमेव । युवां किं कुर्वन्तौ स्थः । मया श्रुतं युवां शिखरिशिखरेषु चरन्तौ स्थः इति । कथं अत्र समागतौ । त्वं तु हसन्नसि शृङ्गिन् ! त्वं तु समित् कुशार्थं समागतः, नद्यां कुतः ?

शृङ्गी

(सोद्वेगम्) किमु मया नैव हसितव्यम् ! किमु मया नैव नर्तितव्यम् ! किमु मया नैव गातव्यम् ! उपनिषद् कथयति **आनन्दात् खलु इमानि भूतानि जायन्ते** इति । अतः किल इयं सृष्टिः आह्लादिका । इयं सृष्टिः खलु महाकला इव प्रतिभाति । क्रीडन्नहमपीहागतवान् ।

यास्कः

भवता सत्यमुक्तम् । इयं सृष्टिः खलु इयं प्रकृतिश्चानन्दात्मिका । परन्तु कदाचित् इयमेव सृष्टिर्दुःखस्य कारणं जायते । जानासि किम् अत्र आगमनसमये एक आश्रमः मिलितः, तत्रैकः ऋषिः तपस्यन् आसीत् । तस्य उरसि एकः सरीसृपो माला इव अङ्कितः आसीत् ।

शृङ्गी

ततः किम् !

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यास्कः

स आश्रम तव एव भवेत् !

बैजवापः

तत्र वटपिप्पलयोः पीठिका विद्यते, तस्य समीपे एव एक आश्रमोऽस्ति, स एव मम मित्रस्याश्रमः ।

यास्कः

आम् ! आम् ! स एव आश्रमः । अहमन्ये भवतः एव पिता भवेत् ! एकः पुरुषः ततः एव बहिर्गच्छन्नासीत् । तेनैव दुष्कर्म कृतं भवेत् ।

शृङ्गी

(सोद्वेगम्) अवश्यमेव ममैव पिता । पितः ! केन पापिष्ठपुरुषेण दुष्कर्म विहितम् ! मम तातः स्वस्य पर्णकुट्यां स्थित्वा यज्ञादिकं सम्पाद्य सदैव ध्यानं करोति, समाधिमधिगच्छति । अकारणं तपस्विना ब्राह्मणेन सह शत्रुत्वमाचरितम् । अस्य परिणामो भयावह एव भवति ।

बैजवापः

अवश्यमेव स दण्डनीयो वर्तते ।

यास्कः

दण्डनीयः खलु । **शठे शाठ्यं समाचरेत्** इति वदन्ति पितरः ।

शृङ्गी

(सरोषम्) अयं खलु दण्डनीयः । भो ब्रह्मादिदेवाः शृण्वन्तु । भो इन्द्रादिदेवताः श्रृण्वन्तु । पितरः श्रृण्वन्तु ।

(पवित्रायाः कौशिक्याः जलं हस्ते समादाय) योऽद्य पर्णकुट्यां तपस्यन्तं ध्यानस्थं समाधौ लीनं मम पितरं अवमन्य विषधरस्य मालयाऽदण्डयत्, सनातनविरुद्धं कार्यमकरोत्, स सप्तदिनाभ्यन्तरे एव तक्षकदंशेन मरिष्यति *(इति जलमुत्सृजति त्रासदो ध्वनिर्वाद्यञ्च गर्जति)* ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तृतीयं दृश्यम्

स्थानम् - कोशीनिकटः शमीकस्याश्रमः । समयः - अपराह्नः ।

(शमीकः ब्रह्मचिन्तने लीनोऽस्ति । स शिरो हस्तौ च चालयति । रविकिरणा मन्दं पतन्ति । वायुर्वाति । घनवनं दृश्यते । कोकिलमत्तमयूरादीनां ध्वनिश्च श्रूयते । रोदन् शृङ्गी प्रविशति । विद्युत् चकास्ति, मेघो गर्जति, भीषणं वतावरणं सृज्यते, दैन्यसूचकं वाद्यं गुञ्जति सर्पमालया दण्डितः समीकऋषिर्दृश्यते । सर्पभीत्या शृङ्गी रौति । पुत्रस्य रोदनेन ध्यानभङ्गो ऋषिः शृङ्गिणं बोधयति)

शमीकः

(करयोः शिरसि स्पृशन्) आत्मज शृङ्गिन् ! किमर्थं रोदिषि । किं केन ताडितः ! किं व्याघ्रादिभिस्त्रस्तः । उत मार्गे पतितो वा व्यालेन दंशितः ।

शृङ्गी

(रुदन्) भवतो वक्षःस्थते पश्यतु पिता । एकेन प्रमत्तेन पुरुषेण भवतः उरसि व्यालस्य माला स्थापिता । स जिह्वां निःसारयति । भवतः शरीरे सर्पति । तस्मात् पन्नगात् बिभेम्यहम् । एषो जिह्मगो भवन्तं दङ्क्ष्यातीति भिया भीतोऽहम् ।

शमीकः

(क्षणं विरम्य किञ्चित् ध्यात्वा च) तनुज श्रृङ्गिन् ! भयं मा वह । एषो मृतः सरीसृपः दंष्टुं नैव प्रभवति । पुत्र ऋषिकुमार ! न प्रमत्तः पुरुषोऽस्माकं आश्रमे समागतवान् अपितु भूपालोऽभ्यागतः पिपासया चात्र विवेश ।

शृङ्गी

(किञ्चिद् भयेन) परन्तु पितः ! मया तु तपस्यन्तं ध्यानस्थं मम पितरं यो व्यालस्य मालया अदण्डयत् स यः कोऽपि भवेत् तमभद्रपुरुषं सप्तदिनाभ्यन्तरे एव तक्षको दंशतु इति गदन् कौशिक्याः जलविनियोगपूर्वकं शापो दत्तः ।

शमीकः

(विवर्णभावेन) पुत्र ! अनर्थो विहितस्त्वया । न कापुरुषोऽस्माकमाश्रमे समागतः, अस्माकमाश्रमे तु भरतवंशस्य पाण्डुकुलस्य युधिष्ठिरस्य पौत्रः, अभिमन्योरुत्तरायाश्च पुत्रः परीक्षितः समागतवानासीत् । स किल स्वागतवचनैर्वन्दनीय आसीत् । स धर्मस्य पालकोऽस्ति ।

शृङ्गी

स धर्मस्य पालक आसीत् अस्ति चेदेकान्ते घोरारण्ये ऋषिकुले समागत्य कथमपराधं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृतवान् पितः । तेन तु आश्रमस्य आश्रममर्यादायाश्च रक्षकेण भवितव्यमासीत् । परन्तु स राजधर्मस्य ऋषिकुलस्य च अपमानं कृतवान् ।

शमीकः

धर्मस्य तपः, सत्यं, पवित्रता दानञ्च चत्वारः पादाः सन्ति । कलिप्रभावेण त्रयः पादाः मलीनीकृताः । कलिदमनसमये तेन राज्ञा द्यूते, तमसि, स्वैरचारिण्यां, कनके च वासस्थानं दत्तम् । राज्ञः शिरसि कनकमुकुटत्वात् कलेर्वासो जातः, तेन तस्य मतिभ्रमोऽभवत् । *(क्षणं विरम्य)* सोऽधुना पश्चात्तापेन तप्तोऽस्ति ।

(समीको ध्यानदृष्ट्या विलोकयति । समीकर्षितः प्रकाशः सरति । दीपो मन्दो जायते । तत्र परीक्षितो राजा पश्चात्तापं कुर्वन् दृश्यते । राजा 'मया पाण्डुवंशस्य प्रतिष्ठा विनाशिता । धर्मस्य मर्यादा ध्वंसिता । ऋषिकुलस्यादर्शो नष्टः । अहं दण्डनीयः । प्रायिश्चत्तं करणीयम् ।' पट्टमहिषी भूपतिं 'चिन्तां मा कुरु देव । यद्भवति तद्भवति । सर्वं भाग्यस्याधीनमस्ति । परन्तु प्रायश्चित्ताय ऋषिवचनं ग्राह्यमिति' वदन्त्यस्ति । ऋषौ प्रकाशो द्योतते)

शृङ्गी

(नतशिरसा) तथात्वेऽपि अपराधस्तु तेन कृतो, दण्डश्च भोक्तव्यः ।

शमीकः

(करौ सञ्चाल्य) शिष्य गौरमुख ! भूपतेः परीक्षितस्य राजप्रासादं गत्वा एषा घटना खलु सूचनीयास्ति । स सामान्यरूपेण तिष्ठति, आकस्मिकरूपेण समागत्य तक्षकस्तं दङ्क्ष्यति । व्यालेन मारितस्याधोगतिर्भविष्यति । यदि सूचना स्यात्तर्हि चोत्तमं कर्म कर्तुं स प्रभवति । तक्षकं निवारयितुञ्च शक्नोति ।

गौरमुखः

(नतशिरसा नमन्) गच्छामि गुरुदेव । भवतः सन्देशहरत्वेन प्रव्रज्य सर्वं वस्तुजातं विनिवेदयामि । ततश्च सन्देशमाहरामि ।

शमीकः

(सान्त्वयन् मधुरेण स्वरेण) शृङ्गि ! तपः, तितिक्षेक्षा, शमो, दमः, ब्रह्मचर्यं, त्यागः, स्वाध्यायः, अक्रोधः, आर्जवम्, सन्तोषः, समदृक्, मौनम्, आत्मविमर्शनम्, प्राणिसेवनम्, सर्वभूतेषु आत्मबुद्ध्यावलोकनञ्च नृणां परमो धर्मो विराजते । पुत्र क्रोधे समागत्य ऋषिकुमारैः शापबुद्ध्या नैव भाव्यम् ।

अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।
दानं दमो दया शान्तिः सर्वेषां धर्मसाधनम् ॥ (या.१।१२२)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शृङ्गी

तत्तु समीचीनमेव परन्तु विनाकारणं तेनापराधस्तु कृतः । अतो दण्डनीयः ।

शमीकः

वयं ऋषयो धर्मशासकाः । अस्माकं विद्यायां तपसि च शक्तिरस्ति । अस्माकं वाण्यां सरस्वती निवसति । भूपतयः दण्डशासकाः । शामदानदण्डभेदनीत्या ते शासति । ते शतचक्षुषः । वयं अन्तश्चक्षुषः । ददद इति पालय पुत्र ।

इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न ।
यो अस्याध्यक्षः परमे व्योमन्त्सो अङ्ग वेद यदि वा न वेद ॥

(इति मन्त्रं वाद्यञ्च गुञ्जति । क्रमशः पटाक्षेपो जायते ।)

॥ इति पाराशर्य–नवराजकट्टेलविरचितं बालशाप–नाम नाटकम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बुद्धस्य त्यागः

पात्रपरिचयः

बुद्धः : शाक्यतनयो योगी अपरिग्रहः : चिन्तनशीलो गृहस्थी

परिग्रहः : धनलुब्धो व्यापारी

प्रथमं दृश्यम्

स्थानम् - तपोमार्गः। समयः - मध्याह्नः।

(सामान्यवस्त्रभूषायां द्वौ सखायौ गच्छन्तौ स्तः। परस्परं वार्तां कुर्वन्तौ जीवनं त्यागमयं वा भोगमयमिति विचारयन्तौ स्तः। एको वणिक् व्यापारस्य चिन्तया व्याकुलो दृश्यते। तौ सामान्यवस्त्राभूषायां दृश्येते)

अपरिग्रहः

(साश्चर्यम्) अयि ! भो ! सखे भवान् सदैव चिन्तातुरो दृश्यसे, भवतः पार्श्वे धनानि सन्ति, घनानि भवनानि सन्ति, भवतो गृहे सुवर्णानि पर्वतायन्ते, यानानि मार्गेषु परिधावन्ति, गोष्ठे पशवः सन्ति, दुग्धदधिघृतानां समुद्रः प्रवहति *(सोत्सुकं त्वरया गच्छन्, शान्तस्वरेण)* अतस्त्वं कथं परिखिन्नोऽसि।

परिग्रहः

(सदैन्यम्) भवान् मां धनिनं पश्यति, परन्तु अहमात्मानं दरिद्रं पश्यामि। कति धनानि सन्ति संसारे इति अहमपि न जानामि। परन्तु नाहं धनिकोऽस्मिन् संसारे।

अपरिग्रहः

(साभिनयम्) मनोहारिणी, आज्ञाकारिणी पत्नी अस्ति, स्वानुकुलाः पुत्राः सन्ति, नैके कर्मकराः आज्ञापालनाय तत्पराः सन्ति, सभायां, चत्वरे, वीथिषु, ग्रामेषु च बान्धवाः नम्रीभूय नमन्ति, अतः भवान् अन्यतमो मान्यवर इति मे मतिः।

परिग्रहः

(सखेदम्) मम कृते पुत्रस्य कृते, पौत्रस्य, प्रपौत्रस्य च कृते तु धनानि सञ्चितानि सन्ति। सप्तकुलपर्यन्तं न कापि चिन्ता मामधिरोहति।

अपरिग्रहः

(साश्चर्यम्) सप्तकुलपर्यन्तं धनस्य, खाद्यपेयस्य, अशनावसनस्य च चिन्ता नास्ति चेत् भवान् मुहुर्मुहुरपि व्याघ्रेण आक्रान्त इव कथं व्याकुलो भीतो दृश्यते ?

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परिग्रहः

(खिन्नमनसा) न हि सप्तकुलमात्रं अपि तु चतुर्दशकुलस्य कृतेऽपि अर्थव्यवस्था विहिता, तेषां कृते तु मम मनसि न कापि चिन्ता ।

अपरिग्रहः

(पुनश्च साश्चर्यम्) चतुर्दशकुलस्य कृते च व्यवस्था कृतास्ति चेत् किमर्थ खिद्यसे भो सामन्त ?

परिग्रहः

(सदैन्यम्) परन्तु मित्रम् मम वंशे एकविंशतितमे क्रमे ये सन्ततिरूपेण प्रपौत्रादयः भविष्यन्ति तेषां कृते मया कापि अर्थस्य व्यवस्था नैव विहिता, अत एवाहं चिन्तासिन्धौ निमग्नोऽस्मि । अर्थोपार्जनस्य नवीनोपायः क उपदेक्ष्यति माम् ? मम चिन्तां को दूरं करिष्यति ?

अपरिग्रहः

(मनसि क्षणं विचार्य, सकौतुकम्) मित्रम् ! मम मनसि एक उपायः समागतः । महारण्यस्य समीपे एको भिक्षुरस्ति स त्वामुपदेक्ष्यति, तव चिन्तां विनाशयति, तव जीवनम् उत्प्रेरयति, अतो गच्छामस्तमेव आश्रमम् ।

परिग्रहः

(क्षणं विचार्य) गच्छामः, परन्तु आश्रमे उपहारं विना गृहस्थः कथं गच्छति ?

(करतलध्वनिं विधाय) उपहारस्य कृते विविधानि फलानि समानयन्तु ।

द्वितीयं दृश्यम्

स्थानम् - बुद्धतपःस्थली । समय :- अपराह्नः ।

(घोषो दृश्यते, बुद्धोऽभयमुद्रायां ध्यानस्थो विलोक्यते स जटायुतः, पीतधौतवस्त्रावृतोऽस्ति । परितो वातावरणमपि शान्तं, सुन्दरं च दृश्यते । कोकिलः कूजति, मत्तमयूरो नृत्यति, गवां गोवत्सानां मृगाणां च ध्वनिर्गुञ्जति, मनसि 'हंहोऽत्यन्तमानन्दमनुभवामि आश्रमे' इति विचारयति ।)

परिग्रहः

(साभिनयं परितो विलोकयन् नमति) अये । भिक्षुवर ! अस्मिन् तपोवने समागत्य स्वं धन्यं मन्ये । कियत् सुन्दरं स्वच्छञ्चास्ति तपोवनम् ।

अपरिग्रहः

(नमति) प्रकृतिनटी आश्रमं समागत्य परिमार्जयति, मृगशावकाः नरीनृत्यन्ति, कोकिलाः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कूजन्ति, प्रकृतिः फलानि उपहरति, जलानि उपहरति, समेषां मनुष्याणां मनोहरति, एषा तपःस्थली, एषा मधुस्थली, एषा सिद्धस्थली, अतोऽत्र अनाहूतापि शान्तिः स्वतः समागच्छति।

परिग्रहः

(करतलध्वनिं वादयति) उपहारफलानि आनयन्तु ।

(भारवाहाः क्रमशः समागत्य उपहारपात्राणि बुद्धस्याग्रे स्थापयन्ति ।)

बुद्धः

(सस्मितम्) किमर्थं इमानि फलानि, फलपूरितपात्राणि । किमर्थं केन आनीतानि ?

परिग्रहः

(साभिनयम्) भो भिक्षुवर ! इमानि फलानि मया उपहृतानि भवतः कृते। भवान् भिक्षुरस्ति, वयं गृहस्थाः । गृहस्था उपहारं विना कथं आश्रमे समागच्छेयुः ? भवान् भिक्षुरस्ति अतः फलसञ्चयने, भिक्षासञ्चयने वा गम्यते चेत् धारणा, ध्यानं, समाधिश्च कथं लगति ? अतो भवतः तपोध्यनसमाधिनां निरन्तरतायै चेमानि फलानि मयोपहृतानि सन्ति भगवन् !

बुद्धः

(सस्मितम्) नैतत् सत्यं, फलेन दुःखनिवृत्तिर्नैव जायते । भोगवृत्तिरेव दुःखस्य कारणम् । अविद्यायाः कारणात् दुःखेषु सुखस्य, सुखेषु दुःखस्य विपर्ययज्ञानं भवति । अज्ञानिनः यदस्ति सत् तत्र नैराश्यं, यन्नास्ति तत्र आशक्तिभावं च साधयन्ति । अतः महामोहान्धकारे निपतन्ति, दुःखञ्चानुभवन्ति ।

अपरिग्रहः

(सविनोदम्) वयं तु गृहस्थाः एव मुनिवर ! अतो वयं कामक्रोध-लोभादिवह्निना ज्वलिता रागवृत्त्या भक्षिता भवसागरे निमग्नाः, जन्ममरणचक्रे भ्रान्ता नराः स्मः ।

बुद्धः

(स्मितेन वचसा) भो अभ्यागताः । प्रकृतिः समानमेव व्यवहरति – समेषां कृते समाना भूमिः, समानो वायुः, समानं जलं, समानः सूर्यः, समान आकाशः परन्तु ज्ञानवृत्तिरेव असमाना । सञ्चिता वासनावृत्तिः पृथक्कल्पयति नरान्, सञ्चितकर्मफलं पृथक्मार्गे नयति च ।

अपरिग्रहः

(सविनयम्) भो यतिराट् ! मिथ्याज्ञानमेवास्माकं समस्या, मिथ्यार्जने एवास्माकं जीवनं गच्छति ।

परिग्रहः

(साभिनयम्) भो तपस्विन् ! एषा तपःस्थली, आश्रमे स्थितोऽसि, अतः सहायृयं भवति, इमानि फलरत्नानि गृह्यताम् । (करतलध्वनिना बुद्धसमीपौ फलानि सारयितुं सङ्केतयति)

बुद्धः

(सशान्तस्वरेण) मा निधेहि फलानि अत्र, मत्कृते फलानाम् आवश्यकता नास्ति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परिग्रहः

(साभिनयम्) भोजनस्य कृते, इमानि स्वादुफलानि उपयोगे समागच्छन्ति यतिवर !

बुद्धः

(सशान्तम्) सामन्त ! अद्य भोजनं विहितम्, अत एतेषां फलानामावश्यकता नास्ति।

परिग्रहः

(साश्चर्यम्) यतिवर ! श्वदिनस्य कृते भोजनाय इमानि स्वादुनि फलानि भविष्यन्ति, स्थापयतु भाण्डागारे।

बुद्धः

(सस्मितम्) अत्र आश्रमे तु भाण्डागारमेव नास्ति। श्वदिनस्य कृते श्व एव व्यवस्था भविता, अद्य किमर्थं चिन्ता विधेया ! सङ्ग्रह एव विग्रहस्य कारणम्।

परिग्रहः

(सोत्सुकम्) वयं गृहस्था वस्तुसञ्चयनं विना जीवितुम् एव न शक्नुमः। वस्तुग्रहणमेव गृहम्। ग्रहणं विना कथं गृहं भवति भो !

बुद्धः

(सस्मितम्) एतत् तु गृहं नास्ति, एतत् तपोवनं विद्यते गृहस्थ ? अतोऽत्र वस्तुसञ्चयनं न भवति। किं मृगाः, सिंहादयः वस्तुसञ्चयं कुर्वन्ति ? किं पक्षिणः वस्तुसञ्चयं कुर्वन्ति ! न कुर्वन्ति। परन्तु ते कतिपया जीवजन्तवः पारेशतं जीवन्ति। वानरा अपि फलस्य सञ्चयं नैव कुर्वन्ति, स्वोदरं पूरयित्वा गच्छन्ति यथासुखम्। जलजन्तवोऽपि वस्तुसञ्चयं नैव कुर्वन्ति। तेऽपि पारेशतं जीवन्ति।

परिग्रहः

(साश्चर्यम्) तत्तु सत्यम्, परन्तु ते तु स्थावरजलजन्तवः, खेचरचराः, अविवेकिनः, मानवास्तु चैतन्यशालिनः, ते अनेकभावविचारान् प्रकटयन्ति, अतस्तेषां व्यवहारोऽपि पृथक्।

बुद्धः

(सस्मितम्) जन्तवः अविवेकिनः, अतः ते सत्यपूतं व्यवहारं कुर्वन्ति, परन्तु विवेकिनो मानवा पाशविकं व्यवहारं कुर्वन्ति। अतस्ते हेया भवन्ति।

परिग्रहः

(साश्चर्यम्) सङ्ग्रहस्तु मानवस्वभाव एव सङ्ग्रहो न स्यात्, परिवारोऽपि न स्यात्, सङ्ग्रहो न स्यात् समाजोऽपि न स्यात्।

बुद्धः

(साभिनयम्) यावत् जठरं भ्रियेत तावदेव मनुष्याणां वस्तुसङ्ग्रहः समुचितः। यावत्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जठरं भ्रियेत तावदेवस्वत्वम् अधिकारो वा भवति । अतः अद्य दिनस्य कृते मम उदरपूरणं जातम्, अतः अपसारयतु इमानि फलानि ।

परिग्रहः

(सोद्वेगम्) भो स्वामिन् स्वस्तनदिनस्य कृते, परश्वदिनस्य कृते अपरपरश्वदिनस्य कृते च इमानि फलानि भवन्तु स्वोदरपूरणाय, अतः स्थापयन्तु इमानि फलानि ।

बुद्धः

(मुदितमनसा) श्वस्तनाय दिनस्य कृते, श्वो दिने एव, परश्वो दिनस्य कृते, तदुत्तरदिनस्य कृते तदैव व्यवस्था भविष्यति ।

परिग्रहः

अहं तु पुत्रपौत्रादीनां एकविंशत्याः कुलानां कृते धनसञ्चयं कुर्वन्नस्मि, भवान् श्वो दिनस्य कृते श्वो दिन एव व्यवस्था भविष्यतीति वदन्नस्ति । पुत्रपौत्रादीनां धनसञ्चयमसत्यं वदति भवान् । किं सत्यं किमसत्यम् ? अहन्तु मोहान्धकारे निमग्नः *(दुःखी भूत्वा भूमौ निपतति)* ।

बुद्धः

(शान्तम्) सङ्ग्रहः एव विग्रहस्य कारणम्, सङ्ग्रह एव दुःखस्य कारणं भवति । अतः पुत्रैषणां, वित्तैषणां, जायैषणां च परित्यज्य अष्टाङ्गमार्गस्याभ्यासं कृत्वा निर्वाणसुखं लभस्व । सर्वोत्तममानन्दं लभस्व ।

(तौ बद्धपद्मासने स्थित्वा बुद्धं पश्यतः, बुद्धोऽपि अभयमुद्रायां तौ विलोकयति । शान्तिगीतं श्रूयते, बुद्धं शरणं गच्छामि, धम्मं शरणं गच्छामि, सङ्घं शरणं गच्छामि इत्यादिः । पटाक्षेपश्च जायते) ।

॥ इति पाराशर्य-नवराजकट्टेलविरचितं बुद्धस्य त्याग-नाम नाटकम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वितीयः खण्डः

ऐतिहासिककथाश्रितानि रूपकाणि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेपालविजयम्

पात्रपरिचयः

पृथ्वी :	: पृथ्वीनारायणशाहः	वंशराजः	: सैन्यनायकः
बलाध्यक्षः	: सेनानायकः	दूतः	: सैन्यदूतः
श्रीहर्षः	: अन्यः सैन्यनायकः	बंशु	: बंशुराजगुरुङ
अपरः सैन्यनायक	: अन्यः सैन्यनायकः	वीरभद्रः	: अपरः सैन्यनायकः
सैनिकः	: सैनिकः	गुप्तचरः	: गुप्तचरः

मङ्गलाचरणम्

नेपालेऽस्मिन् प्रकृतिरचना शोभते दिव्यरूपा
गौरी शर्वो भ्रमति शिखरे देवभूमौ निशायाम् ।
नद्या नादोऽभिलषति सदा कर्णरन्ध्रे स्वकीये
रम्या कार्या सुरमुनियुता वेदभूमिर्विशाला ॥
खण्डं खण्डं न भवतु सदा चैकतायां रमन्तां
नैपालीया नरपतियुताः शक्तियुक्ता भवेयुः ।
गौराङ्गानां न चलतु सदाऽऽदेशजातञ्च कार्यम्
इत्थं चोक्त्वा नरपतिरहो गर्जति ह्युच्चशैले ॥

(नाद्यन्ते सूत्रधारः)

सूत्रधारः

आर्ये । किं कुर्वाणासि ? प्रजातन्त्रदिवसस्योपलक्षे इतिहासविज्ञाः, विद्वांसो नेतारो मन्त्रिणश्च प्रेक्षालये समुपस्थिताः सन्ति । नेपालस्यैकीकरणं कैः कैर्दुःसाध्यप्रयत्नैरभवदिति प्रकाशनाय तेषां मनोरञ्जनाय च संस्कृतस्य नाटकं प्रदर्शयाम । नेपथ्यविधानं सम्पादितञ्चेदिहागम्यताम् ।

नटी

आर्यपुत्र ! आगतास्मि, *(प्रविश्य)* मया किमनुष्ठेयमिति निर्गदतु भवान् ।

सूत्रधारः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेपालराष्ट्रं पञ्चसहस्रवर्षपूर्वं ऋषीणां तपोभूमिरूपेण स्थापितमासीत् । अस्यां हैमवत्यां धरायामनेकैर्भूपालै राज्यं विहितम् । कदा इदं राज्यं विशालं कदा सङ्कुचितं खण्डं खण्डं च जातम् । पञ्चश्रीको महाराजाधिराजः पृथ्वीनारायणशाहः पञ्चाशदधिकानां राज्यानामेकीकरणं कृत्वा विशालं सशक्तराष्ट्रं निर्मातुं समैच्छत् ।

नटी

(नटति) आर्यपुत्र ! ततस्ततः किम् ? तेन कार्येण किमजायत ?

सूत्रधारः

(परिभ्रमन्) एकताभियानस्य ध्वंसनाय गौराङ्गसेना नेपालं समागच्छत् । नेपालस्य संरक्षणाय तदा राजा पृथ्वीनारायणशाहो वंशुराजगुरुङ्गं, वीरभद्रं, वंशराजपाण्डेवरञ्च तत्र सिन्धुलीगढी दुर्गं गन्तुं समादिशत् । तत्र नेपालिगौराङ्गसेनयोर्महासमरमजायत । तान् गौराङ्गभटान् विजित्य नेपालस्य रक्षा विहिता, नेपालिनां वीरत्वेन, राज्ञः कूटनीत्या च विशालभूमिर्नेपाले समाविष्टा च ।

नटी

ततस्ततः किम् ?

सूत्रधारः

महता प्रयत्नेन विरचितं राष्ट्रं यत्नेनैव संरक्षणीयमिति प्रदर्शनाय नेपालस्यैकीकरणस्य कथामवलम्ब्य गोरखाजनपदस्य कट्टेलग्रामाभिजनेन काष्ठमण्डपनिवासिना संस्कृतानुरागिणा श्रीनवराजकट्टेलनामकेन रचनाकारेण रचितं नेपालविजयम् इति नाटकं प्रदर्शयाम !

नटी

(नटति) आर्यपुत्र ! यद् भवानाज्ञापयति, तत् सम्पादयामि ।

सूत्रधारः

आर्ये । अत्र इतिहासविज्ञाः, विद्वांसो नेतारो मन्त्रिणश्च संस्कृतमयो नेपालो भवतु इति वाञ्छन्ति । एतेषां विदुषां परितोषाय मनोरञ्जनाय च नेपालमहत्त्वप्रदर्शकं गीतं गीयताम् ।

नटी

बाढम्, बाढम् आर्यपुत्र ! कियन्तं शोभते राष्ट्रमेतत् *(गायति)*

अनेकरङ्गैः कुसुमैश्चकास्ति, लालीगुराँसैर्गिरिकाननैश्च ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुकृष्णसारैः सुपिकैर्मयूरैः, डाँफेमुनालैर्हिमशृङ्खलाभिः ॥

अनेकजातिश्च ह्यनेकविद्या, ह्यनेकभाषा निजसंस्कृतिश्च ।
अनेकभूषावसनैश्च युक्ता धरा हिमाह्वा नितरां मदीया ॥

सदा सुशान्तश्च सदा स्वतन्त्रः सनातनो धर्मपरायणश्च ।
मनुष्यप्रेमैर्ननु शोभितोऽयं सदा प्रफुल्लो मम देश एषः ॥

सूत्रधारः

आर्ये ! सुन्दरं गीतं प्रस्तुतम् । सभासदां भावनात्र प्रतिबिम्बिता भवेत् ।

नटी

(क्षणं विरम्य) आः ! विदुषां नेतृणां मन्त्रिणाञ्च प्रयासेन नेपालराष्ट्रं पल्लवितं, पुष्पितं, सम्फलितञ्च भवति, भविष्यति चेति आशास्महे ।

सूत्रधारः

(इतस्ततः परिभ्रमन् गायति)

सदा नदीनां मृदुमुग्धगानैः, सदा खगानां मधुरैश्च तानैः ।
नृत्यैश्च नित्यं मृगशावकैश्च, सदा प्रफुल्लो मम देश एषः ॥

(इति निष्क्रान्तौ)

इति प्रस्तावना

प्रथमं दृश्यम्

स्थानम् - नवकूटराजप्रासादः । समयः - अपराह्नः ।

(यवनिकायाः पृष्ठभागे युद्धवाद्यं श्रूयते । पृष्ठभागस्य प्रकाशो मन्दो जायते । अग्रभागे क्रमशः प्रकाशो द्योतते । तत्र राजा पृथ्वीनारायणः, काजीपदीयः (पृतनापतिः) वंशराजपाण्डे, सैन्यप्रमुखाश्च प्रकाशभागे दृश्यन्ते, कदाचन लुप्यन्ते च । तत्रैव गौराङ्गैः साकं कथं योद्धव्यं, कथं सन्धिर्विधेयो, युद्धनीतिः, सुरक्षानीतिः, आक्रमणनीतिश्च कीदृशी भवेदिति विषये परस्परं विमृशन्ति ।)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पृथ्वी *(साभिनयम्)*

शृण्वन्तु मन्त्रिणः सर्वे नूत्ना भीतिः समागता ।
गौराङ्गसैनिका योद्धुमागताः सिन्धुलीमिह ।
नूत्नैः प्रविधिभिर्युक्ता गोलास्त्रैश्च सुसज्जिता ।
युद्धविज्ञैर्भटैः साकं 'किनूलक्' गौराङ्गनायकः ।
अस्मान् हन्तुं समायातः स बेलायतदेशजः ॥

वंशराजः *(ससैन्यवस्त्रं, नटति)*

केनाऽऽहूताश्च ते ह्यत्र गिरिराज्ये मनोहरे ।
अस्माकं नास्ति वैरत्वं गौराङ्गैः सह सैनिकैः !

पृथ्वी *(परिभ्रम्य)*

जयप्रकाशप्राहूताः सहयोगाय सैनिकाः ।
गौराङ्गस्याऽऽगता हृष्टाः सन्दर्श्य प्रतिबद्धताम् ॥
जयप्रकाशपत्रेण व्यक्तास्ते स्वार्थसाधकाः ।
किनूलकस्य च नेतृत्वे पाटलिपुत्रमागताः ॥
बेतियास्थितदूताय गोल्डिङ्गाय च धीमते ।
केप्चिनधर्मगुरुणा रामानन्दकरे तथा ॥
भक्तानन्दस्य हस्ते च पत्रं जयेन प्रेषितम् ।
पाटलिपुत्रस्थिताय टम्स्रम्बोल्डाय धीमते ॥
तत् पत्रं प्रेषितं ततः कलकत्तास्थिताय च ।
राज्याध्यक्षाय मुख्याय बेरेलिस्टाय धीमते ॥

वंशराजः *(उर्ध्वबाहुं कृत्वा)*

विना पत्रादिकं ह्यत्र सेनाः सम्प्रेषिताः कथम् !
संवादरहितं युद्धं न दृष्टं न श्रुतं मया !
किं तैः सम्बोधितोऽस्माकं गोरक्षभूपतिः क्वचित्
पत्रेण खलु दूतेन सम्पर्को ननु स्थापितः ?

पृथ्वी *(सखड्गं परिभ्रम्य)*

पत्रं सम्प्रेषितं मह्यं त्याज्यं च सीमबन्धनम्
जयप्रकाशेन साकं योद्धव्यं न कदाचन ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तेषां निर्देशनं ह्यत्र यद्यस्माभिर्न पाल्यते ।
अनभीष्टं समायाति गौरङ्गा न मृशन्ति च ॥
विश्वविजयिनी सेना चास्मानाक्रम्य सर्वतः ।
जयप्रकाशमित्रस्य राज्यं रक्षति सा खलु ॥

वंशराजः *(करौ संयोज्य)*

किमुपायं समाविश्य गोरखापक्षतः खलु ।
कूटनीत्या च वाण्या वै तेऽत्र ह्युत्तरिताः किमु !

पृथ्वी *(नटति)*

नेपालरचनायां च संलग्नाः पूर्ववद्यथा ।
सम्मानं भवतां कुर्मो मित्रेण मित्रवद्यथा ॥
वहामः प्रतिवेशित्वं भाव्यं मित्रेण वै त्वया ।
मिथः सौहार्दभावेन सम्मृद्धिः सम्भविष्यति ॥
अहं मेलितुमिञ्छामि तव देशेऽथवा मम ।
सुरक्षाया व्यवस्थाञ्च करोतु वा करोम्यहम् ॥'
विनोत्तरञ्च पत्रस्य युद्धस्य निर्णयः कृतः ।
अवमत्य खलु ह्यस्मान् तैश्च निर्देशनं कृतम् ॥

वंशराजः *(सरौद्रम्)*

न क्षन्तव्यं महाराज । तेषां तद्धेलनं क्वचित् ।
पृथ्वीनरपतिर्यस्य देशसिंहासने स्थितः ॥
नमन्ति यत्र राजानो भयाज्जीवन्ति यस्य च ।
तं तिरस्कृत्य गर्जन्ति । सिंहस्याग्रे मृगा इव ॥

बलाध्यक्षः

अस्माकं सैनिकाः सन्ति बहुक्षेत्रेषु विस्तृताः ।
गमिष्यन्ति कथं तत्र ते ये सन्ति इतस्ततः ॥
अस्माकं सैनिकास्सन्ति वीरा धीरास्समर्पिताः ।
नेपालजननीं नत्वा न बिभ्यति कदाचन ॥
विश्वजेतापि नेपाले चाक्रामेत् स्वभटैर्यदा ।
वध्यन्ते तत्र हन्यन्ते सन्त्रास्यन्ते मुर्हुमुहुः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पृथ्वी

गणस्य नायकाः सर्वे कथयन्तु स्वधारणाम् ।
रणनीतिश्च कास्माकं हन्तव्यास्ते कथं रणे ?
सिन्धुलीगढितस्ते च व्रजन्तस्सन्ति सुश्रुम ।
गौराङ्गनायकास्तत्र भान्ति नेतृत्वदायिनः ॥
तेषां शक्तिश्च मातव्या रणस्य कौशलं तथा ।
द्रष्टव्यं मननीयञ्च ज्ञातव्या च रणार्हता ॥
अस्माकं सैनिकाश्चाल्यास्तेषां संख्यासमाऽखिला ।
वीरा धीरास्तथा ते स्युर्मरणे मारणे तथा ॥
तेषां पराजयः स्याद्वा जयेद् गोर्खा सुनिश्चयम् ।
शस्त्राणि सैनिकेभ्यो हि दातव्यान्युचितानि च ॥
प्राशस्त्यं खाद्यपेयस्य कुर्वन्तु सद्व्यवस्थितिम् ।
कृत्वा 'आइकटकं' वै न 'जाइकटकं' चरेत् ॥
(प्रहरामो न पूर्वं वै प्रहारे त्यजनं न च ।)

दूतः *(साभिनयम्)*

व्रजन्तः सन्ति ते शीघ्रं राजन् ! गौराङ्गसैनिकाः ।
दरभङ्गास्थलाद् यात्रा श्रुता पश्चिमदिङ्मुखा ॥
भविष्यति, हि धावन्तो नित्यं ये चतुरङ्गिणः ।
समायाष्यन्ति शीघ्रं ते ह्यस्मान् हन्तुं विनाशितुम् ॥

पृथ्वी *(परिभ्रम्य खड्गं प्रचाल्य)*

जानासि मम किं दूत ! तेषां संख्याऽस्ति भो कति ?
अस्त्राणि कति दृश्यन्ते शस्त्राणि कतिधा पुनः ।
कथं युद्धकला तेषां वीरत्वस्य च का स्थितिः ?
के के सन्ति च नेतारः सेनानां पृतनापतिः ?
कोऽस्ति ! के सन्ति योद्धारः तेषां च कास्ति योजना ?
किं लक्ष्योद्देश्यभेद्यानि का नीती रणजा भवेत् ?
समभूमौ रणकला कथं स्यात् ? विषमक्षितौ ।
शिखरे कैश्च युध्येरन् ? रणनीतिश्च का भवेत् ?

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सर्वं ज्ञात्वा समागत्य सूचयन्तु मुहुर्मुहुः ।
भविष्यामि च तत्रैव युस्माकं निकषा सदा ।

श्रीहर्षः *(परिभ्रम्य हस्तौ संयोज्य)*

मार्गस्य सुखबोधाय कृष्णवर्णाश्च सैनिकाः ।
पुरतः पृष्टभागे च दृश्यन्ते चेति सूचना ॥
गतिर्नास्ति गतिर्नास्ति तेषां मार्गे च पर्वते ।
कुशलाः सन्ति ह्यस्माकं सेनाः पर्वतमस्तके ॥
अरण्ये च दुरारोहे नदीमार्गे च कौटिले ।
कुत्रचिद् वानरा भान्ति सिंहवत् सन्ति कुत्रचित् ॥
श्येनस्येव गतिस्तेषां व्याघ्रस्येव विदारणम् ।
सर्पस्येव च निःश्वासः तीव्रगत्या च दंशनम् ॥
अस्माकं सैन्यवैशिष्ट्यं वीरत्वं वीरदर्शनम् ।
गर्जन्ति, घ्नन्ति धावन्ति, दहन्ति शत्रुसैनिकान् ॥

पृथ्वी *(साभिनयं सरौद्रम्)*

गच्छ दूत ! तराइस्थे मार्गे, ग्रामे पुरे तथा ।
मूलमार्गे न तिष्ठन्तु दूरे गच्छन्तु वै प्रजाः ॥
युवत्यश्च युवानश्च ते हरन्ति रणाय च ।
भोगाय ननु दासाय वाहनाय च मृत्यवे ॥
गौराङ्गाश्च हरिष्यन्ति बलान्नयन्ति मानवान् ।
अन्नानि च हरिष्यन्ति क्रेतुं वाञ्छन्ति वैरिणः ॥
न दातव्यानि चान्नानि शत्रुभ्यो वै कदाचन ।
बालाः वृद्धाश्च तिष्ठन्तु मूलमार्गे च केवलम् ॥
भवेन्निर्जनवत् पौरः मातु निर्धनवत्तथा ।
अजान् गाश्च महिषाँश्च नयन्तु दूरतः प्रजाः ॥
न हरेयुः पशून् तेऽद्य मांसभक्षणकर्मणि ।
तराईवर्तीजनतायै सूच्या सूचना किल ॥

दूतः *(सोद्वेगम्)*

करिष्यामि महाराज ! भवद्वचनपालनम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चराः सन्ति नियुक्ताश्च ग्रामे ग्रामे जने जने ॥
वृत्या विविधया तत्र नटाः सन्ति च नाट्यवत् ।
सूचनायाश्च सञ्जालो निर्मितश्च फलप्रदः ॥

पृथ्वी *(सोद्वेगम्)*

सम्यक् त्वया कृतो दूत ! राष्ट्रनिर्माणहेतवे ।
देवस्थलस्य रक्षायै यत् कर्तव्यञ्च तत् कुरु ॥
नेपालजननीं नत्वा देवसिद्धतपःस्थलीम् ।
आर्षस्थलीं सदा नत्वा दुर्गाभैरवसुस्थलीम् ॥
शालग्रामक्षितिं नत्वा तपःस्थलीं शिवस्थलीम् ।
दृढराष्ट्रं रचयामः सर्वेषां खलु केतनम् ॥
उद्यानमेतत् सर्वेषां वर्णानां जातीनां तथा ।
आश्रयस्य स्थली भूयादनन्तहायने ध्रुवम् ॥

दूतः

अहं गच्छामि तत्रैव ये सन्ति शत्रुसैनिकाः ।
तेषां गतिश्च द्रष्टव्या ज्ञेया समरनीतिका ॥
ब्राह्मणैर्यतिभिः साकं भारवाहैः चरैस्तथा ।
भ्रामं भ्रामं च द्रष्टव्यं ह्यभिनेयं च दुष्करम् ॥
तेषां वृत्तिञ्च ज्ञास्यामि सैन्यशक्तिं मिमे तथा ।
तुल्यातुल्यं च ज्ञास्यामि शस्त्राणि रणकौशलम् ॥
सूचनामत्र दास्यामि सुरक्षोपायं संस्थितिम् ।
कथं जयो भवेत् शीघ्रं नेपालस्य शुभं भवेत् ॥

(दूतो भूपतिं बलाध्यक्षान् च नत्वा निर्गच्छति, वाद्यादिध्वनिश्च गुञ्जति)

वंशराजः *(सविनयम्)*

आज्ञा किमस्ति हे राजन् ! जित्वाहं तु समागतः ।
लमजुङ्गादिकं राज्यं गोरखावशगं कृतम् ॥
अन्यानि बहुराज्यानि गोरक्षपदयोः खलु ।
कृतानि मम नेतृत्वेऽहमस्मि राजसेवकः ॥
किं कर्तव्यं मया राजन् ! गौराङ्गैश्च भटैः सह ।
निर्देशनं दिशन्तु हेऽहमस्मि राष्ट्रसेवकः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पृथ्वी *(गाम्भीर्येण)*

शृणु हे वंशराज ! त्वं रणस्य योजनां कुरु ।
विश्वासस्य युतं पात्रं त्वमसि पृतनापतिः ॥
समभूमौ न योद्धव्यं योद्धव्यं विषमक्षितौ ।
मिथिलापत्तने चैव न रोद्धव्यं कदा भटान् ॥
तेषां सेना समागच्छेत् पौवागढीति दुःस्थले
योद्धव्यं खलु तत्रैव तथात्वे विजयो भवेत् ॥

वंशराजः *(सविनयम्)*

सर्वं करोमि हे राजन् ! नेपालहितसिद्धये ।
करोमि च महायुद्धं गौराङ्गानां च मृत्यवे ॥
शवानां पर्वतं कृत्वा गोरखाकीर्तिवर्द्धनम् ।
करिष्यामि महाराज ! जीव्यात् नेपालगौरवम् ॥

पृथ्वी *(सोद्वेगम्)*

गर्जन्तु मेघनादेन सिंहनादैर्मुहुर्मुहुः ।
वर्षन्तु च शिला भूत्वा दंशन्तु च भुजङ्गवत् ॥
कालिका तत्र चायाति भैरवश्च स नृत्यति ।
सा मनःकामनायाति गोरक्षनाथकस्तथा ॥
देवगणाश्च तत्रैव रणभूमौ भवन्ति ते ।
तत्रैवाहं भविष्यामि निर्दिशामि च सैनिकान् ॥
परित्यज्य भयं तत्र गच्छन्तु मम सैनिकाः
हृदये त्यज्यते भीतिश्चेत् त्रिलोकजयो भवेत् ॥
नित्यं गच्छन्तु धावन्तु गर्जन्तु भीषणे रणे ।
वादयन्तु रणे वाद्यं युध्यन्तां रणकौशलैः ॥

वंशराजः *(सोद्वेगम्)*

युद्धस्थलञ्च गच्छामि सहस्रमितसैनिकैः ।
सूर्यचन्द्राङ्कितध्वजो नेपालः स्यात् प्रकाशितः ॥
गोरक्षभूपतिर्दीव्यात् नेपालरणकौशलम् ।
नेपालकीर्तिः प्रसरेत् दीव्यात् नेपालसौरभम् ॥

(वंशराजो राजानं नत्वा निर्गच्छति, विविधध्वनिः श्रूयते)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पृथ्वी (*सगम्भीरं वदति, धरां साष्टाङ्गैर्नमति च*)

नेपालजननीं दिव्यां नमामि सप्तगण्डकीम् ।
गोरक्षं कालिकां वन्दे नेपालिवीरपूर्वजान् ॥
एतस्मिन् हिमवत्खण्डे भवेद् राष्ट्रं महाबलम् ।
सुदृढा स्याद् वैजयन्ती नेपालहितसिद्धये ॥
अनेकानेकराजानो युध्यन्तः सन्ति वै मिथः ।
जनतायाः कृते नास्ति परं ते स्वार्थसिद्धये ॥
पुष्पवाटमतोऽहं वै रचयामि मनोरमम् ।
सर्वेषाञ्चैव वर्णानां जातीनाञ्च सुखप्रदम् ॥
नो चेद् दुखस्य निवृतिर्नास्ति नैव सुखोदयम् ।
गौराङ्गताडनं प्राप्य कथं जीवन्ति मे प्रजाः ॥
(नेपालजननीं नत्वा निर्गच्छति, विविधवाद्यध्वनिः श्रूयते)

द्वितीयं दृश्यम्

स्थानम् – सिन्धुलीदुर्गस्य शैलशिविरम् । समयः – अपराह्नः ।

(*यवनिकायाः पृष्ठभागे युद्धवाद्यं श्रूयते । जहि, जहि । घातय घातय । प्रहर, प्रहर । इत आयान्ति चेत् अवरोधय । इतोऽपि ततोऽपि उत्प्लुत्य गन्तव्यमिति श्रूयते । पृष्ठभागस्य प्रकाशो मन्दो जायते । अग्रभागे क्रमशः प्रकाशो द्योतते । तत्र सैन्यसमूहो प्रकाशभागे दृश्यते, कदा लुप्यते च, तत्रैव सैन्यनायका दृश्यन्ते । युद्धनीतिः, सुरक्षानीतिः, आक्रमणनीतिश्च कथं भवेदिति विषये परस्परं विमृशन्ति । ऐकान्तिके सिन्धुलिशिखरे प्रकृतिसुशोभितं कलरवयुतं व्याघ्रभल्लूकादि-नादनादितं निर्झरझर्झरझर्झरायितं मनोरमस्थानं दृष्ट्वा सैन्यनायकानां भटानाञ्च मनोबलं प्रवर्धते ।)*

बंशुः (*नटति*)

वीरभद्र ! वद त्वं हे स्वल्पा चमूर्विराजते ।
अस्माकमित्यहं मन्ये वैरिणां महती चमूः ॥
आगच्छन्तीति गौरङ्गाःश्रूयतेऽस्त्रसुसज्जिताः ।
कथं तैस्सह योद्धव्यं विधिमत्र विचारय ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पञ्चशत्या भटैश्चैवं कथं युद्धं विजेष्यते !
मनो मे कम्पते भद्र ! किं कर्तव्यं विचिन्तय ॥

वीरभद्रः *(हुङ्कारं करोति, सरौद्रं परिभ्रमति, वाद्यध्वनिश्च श्रूयते)*
न भेतव्यं तथा बंशो ! ह्यपारे युद्धसागरे ।
रणे वीरस्त्वमसि भो ! मम सेनाः समर्पिताः ॥
नेपालपुत्रा वर्तन्ते वीरा युद्धपरायणाः ।
राज्ञः शुभा कामनास्ति युद्धाय कृतनिश्चयाः ॥
राज्ञा सम्प्रेषिता सेनाः प्राप्स्यन्ति ह्यधुनैव सा ।
सहस्रसैनिकाः सन्ति शिक्षिताः कालभैरवाः ॥
वंशराजो यस्य नेता, श्रीहर्षोऽन्यतरस्तथा ।
ते सन्ति युद्धविज्ञाश्च तत्रास्ति कुशला चमूः ॥

बंशुः *(हस्तौ प्रसार्य कोदण्डं वादयति, विविधध्वनिश्च गुञ्जति)*
क्षम्यतां हे वीरभद्र । हर्षोत्कर्षे समागते ।
रणनृत्यं रणे वाद्यं वादयन्तु परस्परम् ॥
नृत्यन्तु सैनिका ह्यत्र प्रमोदामोदकैः सह ।
सज्जीभूय च तिष्ठन्तु रणाय रणनायकाः ॥
रचयामश्चक्रव्यूहं वृक्षव्यूहं तथापरे ।
कालव्यूहं नागव्यूहं रचयामो ह्यनेकधा ॥
(वंशराजपाण्डे श्रीहर्षपन्तश्च सशस्त्रं सिंह इव प्रविशतः । विविधवाद्यध्वनिश्च गुञ्जति, जनाः 'स्वागतं सुस्वागतम्' इति कथयन्ति)

वीरभद्रः *(सोद्वेगं इतस्ततश्चलति)*
स्वागतं स्वागतं हर्ष ! वंशराजाय स्वागतम् ।
स्वस्ति गोरक्षचम्वै च समराय च स्वागतम् ॥
इतिहासं प्रणेष्यामो जित्वा बेलायतं तथा ।
जित्वा विश्वजयिनं नेपालो रच्यते शुभम् ॥
भुसुण्डिभिः समायुक्ता धनुर्धराश्च सैनिकाः ।
झम्पातेन च युध्यन्ते श्येनवत् सिंहवत्तथा ॥
विजयश्रीश्च ह्यस्माकं सूर्यचन्द्रध्वजस्य च ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भूपतेश्च जयो भाविनेपालस्य च गौरवम् ॥

(सिंहवत् इतस्ततः विलोकयतः, वाद्यं श्रूयते)

वंशराजः *(शान्तस्वरेण साभिनयम्)*

त्वं ब्रूहि भो वीरभद्र ! नेता त्वं समरस्य च ।
का स्थितिर्नो राजतेऽत्र कथं युद्धञ्च तैः सह ।
कथं गच्छति सेना च दुरारोहे महारणे ?
सिन्धुलीदुर्ग(गढि)मारुह्य करिष्यामोऽग्निवर्षणम् ?
किं किं वयं करिष्यामः ? चलिष्यामः कथं वयम् ?
कथं तिष्ठति सेना च केऽग्रभागे भवन्ति च ।

(विद्युद् द्योतते, मेघो गर्जति व्याघ्राणां ध्वनिश्श्रूयते, आकृतयश्च दृश्यन्ते, भीतास्ते शिलायन्ते, व्याघ्राः स्वमार्गेण गच्छन्ति । रङ्गमञ्चस्य प्रकाशो मन्दो मन्दो भूत्वा पुनश्चकास्ति । ते क्षणं प्रलीय प्रकाशपथमागच्छन्ति)

वीरभद्रः *(सोत्फुल्लम्)*

कतिचित् दिवसान् स्थित्वा रणनीतिर्विचारिता ।
सूचनायाः सङ्कलनं तेषां नीतिश्च चिन्तिता ॥
दुरारोहे भविष्यन्ति ते वै विपथगामिनः ।
तेषां वने गतिर्नास्ति न गतिर्विषमक्षितौ ॥
वयं प्रलीय तिष्ठामः गुल्मेषु गह्वरेषु च ।
वृक्षान्तरेऽपि तिष्ठामो वृक्षमूलेऽथ कण्टके ॥
क्षितिं विदार्य गर्ते च तत्र लीयामहे वयम् ।
गोप्यशब्दो 'जय काली'त्यस्माकं परिचायकम् ॥
परस्परं वदति यः सोऽस्माकं सुभटो भवेत् ।
नो चेद् वैरिदलं ज्ञात्वा छिन्दन्तु तस्य वै शिरः ॥

श्रीहर्षः *(हुङ्कारं करोति, सरौद्रं परिभ्रमति, विविधध्वनयश्च श्रूयन्ते)*

अस्माकं स्वल्पसेनायां विशिष्टो नियमो भवेत् ।
रोधनाक्रमणञ्चैव, छलनं धावनं तथा ॥
बहुधैव प्रकर्तव्यं गौरैः साकं परस्परम् ।
तेषां स्थितिश्च ज्ञातव्या बोद्धव्या न्यूनता तथा ॥
ते भवन्ति गिरितले वयं पर्वतमस्तके ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पाषाणस्य प्रहारेण हन्तव्याः शत्रुसैनिकाः ॥
अनुकूलाऽस्ति रणभूः प्रकृतिश्च तथाविधा ।
नायका गतिशीलाश्च युद्धशीलाश्च सैनिकाः ॥

वीरभद्रः *(हस्तौ उत्फाल्य कोदण्डं वादयति, वाद्यादिध्वनिः श्रूयते)*

रणनीतिर्विचारिता स्थानं युक्तं विचारितम् ।
पौवागढी–दुरारोहे विकटे विषमे स्थले ॥
आक्रमणं प्रकर्तव्यं सिंहनादैः परस्परम् ।
स्वप्नवच्च भवेत्तत्र निद्रावच्च भवेत् तथा ॥
चम्वः प्रलीय तिष्ठेयुः शिलावत् गुल्मवत्तथा ।
नागवत्ते च तिष्ठेयुः श्येनवत् सिंहवत्तथा ॥
शिलावर्षं मुहुः कृत्वा विषतुण्डस्य वर्षणम् ।
सर्पवर्षं तदा स्याच्च रोदनीवर्षणं तथा ॥
कण्टकानाञ्च गुल्माः स्युः कण्टकाः स्युरितस्ततः ।
इतस्ततो रोदनी स्यात् कण्टकाः दंशकास्तथा ॥

(विद्युद् द्योतते, मेघो गर्जति, भल्लूकानां ध्वनिर्गुञ्जति, तेषां यूथानामाकृतिश्च दृश्यते, सैन्यनायकाः शिलायन्ते, भल्लूकाः गन्धं घ्रात्वा इतस्ततो विलोकयन्तः स्वमार्गेण गच्छन्ति, विविधध्वनिश्च श्रूयते । रङ्गमञ्चस्य प्रकाशः मन्दीभूय पुनश्चकास्ति ।)

बंशुः *(सोद्वेगं प्रफुल्लो भूत्वा इतस्ततः करोति, वाद्यध्वनिश्च श्रूयते)*

मे सदीच्छा पूरिताऽभूद् युद्धविज्ञाः समागताः ।
सेनाः समागता ह्यत्र शस्त्रास्त्रैः सह सज्जिता ॥
भवाम्यहं पुरतश्च खुकुरीयुद्धं जायते ।
गौराङ्गानां शिरश्छित्वा खुकुरी शान्तिमेष्यति ॥
शत्रूणां रुधिरं पीत्वा खुकुरी चम्चमायते ।
खर्परं कन्दुकं मत्वा खेलन्तु सर्वबालकाः ॥
(इतस्ततः विलोकयति)

वंशराजः *(शान्तस्वरेण साभिनयम्)*

स्वाद्यस्थितेः सुव्यवस्था शिबिरस्थापनं तथा ।
शस्त्रास्त्रशाला कथं स्यात् वैद्यशाला कथं भवेत् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वस्त्राणां च स्थितिः का स्यात् सुरक्षाकवचस्य च ।
औषधस्य विहारस्य विश्रामस्य च किं भवेत् ?

वीरभद्रः *(सोत्फुल्लम्)*

अष्टौ ताः पर्णशालाश्च भोजनस्य कृते स्थिताः ।
अपरा वैद्यशाला च शस्त्रशाला च निर्मिता ॥
षट् शिबिराणि सन्त्यत्र सेनाशयनहेतवे ।
शौचस्य च प्रपायाश्च व्यवस्था विहिता शुभा ॥
पूजाशालाऽध्वरगृहाण्येकत्रैव विनिर्मिताः ।
अभिचारादिकं विप्राः कुर्वन्ति खड्गसाधनाम् ॥
ग्रामादायन्ति चान्नानि दधिदुग्धं घृतं मुदा ।
शाकादयः समायान्ति ग्रामतो ग्रामतः सदा ॥
युवानो बालवृद्धाश्च युद्धाय कृतनिश्चयाः ।
सहायूयं विदधानास्ते सन्त्येव राष्ट्रहेतवे ॥

श्रीहर्षः *(सोद्वेगं इतस्ततः करोति)*

व्यवस्था सुष्ठु सम्भूता खाद्यपेयस्य तालिका ।
विश्रामस्य व्यवस्था च कृता ह्यत्र मनोरमा ॥
नैकत्र शिविरं भूयात् विकीर्णा सन्तु सैनिकाः ।
रणनीत्या भवेत् कार्यं गोप्यानि शिविराणि च ॥
युद्धस्थलव्यवस्था च सुरक्षाक्रमणस्य च ।
प्रलीनस्य प्रहारस्य सुस्थित्या तु चलेद् रणः !

वीरभद्रः *(शान्तस्वरेण इतस्ततश्चलन् नटति)*

प्राकाराः प्राकृताः सन्ति कुत्रचित् सन्ति निर्मिताः ।
क्षितिं विदार्य गर्ताश्च निर्मिताः सन्त्यनेकधा ॥
पाषाणाः सञ्चिताः सन्ति स्थूलाः सूक्ष्माश्च मध्यमाः ।
क्षेप्यास्त्राणि च सन्त्यत्र प्रहरिष्यन्ति सैनिकाः ॥
सिंहवत् चाक्रमिष्यन्ति ते विषतुण्डवत्तथा ।
क्लान्ताश्च सैनिकाः तेषां युध्यन्ते पर्वते कथम् !
(इतस्ततः विलोकयति)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बंशुः *(शान्तस्वरेण साभिनियम्)*

सूचनायाश्च सञ्जालः निर्मितो बहुधा किल।
एकः सैनिकसञ्जालः अपरो गुप्तचारकः॥
भटैः साकं हयाः सन्ति स्थाने स्थाने च सैनिकाः।
ब्राह्मणा योगिनश्चारा भारवाहाः लसन्ति च॥
संकलय्य सूचनास्ते सूचयन्ति यथास्थलम्।
राज्ञि सेनापतौ चैव शीघ्रं नेष्यन्ति सूचनाम्॥

दूतः *(प्रविश्य, परिभ्रम्य शान्तस्वरेण)*

अस्माकं साधना तत्र फलीभूता च नायक!
मन्त्रणा घोषणा चैव जनताभिश्च स्वीकृता॥
आगता दरभङ्गातः विनान्नानि च सैनिकाः।
नामिलत् मिथिलापुर्यां ह्यन्नानाञ्च कणान् तथा॥
मिथिला निर्धना तद्‌वद् निर्जनेव विराजते।
न सन्ति जनता तत्र मूलमार्गे च सर्वतः॥
बुभुक्षया भटाश्चैव वर्तन्ते मरणोन्मुखाः।
जलवृष्ट्या मार्गभ्रमाद् बहुशः पीडिता भटाः॥

(मेघो गर्जति, विद्युत् द्योतते, जलधारायाः, व्याघ्राणां, शृगालानां च ध्वनिः श्रूयते, वाद्यं गुञ्जति)

वंशराजः *(सोत्फुल्लम्)*

ततस्ततो किमभवद् घोरेऽरण्ये सुदुष्करे।
प्रकृत्या पीडिताः सेनाः किमकुर्वन् निशामुखे॥
निशीथिन्यां किमभवत् जलपातस्य कारणात्।
सेनागजहयाऽस्त्राणां कावस्थाऽभूद् द्रुतं वद॥

दूतः *(सोत्फल्लम्)*

तमिस्रायां! घोरतरा जलधारा प्रवर्षिता।
संवर्त इव तोयस्य धाराभिः प्लाविता धरा॥
रतुवासरितस्तीरे शिविरं तैर्विनिर्मितम्।
सर्वं प्रवाहितं रात्रौ रतुवाजलधारया॥
सेना गजा हयाश्चैव बम्बास्त्राणि भुसुण्डिका।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अवहन् रतुवानद्यां स्वल्पा एव हि रक्षिताः ॥
घोरा विपत्तिरायाता गौराङ्गसैनिकेषु हि ।
कालिकायाः प्रसादेन रक्षिता ह्यत्र गोरखा ॥

वीरभद्रः *(प्रसन्नमुखमुद्रया)*
ततस्ततः किमभवत् देवैस्ते दण्डिताः किल !
तेषां शस्त्राणि चास्त्राणि कियत् का रणयोजना ।
तेषां मनोबलं कीदृक् पर्वते रणकौशलम् ।
लसन्ति कतिधा सेना संख्या च कति त्वं भण ॥

दूतः *(सोत्फल्लम्)*
कमलाख्यां नदीं तीर्त्वा भीमादं ते समागताः ।
रुदन्तः सन्ति मार्गे ते घोरया जलधारया ॥
बुभुक्षयाऽनिद्रया मलिनाः पीडिता भृशम् ।
ग्रामेऽन्नानि प्रलुण्ठ्यैव पक्त्वा तेऽभक्षयन् पथि ॥
शकटानि गजाः सन्ति भारस्य वाहनाय च ।
बम्बाश्च गोलिकाः सन्ति दूरवीक्षणयन्त्रकम् ॥
घोटकाः सन्ति दूताय मुख्याय नायकाय च ।
शतेन गुणिता चतुर्विंशी सेना विराजते ॥
न रणकौशलं तेषां दुरारोहे च पर्वते ।
नास्ति मनोबलं तेषां युद्धादग्रे पराजिताः ॥

वंशराजः *(सोत्फुल्लं परितो दर्शयन्)*
नेपालः सुन्दरो देशो विश्वेषु विभवेषु च ।
सन्ध्यायां भूरि सौन्दर्यं हिमाद्रौ भाति गह्वरे ॥
हिमालयः शिरो भाति वक्षःस्थलं तु पर्वतम् ।
तराईप्रत्यन्तभागाः सदा सौन्दर्यशालिनः ॥
सन्त्युत्तरस्यां प्राकाराः रजतनिव चोज्वलाः ।
इन्दुर्भ्रमति ह्यत्रैव कान्त्या च रजनीमुखे ॥
पूर्वस्यां मिथिला भाति कपिलवस्तु पश्चिमे ।
कौशिकी गण्डकी शुभ्रा या सदामृतवाहिनी ॥
वाग्मत्याः वेगधाराश्च पोषयन्ति सदा धराम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पीयूषवाहिन्यःसरितः सर्वदा पावयन्ति नः ॥
प्रकृतिश्च प्रेरयति ह्येकतायै पुनः पुनः ।
देशस्य सुदृढतायै विस्तृतीकरणाय च ॥

(रणवाद्यं श्रूयते, वंशराजः परितो भ्रमति । रङ्गे प्रकाशो विविधरागैर्नृत्यति, 'जय जय काली, जय जय गोरख' इति गीतं वाद्यञ्च गुञ्जति । पटाक्षेपश्च जायते)

तृतीयं दृश्यम्

स्थानम् - सिन्धुलीदुर्गस्य रणभूमिः । समयः - मध्याह्नः ।

(यवनिकायाः पृष्ठभागे प्रकाशो मन्दो दृश्यते, युद्धवाद्यं श्रूयते । सैनिकाः इतस्ततः प्रहरन्तः सन्ति । भुशुण्डीनां, बम्बास्त्राणां ध्वनिः, कोलाहलश्च श्रूयते । रङ्गमञ्चे स्थित्वा सेनापतयः युद्धरतान् भटान् आदिशन्ति 'घातय घातय, प्रहर प्रहर, इतः आयान्ति चेत् अवरोधय, इतोऽपि ततोऽपि उत्प्लुत्य गच्छन्तु, तान् घातय, पाषाणवर्षणं विधेयं, भुशुण्डिना प्रहर, धनुर्वाणं चालय' इत्यादयः । कदाचित् पृष्ठभागस्य प्रकाशो मन्दो जायते । कदाचित् अग्रभागस्य प्रकाशो मन्दो जायते, कदाचित् द्योतते । तत्र सैन्यसमूहः पृष्टभागे दृश्यते, कदा लुप्यते च, तत्रैव अग्रभागे सैन्यनायकाः दृश्यन्ते । रणे गोरक्षसेनायाः वीरत्वं दृष्ट्वा सैन्यनायकानां भटानाञ्च मनोबलं प्रवर्द्धते ।)

वंशराजः *(सोत्फुल्लम्)*

बंशो ! गच्छ अधो भागे प्रलीनस्तत्र तिष्ठतु ।
पत्राणां वेष्टनं कृत्वा पत्रवत्तत्र लीयताम् ॥
यदाऽऽगच्छन्ति भटास्ते सर्पा भूत्वा दशन्तु च ।
आसमाप्ति च युध्यन्तां श्रृगालेन च सिंहवत् ॥

बंशुः *(सोत्फुल्लम्)*

अहं गच्छामि युद्धाय गोर्खालीसुभटैः सह ।
तेषां विधाय नेतृत्वं युद्धेऽहं मरणान्तकम् ॥
जीवितेऽहञ्च द्रक्ष्यामि विशालराष्ट्रवैभवम् ।
रणभूमौ मृते शीघ्रं स्वर्गे गन्तास्मि निश्चितम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(बंशुः नत्वा निर्गच्छति, रणवाद्यं श्रूयते)

वंशराजः *(हस्तं नेत्रयोः संस्थाप्य निरीक्ष्य च सोत्फुल्लम्)*

आगता भारवाहाश्च नीत्वा ह्यन्नानि मस्तके ।
नावरोधं वयं कुर्मो गच्छन्तु शत्रुसेवकाः ॥
निःशस्त्रिणा वनिताश्चैव बाला वृद्धाश्च रोगिताः ।
शरणं याचमानाश्च न हन्तव्यः कदाचन ॥

(ते छायायां शिलायन्ते, भारवाहाश्च गच्छन्ति)

सशस्त्रशत्रुसैनिका यदाऽऽगच्छन्ति पर्वते ।
तदाक्राम्य च हन्तव्या नैको जीवेत् कदाचन ॥
सज्जीभूय च तिष्ठन्तु गोरखावीरसैनिकाः ।
सङ्केतेनैव हन्तव्या ह्यस्त्रैर्विविधशक्तिकैः ॥

वीरभद्रः (हस्तं नेत्रयोः संस्थाप्य निरीक्ष्य च सोत्फुल्लम्)

आगताः सन्ति सशस्त्राः क्लान्ता गौराङ्गसैनिकाः ।
चन्द्रव्यूहं विनिर्माय हन्तव्यास्ते मुहुर्मुहुः ॥
वेला चेयं प्रहारस्य मारणस्य जयस्य च ।
कीर्तेर्धर्मस्य स्वर्गस्य देशनिर्माणहेतवे ॥

वंशराजः *(निरीक्ष्य सदृढम्)*

आक्रम्य शीघ्रं हन्तव्या ह्यागताः परसैनिकाः ।
रोदनी विषतुण्डञ्च वर्षयन्तु विभीषणम् ॥
पाषाणवर्षणं शीघ्रं कुर्वन्तु मम सैनिकाः ।
धनुर्धराश्च युध्यन्तां वाणैर्मन्त्रैः पुनः पुनः ॥

वीरभद्रः *(सदृढम्)*

केचित् गच्छन्तु पूर्वस्यां केचित् धावन्तु पश्चिमे ।
अपरे मध्यमे स्थित्वा युध्यन्तां च महारणम् ॥
शिरश्छेदनतः शत्रोर्मानोऽस्मद् वर्धति किल ।
वृत्तिश्च वर्धति नित्यं रणे जीवेत् म्रियेत वा ॥

(पृष्टभागे युद्धस्य ध्वनिः श्रूयते, 'प्रहर प्रहर, घातय घातय, सर्पगत्या अग्रे गच्छतु, पाषाणवर्षणं कुरु, पूर्वस्याम् अतिरिक्तसैनिका गच्छन्तु, मध्ये च अन्यबलं प्रेषय, विषतुण्डानां गोलान् प्रहर, रोदनीं प्रक्षिप, मा भेतव्यम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अग्रे उत्प्लुत्य धावन्तु, मा भेतव्यं, वयं उच्चभूमौ स्मः, पाषाणप्रहारमात्रेण ते पञ्चत्वं गच्छन्ति । भूमौ सर्पासने शेरताम्, शत्रवो भुशुण्डिभिः प्रहरन्तः सन्ति, सावधानतया युध्यन्ताम्' इति)

वंशराजः *(निरीक्ष्य सोद्वेगम्)*

साधु साधु त्वया सोम ! मारिताः शत्रुसैनिकाः ।
एकतारा वर्धिता स्याद् ह्यन्यत् शीघ्रं हि वर्धते ॥
साधु साधु त्वया भीमो गौराङ्गा मारिता भटाः ।
ताराद्वयं वर्धितन्ते रणे वृत्तिश्च वर्धिता ॥

वीरभद्रः *(हस्तं नेत्रयोः संस्थाप्य निरीक्ष्य च सदैन्यम्)*

सेनापतेऽस्मत् सेना तैर्भुशुण्डिभिश्च मारिताः ।
बलयुद्धं छलयुद्धं भवेद् युद्धमनेकधा ॥
पाषाणस्य महत् वर्षं कर्तव्यं च पुनः पुनः ।
अयोगोलस्य वर्षा च विधेया मेघवर्षवत् ॥

(रणवाद्यं कोलाहलश्च श्रूयते, गणप्रमुखाः निर्दिशन्तः सन्ति, 'भूमौ शयित्वा अग्रे सरन्तु, सर्पवत् उरसा गच्छन्तु शिलावर्षणं कुर्वन्तु, लौहकावचिकाः, चर्मकावचिकाश्च सेना अग्रे गच्छन्तु, शत्रुसेना पलायन्तः सन्ति, मा भेतव्यम्')

वंशराजः *(हस्तं नेत्रयोः संयोज्य निरीक्ष्य च सदैन्यम्)*

अङ्गभङ्गान् भटान् शीघ्रं नयन्त्वारोग्यकेतने ।
वैद्याः सन्ति च विज्ञास्ते ह्युपचरन्ति तान् भटान् ॥
शल्यक्रियां लेपनञ्च कृत्वा वै बलवर्द्धनम् ।
करिष्यन्ति यथायोग्यं तत्रैव स्वास्थ्यसाधनम् ॥

(रङ्गमञ्चे प्रकाशो मन्दो जायते, उपचाराय सहयोगिनो दोलायां संवाह्य भटान् नयन्ति, केचित् सहयोगं गृहीत्वा एकपादेन व्रजन्तः सन्ति । तेषां शरीरे व्रणाः सन्ति ततः रक्तधारा वहन्ती दृश्यते, अङ्गभङ्गान् भटान् वंशराजो वीरभद्रश्च नमतः ।)

सैनिकः *(एकपादेन हिण्डमानः सगौरवम्)*

मारिताश्च मया युद्धे शत्रुसेना ह्यनेकशः ।
कर्तित्वा खुकुरीशस्त्रैः भिन्दिपालैश्च घातिताः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शवानां पर्वतो जातो गौराङ्गानामितस्ततः ।
तेषां कोलाहलो ह्यस्ति तेषां सेना पलायिता ॥

वंशराजः *(सदैन्यम्)*

अङ्गभङ्गान् भटान् नित्यं नेपालः पालयिष्यति ।
उपचारं विधायैव रक्षिष्यति च जीवनम् ॥
महारणे ये म्रियन्ते शत्रुसेनाप्रहारतः ।
वीरसूर्वीरपितॄँश्च वीरपत्नीं मनोरमाम् ।
तेषां संरक्षणं राष्ट्रं सम्मानञ्च करिष्यति ॥

वीरभद्रः *(सदैन्यम्)*

येषां वीराः सुताः सन्ति कुशलाश्च समर्पिताः ।
आगच्छन्तु च सेवार्थं वीरजानाञ्च स्वागतम् ॥
भूमिं दास्यति सेनायै वृत्तिं च पालनाय च ।
पुत्रवत् परिपाल्यन्ते तेषां भूपो हि रक्षकः ॥

(शवं गृहीत्वा भटा 'जयतु जयतु नेपालः, जयतु जयतु नेपालः, जयतु जयतु नेपालनरेशः' 'जय जय गोरख ! जय जय कालि !' इति उद्‌घोषणपूर्वकं *व्रजन्ति । वंशराजो वीरभद्रश्च पुष्पाणि माल्यादीनि च अर्पयन्तौ अभिवादनं कुरुतः)*

वंशराजः (सदैन्यम्)

ये वीराश्च मृताः सन्ति शरीरेण न कर्मतः ।
युगे युगे च जीवन्ति ग्रामे ग्रामे जने जने ॥
अभिवन्दे च तान् वीरान् राष्ट्रनिर्माणहेतवे ।
तैर्विहितं बलिदानं युष्माभिश्च महारणे ॥
निरर्थका न जायन्ते युष्माकं रक्तबिन्दवः ।
नेपालः सुदृढं राष्ट्रं चिरस्थायी भविष्यति ॥

वीरभद्रः *(सदैन्यम्)*

नेपालवीरसेनां वै ह्यभिवन्दे पुनः पुनः ।
यावज्जीवति नेपालो युष्माकं कीर्तिकौमुदी ॥
तावज्जीवति प्रीतिश्च पूजयन्ति सदा जनाः ।
वीराश्च त्रिदिवे यान्ति हीति शास्त्रस्य निर्णयः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जीवित्वा च शवायन्ते मृत्वा जीवन्ति चापरे ।
भाग्यवन्तो भटा वन्द्या ये रणे निधनं गताः ॥

सैनिकः *(सगौरवम्)*

महारथिन् मुदा पश्य मृताश्च शत्रुसैनिकाः ।
भुशुण्डीं ननु बम्बास्त्रं परित्यज्य पलायिताः ॥
कोलाहलं च चीत्कारं कुर्वन्तस्ते पलायिताः ।
दीपे पुत्तलिकावत्ते दावाग्नौ हरिणा इव ॥
तेषां बह्वीश्चमूर्नष्टाऽस्माकं रणे शतत्रयम् ।
शास्त्रास्त्राणि गृहीतानि तेषां तु बलपूर्वकम् ॥

गुप्तचरः *(सगौरवम्)*

भारवाही तदा भूत्वा न्यवसं मासयुग्मकम् ।
अर्धमूकश्च तत्राहं विश्वाससेवके स्थितः ॥
अनेकेऽधिकृताः तेषामङ्गभङ्गाश्च घातिताः ।
मनोबलं हतं तेषां गौरङ्गास्तु पलायिताः ॥
मारिताः षोडशशतं शत्रुसेना इतस्ततः ।
इतरे भग्नगात्राश्च विलुप्तास्तत्र सैनिकाः ॥
पराजयः स्वीकृतस्तैर्गौराङ्गैः प्रमुखैर्गणैः ।
सप्तशती ह्यवशिष्टा तेषां सेना प्रताडिता ॥
शस्त्रास्त्रञ्च परित्यज्य धावन्त्यः सन्ति भूतले ।
अन्विष्य च ग्रहीतव्यं शस्त्रास्त्रं तु वने वने ॥

(जय जय काली, जय जय-गोरख, जय जय काली, जय जय-गोरख' 'जयतु नेपालः, जयतु नेपालनरेशः' इति उद्घोषयन्तो भटाः पृष्टभागे समागच्छन्ति, वाद्यं गुञ्जति)

वंशराजः *(ससन्तोषम्)*

नेपालस्य जयो जातो गौराङ्गाश्च पराजिताः ।
नृत्यन्तु चात्र गायन्तु जयघोषं वदन्तु नः ॥
नेपालस्य शिलान्यासः सिन्धुलीगढितोऽभवत् ।
विश्वविजयिनी सेना जिता गोरक्षपक्षतः ॥
हर्षोत्कर्षप्रकर्षेऽत्र जयघोषं मनोरमम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कुर्वन्तु जययात्राञ्च नेपालहर्षदायिनीम् ॥
नमामि विश्वजयिनो नेपालशूरसैनिकान् ।
पराजिताश्च गौराङ्गाः नेपालदेशनिर्मितः ॥
नौमि नेपालभूपालं नाथं गोरक्षकालिकाम् ।
पशुपतिञ्च वन्देऽहं नेपालं मनःकामनाम् ॥

(जय जय काली, जय जय-गोरख, जय जय काली, जय जय-गोरख' 'जयतु नेपालः, जयतु नेपालनरेशः' इति उद्घोषयन्तः भटाः विजययात्रां कुर्वन्ति, केचित् दण्डसहयोगेन एकेन पादेन हिण्डन्ते । जनाः रक्तचन्दनेन, मालया पुष्पवर्षणैः, जलधारया सेचनेन, विविधया रीत्या सुस्वागतं सम्मानञ्च कुर्वन्ति । सैनिकाः खुकुरीशस्त्रं, भुसुण्ड्यादीन् प्रदर्शयन्तः नृत्यन्तश्च गच्छन्ति । जयघोषं वाद्यञ्च गुञ्जति ।)

वंशराजः (परितो विलोकयन् परिभ्रम्य च)

भरतवाक्यम्

नेपालो वै जयतु भुवने विश्वविख्यातसेना
कल्याणं वै भवतु भुवने देवभूमौ स्थितानाम् ।
भूपालेन्द्रो जयतु समरे राष्ट्रनिर्माणकार्ये
वर्धेरन् वै बुधकुलजना विश्वकल्याणभाजः ॥

(क्रमशः पटाक्षेपो जायते)

॥ इति पाराशर्य-नवराजकट्टेलविरचितं नेपालविजयं नाम नाटकम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बहादुरशाहः

पात्रपरिचयः

बहादुरशाहः	:	पृथ्वीनारायणस्य कनिष्ठः पुत्रः,
राजेन्द्रलक्ष्मीः	:	प्रतापशाहस्य पट्टराज्ञी
रणबहादुरशाहः	:	प्रतापशाहस्य पुत्रः
गजराजमिश्र	:	राजगुरुः
व्रजनाथपण्डितः	:	प्रासादस्य गुरुः,
मैजुरानी	:	प्रतापस्य भोगिनी
विदुरशाहः, शेरबहादुरशाहश्च	:	प्रतापयमैजुरानद्वयस्य पुत्रौ,
स्वरूपसिंहः कार्की	:	काजी भटनायकश्च,
भटाः	:	कारागारस्य भटाः । अन्ये पुरवासिनश्च ।

प्रथमं दृश्यम्

स्थानम् – हनुमद्द्वारप्रासादम् । समयः – सन्ध्याकालः ।

(मधुरो दीपप्रकाशो विकटं वाद्यं कुक्कुराणां मार्जाराणां रोदनध्वनिश्च श्रूयते । रणबहादुरशाहः, मैजुरानी, व्रजनाथपण्डितः, स्वरूपसिंहकार्की च रङ्गे विलोक्यन्ते । भूपतिः रणबहादुरो तदानीन्तनराजकीयवस्त्राभूषणे विलोक्यते । राजकुमारोचित-वस्त्राभूषणो बहादुरशाहः पश्चात् समागच्छति । कनकादिवस्त्राभूषणैरलङ्कतास्ति मैजुरानी । ते च परस्परं युद्धस्य वार्तां कुर्वन्तः सन्ति)

बहादुरशाहः

नेपालसम्राजं नौमि । यस्य सौराज्ये गौराङ्गसेना पराजिता, चीनभूपालस्य विशाला सेना पलायिता, विशालतिब्बतदेशो येन वशीकृतस्तं नेपालभूपालमभिवादये । किमर्थमहमाहूतः ? अस्ति कश्चिन्नूतनकार्यविशेषः ।

रणबहादुरः

पितृव्य ! अस्ति कश्चित् कार्यविशेषः । एकीकरणस्य, नेपालचीनयोः, नेपालतिब्बतयोश्च युद्धस्य समीक्षा विधेयास्ति महाराज ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बहादुरशाहः

अस्माकं पूर्वजाः पितृचरणा येन पथा गतवन्तः सा पन्थोऽनुसरणीयः। तमनुसृत्य महाराज ! नेपालस्यैकीकरणं विधेयम्, भारतवर्षाद् गौराङ्गा अपसारणीयाः।

नेपाले हिमशैलदिव्यनगरे वीरा ह्यनेका खलु
जातास्ते रणविज्ञकौशलपरा नेपालसम्वर्धकाः।
पृथ्वीपो नयपालकैककरणे वीरत्वकार्यं तदा
चक्रे देशसुरक्षणे हितकृते स्वोत्कर्षसंस्थापने ॥

रणबहादुरशाहः

पश्चिमविजययात्रायां भवत आदेशेन तत्रत्याः जना भृशं पीडिताः, लुण्ठिताश्चेति जनसामान्या अपि मारिताः। अनेन शाहवंशस्य अपयशो जातः। पर्वते, जुम्लाराज्ये, आछामराज्ये गढवाले च जना गोरखाभूपतिना अत्याचारो विहित इति कथयन्तो भूयन्ते।

बहादुरशाहः

मया अत्याचाराय अनाचाराय च नैव निर्देशो दत्तः। गोर्खाराज्यस्येव पृथ्वीनारायणस्येव नीति मयापि अवलम्बिता। सति सम्भवे विनायुद्धं, अहिंसामार्गेण, सैनिककूटनीत्या, आर्थिकराजनीतिककूटनीत्या, सामाजिक-धार्मिककूटनीत्या एव अधिकांशो देशाः नेपाले समावेशिताः। अनेके देशा भवतश्चरणकमले समाहिताः।

कास्कीतो भटनायकाः शरयुता युद्धाय चाग्रे गता
गुल्म्या वै धुरकोटका नृपवरा ह्यर्घा च खाँची जिताः।
प्यूठानं किल पार्वतं नृपवरा आछामराज्यं तथा
जुम्ला वै गढवाल-डोटिसहिता नेपालदेशायिताः ॥

रणबहादुरशाहः

तत्तु समीचीनमेव। परन्तु अस्माकं राष्ट्रस्य नीतिविरुद्धं भवता गौराङ्गैः साकं गोप्यमिलनं विहितं, तेऽस्माकं परमहेयाः सन्ति।

बहादुरशाहः

नेपालभूपते ! तैः सह मिलनं तु ममाभिनयमात्रमासीत्। ते 'नेपालोऽस्माकं पक्षेऽस्ति। पर्वतीयराज्येषु नेपालो यद्वाञ्छति तत्करोतु, नेपालश्चास्माकं सहायकोऽस्ति, भवतु च' इति गौराङ्गा विचारयन्तु। तथात्वे सति सारल्येन वयं पर्वतीयराज्यं नेपालस्य वशवर्तिनं कारयितुं शक्नुमः' इति धिया मयाऽभिनीतः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रणबहादुरशाहः

तिब्बतेन सहास्माकं वैमनस्यं युद्धञ्च न नेपालस्य पक्षेऽभवत् । तत्र आर्थिकी सैनिकक्षतिश्च जाता । तथैव तिब्बतस्य द्वितीययुद्धे तु चीनोऽपि समागतः । ते ऽशीतिसहस्रसैनिकान् समाहृत्य आक्रमणं चक्रुः । काष्ठमण्डपपर्यन्तं दशसहस्रसैनिकैः सह आक्रमणाय समागच्छन् । तदास्माकं कूटनीतिर्युद्धनीतिश्च दुर्बला निष्फलायिता च ।

बहादुरशाहः

नेपालनरेश ! तिब्बतेन चीनेन च सह युद्धं स्यादिति ममापि लेशोऽपीच्छा नासीत् । परन्तु नेपालस्य व्यापारव्यवशायिनां नेपालिमुद्रायाश्च रक्षायै शाहवंशस्य गौरववर्द्धनाय च वाध्यतया युद्धं विहितम् ।

नेपालं प्रति दुष्टभावनतयाऽक्रुध्यत् तदा तिब्बत–
स्तं दुष्टं दमनं विधाय नृसुतोऽगर्जत् यथा केशरी ।
चीनो दुष्टहृदं विधाय शततं युद्धाय दुर्गे गतः
तस्मै दुष्टकृते विधाय दमनं कीर्तिस्तदा वर्धिता ॥३॥

रणबहादुरशाहः

तत्तु समीचीनमेव । परन्तु आङ्ग्लैः सह च नेपालस्य न सुमधुरो सम्बन्धः । तराईप्रदेशेषु अनेकेषु क्षेत्रेषु अस्माकं दमनाय तैर्बहुयत्नो विहितः ।

बहादुरशाहः

गौराङ्गैर्नेपालस्य विजयाय अनेके प्रयत्ना विहिताः, परन्तु तेषां प्रयासो निष्फलायितः ।

गौराङ्गैर्नयपालदेशविजयेऽनेके प्रयत्नाः कृता–
स्तान् सर्वान् च विजित्य तत्र बहुधा हुङ्कारशब्दः कृतः ॥
देशे गौरववृद्धये जनहिते चक्रुश्च कार्यं मुदा ।
तान् वीरान् मनसा नमामि सततं नेपालजान् वैभवान् ॥

रणबहादुरशाहः

(पितृव्यमवमन्य, उच्चैः शब्देन) नेपाल–तिब्बतयोः, नेपाल–चीनयोः रणेन नेपालस्य कृते बहुहानिर्जाता । यदाहं नववर्षीय आसम् तदा मम पक्षतो 'नायवीपदं' गृहीत्वा नववर्षपर्यन्तं भवता राष्ट्रस्य कृते सर्वेऽपि निर्णयाः कृताः । राष्ट्रस्य भाण्डागाराद् बहूनि धनानि व्ययीकृतानि । कतिचिदुचितकार्येषु कतिचिदनुचितकार्येषु च व्ययः कृतः । तस्य आयव्ययस्य विवरणं वाञ्छामि ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बहादुरशाहः

(विवर्णभावेन) अहं नेपालस्य निर्णयकर्ता, युद्धस्य परिचालकः आदेशकर्ता चासम्। अर्थव्यवस्थायाः भाण्डागारस्य च अधिकारिणः सर्वमपि आय-व्ययविवरणं लिखित्वैव स्थापयन्ति । ते एतादृशं विवरणं दातुं प्रभवन्ति । परन्तु नववर्षस्य विवरण-प्राप्तिः तत्कालमेव न सम्भवति ।

रणबहादुरशाहः

(सोद्वेगम्) पितृव्य ! मम मातापि भवता बहुवारं वन्दीकृता । भवता सा ताडिता पीडिता च। दशमवर्षीयस्य मम बाल्यावस्थाया दुरुपयोगं कृत्वा राज्यस्य भाण्डागाराद् भवता वृथा बहूनि धनानि व्ययीकृतानि । अस्य दण्डस्तु मिलत्येव ।

बहादुरशाहः

(सुदृढभावेन) मत्कृते धनस्य का आवश्यकता ! नेपाल एव मम धनं, नेपाल एव मम गृहम्। नेपालिन एव मम परिवारः । मया नेपालविस्ताराय प्रयत्नो विहितः, पितुः कार्यमग्रे सारितम् ।

टिष्टातो जनकादिभूमिसहिता नेपालनाम्नी तदा
पित्रा मे खलु मातृभूर्विरचिता नेपालशोभा धरा ॥
गोर्खातः किल कास्किपश्चिमधरा कालीपरः कश्मिरः ।
जुम्लातो गढवालभूमिरपरा मे शासने ह्यागता ॥५॥

रणबहादुरशाहः

(सरौद्रम्) पितृव्य ! भवतः सदुक्तिः समीचीनैव । परन्तु यदापर्यन्तं युद्धावसरस्य आयव्ययस्य विवरणं नैव प्राप्यते, सत्यासत्यस्य परीक्षणं नैव सम्पद्यते तदापर्यन्तं कारागरे तिष्ठतु । इत एव भवतो नायबीपदं चोपसंहृतमस्ति । सैनिक ! पितृव्यं नय कारागारे ।

बहादुरशाहः

(सरौद्रम्) नेपालनरेश ! एतदेव न्याय्यम्। अहं श्रीश्रीश्रीश्रीश्री बडामहाराजाधिराजस्य पृथ्वीनारायणस्य पुत्रोऽस्मि । येन नेपालनिर्माणाय सर्वं जीवनमुत्सृष्टम् । मया च तस्यैव पन्था अनुसृतः ।

राष्ट्रस्यास्य च सेवको रणधरो युद्धस्य जेताऽभवं
सर्वे मां भटनायका च जनता विश्वासमातन्वते ।
शत्रूणां भयवर्द्धने रणजये यस्यास्ति ख्यातिर्मुदा
भूपानां शिरभूषणं कनकजं नेपालपादे कृतम् ॥ (शिरुऽजन्तः)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(त्रासदीयं वाद्यं गर्जति, विद्युच्चकास्ति । सभिन्दिपालाः सैनिकाः समागत्य निगडेन वध्वा कारागारं नयन्ति । गच्छन् किञ्चिद् वदति)

रणबहादुरः

(भटाः विरमन्ति) नय, नय ।

बहादुरशाहः

(सरौद्रम्) नेपालाधीश ! भवान् महाषड्यन्त्रस्य दुश्चक्रे निपतितः । अस्य दुष्परिणामो भवतो जीवने नेपालस्य च जीवने प्रपतिष्यति । आहिमालयात् आभारतवर्षाच्च गौराङ्गानां निष्काशनयोजना च विफलयिष्यते ।

रणबहादुरः

अहमधुना वयस्को जातः पितृव्य । राजा स्वयमेव शास्ति शासनम् ।
(मनसि- मम पिता त्रस्यति स्म, त्वया मम माता कारागरे निपातिता, मां समाप्य स्वयं भूपालो भवितुं वाञ्छसि, त्वं शक्नोसि चेत् मां मारयसि, अधुनाहं शक्तः, त्वां कारागरे क्षिपामि ।) नय, नय ।

बहादुरशाहः

(बलपूर्वकं नयन्ति) उत्तरस्यां कैलाशात् ब्रह्मपुत्रनदीतः, पूर्वस्यां गङ्गासागरपर्यन्तं, पश्चिमायां यमुनापर्यन्तं, सिन्धुपर्यन्तं वा दक्षिणे गङ्गापर्यन्तं नेपालस्य विजयस्तम्भः सीमा च भवेदिति नेपालस्य इच्छा, मम प्रतिबद्धता, पितुः प्रयासश्च विफलायते । षड्यन्त्रचक्रं सफलायते ।

व्रजनाथपण्डितः

(नटति) भवतः कृतेऽयं विषधर आसीत् । विषकुम्भं पयोमुखमिवासीत् । नेपालभूपालस्य कृते कण्टक आसीत् । गतो गतः । अनेन पश्चिमनेपालस्य भूपालैः सह समानसमये तिब्बतेन साकं युद्धं व्यरचि । अतो नेपालो दुर्बलो जातः । युद्धे अनावश्यकं बहूनि धनानि व्ययीकृतानि ।

रणबहादुरशाहः

(साक्रोशम्) पितृव्येन बहादुरशाहेन, दलमर्दनशाहेन साकं, प्रासादचरैस्सह च मिलित्वा मम पितुः प्रतापशाहस्य हत्याया योजना विहिता । मम मातरं राजेन्द्रलक्ष्मीदेवीं मन्त्रिणा सह भोगविलासं कृतवती इति आरोपे कारागारे क्षिप्तवान् । स्वं भूपतिं मन्यमानः पितृव्यो मां नेपालनरेशं त्रिवारं नमस्कारं नैव करोति स्म ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विदुरशाहः

(परितो भ्रमति । मनसि) अयमेवासरः तस्य विनाशाय षड्यन्त्रं विधातव्यम् । *(प्रकटम्)* अनेन चौरकार्येण गोप्यरूपेण राजानमपि निवेदनमकृत्वैव रजतरूप्यकस्य टङ्कणं विहितम् । मित्रेण भोटनरेशेन सह वृथैव युद्धं विधाय भोटदेवो विकारायितः । नेपालस्य नीतिविरुद्धं गौराङ्गैः सह मिलित्वाऽकार्यं विहितम्, अङ्ग्लाश्च नेपाले समानीताः ।

शेरबहादुरः

(राजाग्रे नतशिरसा) अनेन राजमातरं राजेन्द्रलक्ष्मीं गरलपानं कारयित्वा मारणाय प्रयत्नो विहितः । *(मनसि)* राजा प्रसन्नोऽस्ति, अस्मिन्नेवासरे विभ्रमः कारयितव्यः । *(प्रकटम्)* भवन्तं नेपालनरेशं मारयित्वा स स्वयमेव राजा भवितुं वाञ्छति स्म ।

मैजुरानी

(मनसि) अयमेवासरो राजतोषयेऽहमपि किञ्चित् वच्मि, तस्य पतनं विना ममोदयं न जायते । स पितृव्यः कतिवारं मम अन्तःपुरे समागत्य कामुकदृष्ट्या मां विलोकितवान् । एकदाऽहं तस्य भुजबाहौ निगृहीतवती परन्तु बलपूर्वकं पलायित्वा सतीत्वस्य रक्षा विहिता ।

स्वरूपसिंहः कार्की

(साभिनयं मनसि – तस्य पतनं विना न मम मनोरथः पूर्णो जायते । अस्मिन्नेवासरे किञ्चिदुक्त्वा विभ्रमः कारयितव्यः । अनेन ममापि शिरश्छेदनाय प्रयत्नो विहितः । सौभाग्येन जीवितोऽहम् । नेपालनरेश ! सर्वजितरानामन्त्रिणश्च हत्याऽनेन अकारि । अतोऽयं दण्डनीयोऽस्ति ।

(विद्युच्चकास्ति, मेघो गर्जति । वाद्यवादनेन भयदं वातावरणं निर्मीयते । पुनः करुणप्रदं वाद्यं ध्वन्यते । सर्वे मौनं तिष्ठन्ति । क्षणं धूमायते रङ्गः । ते छायायां शिलायन्ते च । क्रमशः वटाक्षेपो जायते)

द्वितीयं दृश्यम्

स्थानम् –विष्णुमतीतटस्थः कारागारः । समयः – सूर्यास्तपश्चात्

(रज्जुनिर्मितिकारागारे चतुर्षु दिक्षु भिन्दिपालकौ भटौ स्तः, भुसुण्डीयुतौ भटौ स्तः । तैलदीपस्य मन्दप्रकाशे निगडेन बद्धो बहादुरशाह इतस्ततः करोति । साश्रुनयने भटैः सह वदति, गायति, रौति चिन्तयति च ।)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बहादुरशाहः

(सकारुण्यम्) भटनायक ! कीदृशोऽहं राजकुमारः ! मम ललाटे विधिना दुःखमेव लिखितं स्यात्। वारंवारमहं कारागारे निक्षिप्तः। नवकोटप्रासादे वि.सं. १८१४आषढस्य ६ दिनाङ्के मम जन्म। माता नरेन्द्रलक्ष्मीर्मम लालनपालनमकरोत्। मम जन्मसमये पिता कीर्तिपुरस्य समरे गर्जन्नासीत्।

भटः १

(सविनयम्) राजपुत्र ! कस्य ललाटे विधिना किं लिखितं केऽपि न जानन्ति। दुःखसागरे एव सत्पुरुषाः महापुरुषायन्ते। दुःखितोऽयं राजतनयः *(सकारुण्यम्)*। नेपालस्यैकीकरणायानेन बहूनि कार्याणि कृतानि। अनेन नेपालस्य सैनिकशक्तिश्च वर्द्धिता। सैनिकसौविध्यञ्च वर्द्धितम्। तथापीयं दशा।

बहादुरशाहः

(साश्रुनयनः) यदा पिता दिवङ्गतः तदाहं नवकूटराजप्रासादे आसम्। नेपालस्यैकीकरणाय सर्वापि शिक्षा, सर्वापि रणनीतिः, युद्धनीतिरान्तरिक-सुरक्षानीतिश्च पिता मामशिक्षयत्। प्रासादे पिता सर्वदैव नेपालस्यैकीकरणे, गौराङ्गपराजये, पर्वतीयराज्यानामेकीकरणे सेनानायकैः सह विमृशति स्म।

भटः २

नेपालस्यैकीकरणे स तु पृथ्वीनारायणो देवदूतः इवासीत्। तस्याग्रे गौरङ्गा कम्पन्ते स्म, पलायन्ते स्म। सिन्धुलीदुर्गाक्रमणपश्चान्न द्विवारं तैर्गौराङ्गैरनेन साकं युद्धमकारि।

बहादुरशाहः

पित्रा मत्कृते युद्धप्रशिक्षणाय भटाः गुरवश्च नियुक्ता आसन्। मुक्तोऽमुक्तः, मुक्तामुक्तः, यन्त्रामुक्तो मन्त्रमुक्तः आयुधः शिक्षितः। तैः प्रशिक्षितोऽहमभ्यस्तश्च। तदाहं तदाहं ....।

(मूर्च्छाङ्गतः, युद्धाभ्यासं स्मरति। तस्य शरीरे प्रकाशपुञ्जं दृश्यते, प्रकाशः सरति, मन्दप्रकाशे किशोरो बहादुरशाहः युद्धाभ्यासं कुर्वन् दृश्यते। तत्र गुरवो निर्दिशन्ति, भटैः सह अभ्यासं करोति राजपुत्रः। 'बाहुयुद्धम् ....। खुकुरीयुद्धम्....। भिन्दिपालयुद्धम्। खड्गयुद्धम्। उत्प्लवनम्। भुसुण्डीधनुषोः लक्षभेदनम्....वृक्षे, पत्रे, पुष्पे, पुष्पपत्रे ...लक्षभेदो जातः। भूमिशयित्वा युद्धाभ्यसनम्। गोपनम्।' ध्वनिरेव तर्जन्या दर्शयति, वृक्षारोहणम्....सफलो जातः। भृग्वारोहणम्। भृगुपतनम्। नदीतरणम् ....सफलो जातः। रज्जौ नदीतरणम् अश्वारोहणम् ....सफलो जातः।')

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बहादुरशाहः

(मूर्च्छाङ्गतो बहादुरशाहः जलसिञ्चनं पश्चात् शनैः शनैः व्युत्थितो भवति ।) भट ! किं मया कोलाहलःश्रुतः । जना अत्र संहता आसन् ?

भटः ३

(नतशिरसा) भवान् दुःखपूर्णं विगतजीवनं श्रावयन्नासीत् । अकस्माद् मूर्च्छाङ्गतः ।

बहादुरशाहः

(शरीरस्याकुञ्चनं, प्रसारणं, परावर्तनञ्च कुर्वाणः) अहं कथयन्नासम्- मम अग्रजः कान्तिपुर्यां स्थित्वा तन्त्रसाधने संलग्नो जातः । रसरङ्गे निमग्नः। किशोरीणां कनकमये कोमलाङ्गे कमनीयं ताडनं कृत्वा समयमतिवाहयति स्म । अतः पिता युद्धसञ्चालनस्य राज्यसञ्चालनस्य सर्वं प्रशिक्षणं मह्यं दत्तवान् । कतिपयेषु रणेषु पित्रा सह शौर्यशीलोऽहमपि गतवानासम् । भयो मत्तो बिभेति स्म ।

भटः४

अतो भवतो नेतृत्वे 'बाइसी चौबिसी' राज्यानि नेपालस्याङ्गभूतानि । परन्तु ...।

बहादुरशाहः

राजा कस्यापि मित्रं न भवति । यदा जनको दिवङ्गतः, माता च गतवती, तदाहं दशगात्रविधौ संलग्नो, दशदिनाभ्यन्तरे एव मामग्रजः कारागारे न्यपातयत् । कारागारे एव और्ध्वदेहिकं कार्यं विहितम् । मम गुरुर्गजानन्दमिश्रो भूपतिं प्रतापशाहं विनिवेद्य कारागारत् मुक्तोऽहं बेतियानगरे निर्वासिने गतवान् ।

भटः १

तत्र स्थित्वा भवान् किं कृतवान् ? स्वदेशे विदेशे च नेपालस्यैकीकरणेऽनेकानि कार्याणि कृतानि । परन्त्वधुना स्वयमेव कारागारे पतितः । कालस्य सर्वे वशाः । समय एव करोति बलाबलम् ।

बहादुरशाहः

(सनिगडो शाहो नटति) तत्र स्थित्वा गौराङ्गाः किं कुर्वन्तः सन्ति, तेषां सैन्यनीतिः कीदृशी, युद्धनीतिः, रणप्रविधिः, नेपालनीतिः कीदृशी इति विचारितवान् । विविधं प्रशासकीयं क्षेत्रं, सैन्यप्रविधिं सैन्यक्षेत्रं च विलोकितवान् । ते चित्रवनं विजित्य त्रितुङ्ग (तनहुँ) पर्यन्तं गन्तुं वाञ्छन्ति स्म । तज्ज्ञात्वा भूपतये उपर्दाङगढी विजयाय अनुरोधं कृतवान् *(रौति, अश्रूणि विमुञ्चति)*

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भटः २

ततस्ततः किम् ? राजपुत्रोऽपि रौति, अश्रूणि मुञ्चति, यथा प्रजा तथा राजा...।

बहादुरशाहः

गौरङ्गास्तत्र गच्छन्ति चेत् नेपालस्यैकीकिरणाभियानं विरम्यते स्म। मम प्रयासेन विवशतया राजा प्रतापशाहोऽभिमानसिंहबस्नेतनेतृत्वे धरानतो मध्यवर्षाकाले आक्रमणाय सेनां सम्प्रेषितवान्। तत्र नेपालस्य जयो जातः।

वैशालीं किल कौशिकीं जलवहां कल्लोलकोलाहलां
वाग्वत्यादिपयोधरां बहुनदीं तीर्त्वा गतो पश्चिमाम्।
हर्यक्षान् गजभल्लुकौ च महिषान् तान् तर्जयन् केशरी
दुर्गं चित्रवने विजित्य सुभटैर्नेपालदेशायितः॥

(बहादुरशाहः परितो भ्रमति। दीपः तिमिरायते। क्षणं शिलायते। वाद्यध्वनिः श्रूयते। पटाक्षेपश्च जायते)

तृतीयं दृश्यम्

स्थानम् - कागारः। समयः - रात्रिः। तृतीयप्रहरः।

(कारागारे बहादुरशाहो भटान् नेपालस्यैकीकरणस्य गाथां श्रावयति)

भटः २

नेपालस्य पश्चिमविजययात्रा पुनः कथमग्रे गता ?

बहादुरशाहः

ममाग्रजो २३ वर्षीयो भूपतिः प्रतापः दिवङ्गतः। रणबहादुरः अल्पे एव वयसि राजा अभवत्। भातृजाया राजेन्द्रलक्ष्मी मां काष्ठमण्डपे आहूतवती। अग्रजः प्रतापो भ्रातृजाया च युद्धं नैव वाञ्छतः स्म। तया सहाऽहं मिलित्वा कार्यमकरवम्।

भटः ३

ततस्ततः किम् ? *(मनसि)* राजकुमारः षड्यन्त्रस्य चक्रे निपतितः, भाग्यहतः कुमारः।

बहादुरशाहः

नेपालस्यैकीकरणे सैन्यसङ्गठनं द्रढयित्वा पश्चिमविजयाय प्रयाणकामोऽहम् किञ्चित् नूतनं कृतवान्। अत आवयोर्द्वन्द्वो जातः। मया सा कारागारे निपातिता। तदनु लमजुङ्गं प्रयाणं विहितम्। तदैव अस्या आमन्त्रणे महोद्दामकीर्तिशाहः वनारसतः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

काष्ठमण्डपमागतवान् । राजपरामर्शदातृभिः सर्वैर्भारदारैः सह विमृष्ट्वा तां कारागारात् मुमोच ।

भटः ३

ततस्ततः किम् ? *(मनसि)* नारीषु स्त्रीप्रज्ञा भवति, तस्याऽहङ्कारे प्रदीप्तोऽयम् ।

बहादुरशाहः

(परितो विलोक्य) अहं पश्चिमदेशानां विजयाय गतवान् । लमजुङ्गोरखामण्डलयोः स्थित्वा युद्धस्य आदेशं निर्देशनं सैन्यपरिचालनञ्च कुर्वन्नासम् । तदैव हनुमतप्रासादस्य स्थितिविपर्ययो जातः । राजमाता मां प्राणदण्डं दातुं शक्नोतीति सम्भाव्य ततः एव बेतियास्थाने गत्वा नेपालस्यैकीकरणाय कालस्य प्रतीक्षां कृतवान् ।

भटः ३

ततस्ततः किम् ?

बहादुरशाहः

(क्षणं विरम्य) तत्रापि मया नेपलस्यैकीकरणाय योजना निर्मिता । गौरङ्गाः कया रणनीत्या रणं विरचन्तः सन्ति, नेपालं प्रति तेषां कीदृशी दृष्टिः ? तेषां नीतिं विलोक्य नेपालस्य रणनीतिः कीदृशी कारयितव्या इति विचारितः । पटना-वनारस-कोलकत्तादिनगरं परिभ्रम्य सर्वा च रणनीतिः, शस्त्रास्त्रं, बम्बास्त्रं, भुसुण्डीयन्त्रं सैन्यशिवरं निरीक्षितम् ।

भटः २

अतः सैन्यसङ्गठने भवतः क्षमता विशिष्टास्ति । स्वयञ्च रणविज्ञोऽसि ॥

बहादुरशाहः

चतुर्णां वर्षाणामन्तरं र्वर्षपश्चात् रणबहादुरस्य व्रतबन्धसंस्कारोऽस्माकं पितृकुले गोरक्षराजप्रासादे सम्पत्स्यमान आसीत् । तदा सर्वे च शाहवंशीया गोरखाराज्यस्य कैलाशकूटे स्वर्णकूटस्थ-राजप्रासादे समाहूताः । तदा दिशाविदिशातः, रणभूमितः, सैन्यशिविरतः, निर्वासनतः पितृभवनं समागताः शाहवंशीयाः, तदाहमपि गतवान् । तत्रैव शाहवंशस्य विशालो जनौघः संहत आसीत् ।

भटः ४

ततस्ततः किम् ?

बहादुरशाहः

पितृभूमितोऽहं काष्ठमण्डपे गतवान्, पुनर्नेपालस्यैकीकरणे सक्रियो जातः । राजमाता

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वकीयस्य पुत्रस्य बालत्वात् युद्धं नैव वाञ्छति स्म । युवा पुत्रो राजसिंहासनमलङ्कृत्य स्वयं विजययात्रायां गच्छतु, स्वयं सेनापरिचालनं करोतु, स्वयं मित्रराष्ट्रैः साकं मित्रलाभसन्धिविग्रहं करोतु इति वाञ्छासीत् तस्याः ।

भटः १

ततस्ततः

बहादुरशाहः

मया गौराङ्गस्य रणनीतिरधीतासीत् । अतो राष्ट्रस्य एकीकरणे विलम्बिते सति पश्चिमस्थान् देशान् गौराङ्गसेना निगलिष्यति इति मम मनसि निश्चय आसीत् । पुनश्चाहं पश्चिमविजयाय सज्जः । एकीकरणाय सा नैच्छत् । पुनश्चावयोर्द्वन्द्वो जातः । तयाहं फर्पिङस्थे कारागरे निपातितः । तदैव रणबहादुरस्य राज्याभिषेकोऽपि जातः ।

भटः ३

भवान् सदैव नेपालस्यैकीकरणाय चिन्तितः परन्तु भवन्तमेव दण्डयति नियतिः ।

बहादुरशाहः

राजमाता राजेन्द्रलक्ष्मीः दिवङ्गता । कारागारतो मुक्तोऽहं राजप्रतिनिधिपदे नायवीपदे च नियुक्तः । तदा मम सम्पूर्णं ध्यानं नेपालस्यैकीकरणे जातम् । नूतनानां गुल्मगणपृतनादीनां सङ्घटनं विहितम् । सैनिकानां सङ्ख्या वर्धिता । ते प्रशिक्षिताश्च । शस्त्रास्त्रादीनां भण्डारणं विहितम् । फ्रान्सदेशतः वैज्ञानिकान् समाहूय शस्त्रनिर्माणशाला स्थापिता । अतःपश्चात् कालवारवेलां निरीक्ष्य पश्चिमे प्रयाणं विहितम् ।

भटः १

ततस्ततः किम् ? *(मनसि)* राजकुमारस्य हृदये विशालनेपाल एवास्ति ।

बहादुरशाहः

पारावारतरङ्गभङ्गगतिना सेनागताः पश्चिमे
शैलान् तैः परिलङ्घ्य दुर्गसहितान् वायोर्बलैर्धाविताः ।
आरण्यान्, ननु ग्रामजान् नरवरान् विश्वाससेतुं मुदा
मानं स्नेहमयं विभाव्य मनसा युद्धे च जेताऽभवम् ॥८॥
विप्राः तीर्थपरायणा यतिवराः सन्यासिनो व्राजका
ग्रामं ते परिभ्रम्य भूपपरितः कौटिल्यनीत्या तदा ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सर्वान् मोहितवान् तदा ह्यरिगणान् गोरक्षनाथो यतिः
कालीकालततिर्नराँश्च सकलान् व्यामुह्य जेताऽकरोत् ॥९॥

गौराङ्गैः सह साम-दान-दण्ड-भेद-सन्धिकूटनयेन योद्धव्यं भवति। तत् सर्वं पित्रापि विहितं, मयापि विहितम्। मन्त्रयुद्धं कूटयुद्धं बहुवारं विहितम्।

भटः २

(परितो परिभ्रम्य) राजसभायां भवत उपस्थितिमात्रेण सदस्या सावधाना भवन्ति स्म। सर्वे भवति पृथ्वीनारायणस्य आकृतिं पश्यन्ति स्म। सैन्यशिविरे समरे वा भवत उपस्थित्या ते सावधानतया चित्रायन्ते स्म। भवतो नाममात्रेण वैरिणः पलायन्ते स्म। भवतो राज्यव्यवस्थायां सर्वत्रानुशासनस्य मर्यादायाः सदाचारस्य, सद्व्यवहारस्य च पालना भवति स्म। परन्त्वद्य...*(भृशं दुःखितः स रौति)*।

बहादुरशाहः

(सोद्वेगं परिभ्रम्य) जयतु जयतु नेपालः। जयन्तु जयन्तु नेपालिनः। महाराज ! मां युद्धक्षेत्रे सम्प्रेषय, ब्रह्मपुत्रतो गङ्गापर्यन्तं नेपालं विस्तारयामि। भवतः सिंहासनमकण्टकं कारयामि। मम धर्मपत्न्यौ, सन्ततयश्च तत्रैव नेष्यामि, आस्माकं जीवनं मरणं वा तत्रैव रणक्षेत्रे भवितु। शत्रुरक्तपानाय बुभुक्षितोऽयं खड्गः तत्रैव रणे चम्चमायते।
(खड्गं समुत्थाय भीषणं रूपं दर्शयति। वाद्यं गीतं विविधध्वनिश्च श्रूयते।)
(क्षणान्तरं तत्र पूर्ववद् घनतिमिरमस्ति, तैलदीपस्य मधुरं दृश्यं रङ्गे दृश्यते। श्यालस्य, कुक्कररोदनस्य, उलूकस्य, मार्जाररोदनस्य च ध्वनिश्श्रूयते। झिल्लिकीटस्य ध्वनिश्च श्रूयते। बहादुरशाहो निद्रायामस्ति। सैनिकाश्च परितः सन्ति। निद्रायां विलपति बहादुरः)

बहादुरशाहः

पितुः निर्देशनमस्ति विशालं, बलिष्ठं नेपालं विरचय्य एव विश्रामं कुरु। नेपालसिंहासनस्य रक्षां कुरु। तस्मिन् सिंहासने अहं भविष्यामि। तत्र मां पश्य, मम बिम्बं पश्य। पितः अहं रणबहादुरेऽपि भवन्तं पश्यन्नस्मि। परन्तु स नेपालरक्षकं, शत्रुमर्दकं मां मम रणनीतिं नैव जानाति। भवतो नेपालस्यैकीकरणमभियानं मयाग्रे सारितं परन्तु स रहस्यं न जानाति, तस्य आन्तरिकीं नीतिं कूटनयं, बाह्यनयञ्च न जानाति। स षड्यन्त्रे निपतितः।

भटः १

किं बहादुरशाहः तन्द्रायां विलपन्नस्ति। *(मनसि)* राजकुमारस्यापि इयं दशा भवेच्चदस्माकं का कथा ? कुमारस्य नेपालस्यैकीकरणायास्य योगदानन्तु

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रशंसनीयमस्ति। अस्य शीलस्वभावो, रणे निर्भयता, युद्धनीतिश्च पित्रा सह मिलति। परन्तु ....वाराङ्गनेव राजनीतिरनेकरूपा।

(क्षणं रङ्गे शून्यता प्रतिभाति। विविधध्वनिः श्रूयते)

बहादुरशाहः

(तन्द्रायां) गौरङ्गाः उन्मत्तेन जवेन भारतवर्ष निगलिष्यन्ति। अतो नेपालस्य रक्षायै, नेपालस्य विस्ताराय च चीनदेशेन साकं सम्बन्धं सुमधुरं कर्तुमहं चीनगन्तुं वाञ्छामि स्म। गौराङ्गैः सह कूटनीतिक-सम्बन्धस्याभिनयञ्च कर्तव्यमासीत्। द्वयोर्देशयोः सन्तुलितसम्बन्धेन एकीकरणं, विस्तरणं, सबलराष्ट्रनिर्माणञ्च सम्भवति।

(रङ्गे क्षणं निस्तब्धो जायते। क्षणं विरम्य वाद्यादिविविधध्वनिश्च गुञ्जति)।

बहादुरशाहः

(निद्रायां विलपति) आसवे निमग्नोऽरणो रणबहादुरो नेपालनीतिं नैव जानाति। पिता फत्तेबहादुर! इतिगदित्वा मामाह्वयति स्म, रणनीतिं शिक्षयति स्म। मम दूरदृष्टिम्अविज्ञाय भृशं क्रुद्धो मूर्खो रणबहादुरो मामत्रैव मारयितुं शक्नोति।

यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता।
एकैकमप्यनर्थाय किमुयत्र चतुष्टयम्। (हितोपदेशः)

(तिमिरे निद्रायामेव परितो भ्रमति। भटाः समागत्य पुनश्च शयने शाययन्ति। रङ्गे शून्यं प्रतिभाति। क्षणं गच्छति)

बहादुरशाहः

(स्वप्ने उच्चैः विलपति) गोहरणम्! गोहरणम्! गोहरणम्! जीवय! जीवय! हंहो जीवय! प्राणस्य रक्षां कुरु! प्राणस्य भिक्षां याचे!

भटाः

(भटाः बहादुरस्य पार्श्वे धावन्ति) राजतनय! किमभवत्। वयमत्र स्म। भयं मा कुरु। *(मनसि)* जाग्रतावस्थायां मृत्युभयं स्मृत्वा स्वप्नेऽपि यमराजस्योत्पत्तिर्जाता किम्?

बहादुरशाहः

(स्वल्पप्रकाशे शरीरमोष्ठौ कम्पमानौ स्तः। स भटान् आश्लिषति) मया भयदः स्वप्नो दृष्टः। वधिका नवकोटे नीत्वा प्रथमं भृगोः शिरात् मामपातयन्। ततोऽप्यहं जीवितवान्। पुनर्मां मारणाय त्रिशूलनद्यामपातयन्। ततोऽप्यहमजीवम्। पुनश्चाहमत्रानीय तैलकुण्डे निपातितः। ततोऽपि जीवितः। दण्डेन बहुवारं ताडितः, तथापि जीवितोऽहम्। क्रुद्धो

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वधिकः खड्गेन मम शिरश्छेदनं कृतवान् । तदैव निद्राभङ्गो जातः । मृत्युर्मत्तो बिभेति स्म । अद्याहं बिभेमि । मारयन्ति माम् । विद्यालक्ष्मि ! माधवप्रिये ! हा विद्ये ! हा माधवे हा हतोऽस्मि प्राणवल्लभे !

(बहादुरः क्रमशः मूर्च्छाङ्गच्छति । प्रकाशपुञ्जो बहादुरतः सरति । प्रकाशस्यछायायां पत्नीपुत्रादयो विलोक्यन्ते । श्वेतवस्त्रे विद्यालक्ष्मी, माधवप्रिया, पुत्राःशत्रुभञ्जनो रिपुभञ्जनः, कृपाभञ्जनशाहश्च । तनये सुकीर्तिः सुरभी च । सर्वे रुदन्तः सन्ति) ।

विद्यालक्ष्मीः

(रुदति, अश्रूणि विमुञ्चति) पृथ्वीतनय ! भवान् कतिवारं रणक्षेत्रं गत्वा युद्धं कृतवान् । भवतो प्राणाः तत्रैव मुक्ताः अभविष्यन् तद्गौरवाय भवति स्म । राजपुत्री, राजपत्न्यहमपि कतिवारं रणे गतवती, युद्धं विहितवती । तदैव मम मरणमभविष्यत् तर्हि गौरवं जायते स्म । एतादृशं जीवनं मरणं वा न गौरवाय कल्पते ।

खड्गं हस्ते किल कृतवती युद्धक्षेत्रं गताहं
शीघ्रो वाजीटकटकरवं मुक्तवान् धाविताहम् ।
युद्धेऽनेका त्वरितगतिना मारिताः शत्रुसैन्या
जाता कालीव रणशिखरे वीरसूर्वीरपत्नी ॥१०॥

(परितो भ्रमति, घनघटां जटां विमुञ्चति, वस्त्राणि पवने उड्डीयन्ते, कदाचित् रौति, कदाचिद्धसति, हस्ते खड्गं समादाय रणचण्डिकायाः अभिनयं करोति । क्रमशः शिलायते)

माधवप्रिया

स्वामिन् मे रणवीरको रणजयी युद्धस्य जेताऽभवत्
नेपालस्य हिमांशुरेव शशिवत् राष्ट्रस्य नेताऽभवत् ।
दुष्टैः क्षुद्रजनैश्च मारितमहो षड्यन्त्रचक्रेऽपतत्
षड्यन्त्राच्च विनश्यति स्वभवनं राष्ट्रस्य दीपो गतः ॥११॥

महाराज ! मां बहुस्नेहं करोति स्म, सः पत्नीतोऽधिकं राष्ट्रस्य स्नेहं करोति स्म, राष्ट्रस्यैकीकरणाय विशालाय राजकीयं सौविध्यं परित्यज्य रणक्रीडनं करोति स्म । परन्तु ....। कोऽस्य राष्ट्रस्य धुरं वक्ष्यति ? यस्य छायामात्रेणापि प्रासादस्य कापुरुषा बिभ्यति स्म । अहमपि यस्य दर्शनमात्रेणपि विश्वसम्राजः पत्नीति अनुभूय वीरसूर्वीरपत्नीत्वेन गौरवमनुभवामि स्म । परन्त्वधुना सर्वं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वैपरीत्यम् !

(परितो भ्रमति । सघनां जटां विमुञ्चति । खड्गनृत्येन वैरीन् निसूदयति । कालीवद् रक्तजिह्वां दर्शयति । सरौद्रं नयने विष्फारयति । शोकवीरभावयोः सखड्गं नृत्यन्ती शिलायते । रङ्गे शोकसूचकं वाद्यं ध्वन्यते ।)

सन्ततयः

(कदाचित् पितुः सन्निकटे कदाचित् मात्रोः निकटे रुदन् रुदन् गच्छन्ति ।) हा पितः ! अस्मान् शिशुपुत्रान् पुत्र्यश्च परित्यज्य कुत्र गतः, समरे गतः ! भैरव ! भीमशासन ! विलोकय अस्मान् । रुदन्त्यौ मातरौ पश्य । एतत् जीवनं वा मरणम् ! त्वं जीव । अस्मान्नपि जीवय, राष्ट्रमपि जीवय ! नो चेत् तेऽस्मान् घातयिष्यन्ति पितः *(रङ्गे परिभ्रम्य शिलायन्ते)* ।

बहादुरशाहः

(निगडबन्धो सखड्गो बहादुरशाहो व्युत्थाय रङ्गे परिभ्रमति) राष्ट्रघातकाः कुत्र गताः ? ते मां मारणाय समुद्यताः सन्ति । नेपालजननी भयविह्वलास्ति । परितो वैरिणः सन्ति । अहं जीवेयं म्रिये वा नेपालस्य जयो भवतु *(हस्तात् मृत्तिकां पातयति)*, नेपालो विशालो भवतु, नेपालः सुदृढो भवतु । नेपालिनः समृद्धशालिनो भवन्तु, सुखिनो भवन्तु । आकल्पं जीवतु नेपालः, आकल्पं जीवन्तु नेपालिनः । नेपालजननीं वन्दे (साष्टाङ्गदण्डपातेन नेपालजननीं प्रणमति) चन्द्रसूर्याङ्कितध्वजाऽऽकल्पमलङ्करोतु नेपालम् ।

(राष्ट्रध्वजां समुत्थाप्य परिभ्रम्य च एकेन जानुना भूमिं स्पृट्वाऽअपरपादमाकुञ्च्य स्थिरो भवति । विविधवाद्यं गीतञ्च श्रूयते । पटाक्षेपश्च जायते । नेपथ्ये भयदो ध्वनिश्च श्रूयते)

चतुर्थं दृश्यम्

समयः- सूर्योदयानन्तरम् । स्थानम् - विष्णुमत्याः निकटम्

(केचन पौरवासिनः चत्वरे स्थित्वा परस्परं विमृशन्तः सन्ति । पृष्ठभागे स्वयम्भूशिखरं स्तूपश्च दृश्यते । तस्यापि पृष्ठभूमौ नागार्जुनः शिवपुरीशैलश्च विलोक्यते ।)

किसनजर्गामगरः

अद्य राजकुमारो बहादुरशाहः आत्महत्यां कृतवान् इति श्रूयते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दिवानराई

मयापि एतदेव श्रुतम् । वीरः कथं तत्कर्तुं प्रभवति, रहस्यमयं प्रतिभाति ।

धनमानगुरङ्गः

नाहं विश्वसिमि, बहादुरशाह आत्महत्यां कृतवान्निति । अत्र रहस्यं स्यादित्यहं मन्ये । विदुरस्य शेरबहादुरस्य च षड्यन्त्रे रणबहादुरो निपतितः इति मदीया धारणास्ति ।

लक्ष्मीनारायणअर्यालः

पृथ्वीनारायणस्य द्वितीयोऽवतारो नेपालस्यैकीकरणस्याभियन्ता कूटनीतिज्ञो बहादुरशाहः कथं आत्महत्यां कर्तुं प्रभवति ? स बलपूर्वकं निगृहीतः, कारागारे निपातितः । नवकोटप्रासादस्य कालकोष्ठे स्थानान्तरितः शाहस्तराइभागस्य जमलाप्रदेशस्य च कारागारे प्रक्षिप्तवानिति श्रूयते । एतत् षड्यन्त्रम् ।

श्याममहर्जनः

मम गृहं कारागारस्य निकटे एव । रात्रौ निशान्तसमये कारागारात् चीत्कारस्य ध्वनिः समायातः । गोहरणम् गोहरणम्, मां जीवय मां जीवय इति च ध्वनिर्मया श्रुतः । नेदं प्रकृतमरणं । नायकस्य हत्या जाता ।

लक्ष्मीधरकट्टेलः

(परिभ्रमन् सकरुणया गायति, करुणावाद्यं च श्रूयते)

पृथ्वीभूपवरस्य वीरतनयो ह्यासीत् बहादूरकः
शाहो वै रणवीर–कूटनयविन्नेपालभूषोऽभवत् ।
'बाईसी' इति 'चौबिसी' च कथितान् देशांश्च स्वल्पान् मुहु–
र्युद्धं घोरतरं विधाय नृसुतो ह्येकञ्च राष्ट्रं व्यधात् ॥१२॥

पाण्डे

पाल्पाराजसुतां विवाह्य रणविद् शक्तिं समार्जत् त्रयीं
सैन्यं द्रव्यबलं च मित्रसुबलं नेपालपक्षेऽभवत् ।
वीरैः सैन्यबलैः रथी ह्यमरसिं नेतृत्वकर्तुं गतः
सर्वान् भूपवरान् रणेऽथ जितवान् रामस्य सैन्यं यथा ॥१३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गायकः

बाल्ये तं जननी विहाय निगता देशाच्च निष्काशितः
योद्धा राजकुमारवीरनयविद् राज्ञा सदा घातितः।
कारागारनिपातितः समरविद् भ्राता मुहुः ताडितः
इत्थं राजसुतस्य वै भवति चेत् भाग्यस्य का का गतिः ॥१४॥

गायिका

यं दृष्ट्वा रिपवो जवाद् भयवशात् धावन्ति वैदेशिका
राजानोऽपि नुता नतेन शिरसा यं प्रार्थयन्ते मुदा।
प्रासादेऽपि सुशासनं विदधति प्रोच्चैः सदा गर्जति
पृथ्वीभूपवरस्य वीरतनयो बाहादुरोऽभूद् दृढः ॥

खनालः

चीनः साधु पराजितश्च समरे मूकोऽभवत् तिब्बतो
देशे शैत्यहिमे कृतश्च समरो युद्धे दिगर्चा जिता ॥
कैलाशञ्च सरोवरं विजितवान् नाकेऽप्यसौ सुन्दरं
दौर्भाग्याच्च पराजितः स्वनिलये नेपालचन्द्रो गतः ॥

बस्न्यातः

प्रासादस्य निकृष्टदुष्टपुरुषैः षड्यन्त्रकार्यं कृतं
सत्यं तथ्यगतं विचार्य न तदा पापेन वन्दीकृतः।
सौवीरः किल चिन्तको रणविदां नेपालज्योत्स्नाकरो
दौर्भाग्येण वृथान्तरायपतितश्चास्तङ्गतो भास्करः ॥

॥ इति पाराशर्य-नवराजकट्टेलविरचितं बहादुरशाह-नाम नाटकम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भानुभक्तीयम्

पात्रपरिचयः

भानुभक्तः : धनञ्जयस्य पुत्रः धनः : भानुभक्तस्य सहयोगी
गजाधरपत्नी : गजाधरपत्नी पुत्रवधूः : शिवलालस्य पत्नी
मातुलः : भानुभक्तस्य मातुलः मातुली : भानुभक्स्य मातुली

स्थानम् - सोतीग्रामस्य पदमार्गः । समयः - अपराह्नः ।

प्रथमं दृश्यम्

(दिनान्तोऽपि घोरेऽरण्ये हिण्ड्यमानौ स्तः । मार्गे चत्वरो दृश्यते तत्रैव विश्राम्यतः । क्लान्तौ तौ स्वेदस्य वस्त्रेण प्रोञ्छनं कुर्वतः । तत्र भारश्च दृश्यते । रङ्गे प्रकाशः मन्दं मन्दं भूत्वा क्रमशः तिमिरतां परिणमति । रङ्गस्य पृष्ठे विविधा ध्वनयः श्रूयन्ते ।)

भानुभक्तः

(परितो विलोक्य, क्षणं विरम्य) क्लान्तोऽसि धन ! क्षणं तिष्ठ, वायोः शीतलतामनुभव। किञ्चिद् दूरे जलधारास्ति, तत्र शैत्यं सुस्वादुतरं जलं प्रवहति, जलं पिब । अस्मिन् जलपात्रे ममार्थमपि जलमानय ।

धनः

(जलपात्रं गृह्णाति) जलं पिबामि, अस्मिन् पात्रे आनयामि च ।

भानुभक्तः

(परितो विलोक्य) विलम्बो जातः, रात्रौ अरण्यमार्गः कष्टकरो भयदश्च भवति । मार्गे व्याघ्रादयोऽपि आगन्तुं शक्नुवन्ति । कदा प्राप्यते मित्रस्य गृहम् ! मित्रं गृहेऽस्ति न वा !

धनः

(जलं ददाति) आचार्यवर ! कति दूरं वर्तते ? निशामुखे अरण्ये स्वः । मार्गस्यानुमानमपि न भवति । घोरारण्ये जन्तूनां भयमपि भवति ।

भानुभक्तः

अतिदूरं नास्ति । घटिकाद्वयं यावत् हिण्डित्वा प्राप्यते मित्रस्य गृहमित्यनुमानम् । यदि विभिन्नविषये वार्तादिकं क्रियते चेत् पशुभयमपि गच्छति । कालक्षेपोऽपि भवति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धनः

(हासयति) भवतः पितुः नाम किं ? पितामहस्य किं नाम ? के च ते ?

भानुभक्तः

पिता धनञ्जयः आचार्यः, पितामहः श्रीकृष्ण आचार्यः। पिता सर्वकारस्य सेवायामस्ति। अतः पितामह एव मामपाठयत् ।

धनः

(विलोक्य) तर्हि भवतः वंशे बहवो विद्वांसः जायेरन् । भवतो वंशपरम्परा कीदृशी अस्ति । कुतो भवतो पूर्वजाः त्रितुङ्गक्षेत्रे समागताः ?

भानुभक्तः

आम्, सत्यमेतत् । गोरक्षनृपतिः पृथ्वीनारायणशाहः खलु नेपालस्यैकीकरणं कृतवान् । तस्य सन्ततयो राज्यं कुर्वन्तः सन्ति, तेऽधुना काष्ठमण्डपे निवसन्ति । अस्माकं पूर्वजास्तु प्राचीनकालादेवात्र सन्ति । प्राचीनकाले खलु नेपालस्तपोवनं कथ्यते स्म । अत्र तपस्विनो निवसन्ति स्म । श्रृणु –

कृते सत्यपुरी ज्ञेया त्रेतायां तपोवनम् ।
द्वापरे मुक्तिसोपानं कलौ नेपालिका पुरी ॥
नेनाम्ना मुनिना यस्मात् पालितं पुण्यकर्मणा ।
क्षेत्रं हिमवत्कुक्षौ ततो वै नेपालसंज्ञकम् ॥ (हिमवत्खण्डः ७२।६४)

धनः

(क्षणं विरम्य) नेपालस्येतिहासस्तु दीर्घतरो दृश्यते । तथैव भवतः पूर्वजानामितिहासश्च दीर्घततरो भवितुमर्हति । प्रकाशयतु भानुः ।

भानुभक्तः

(शिरो हस्तौ च प्रचाल्य) अस्माकं पूर्वजाः पश्चिमतः सिञ्जासाम्राज्ये ततः त्रितुङ्गे समागतवन्तः । सिञ्जासांम्राज्ये कदाचित् राजा रणकेशरो धर्मपूर्वकं राज्यधूरं वहति स्म । स चैकदा राजसूययज्ञं कर्तुं प्रारब्धवान् । तदैव क्षत्रियानुशासितस्य राज्यमन्विषयन्तौ कान्यकुब्जतः सच्चिदानन्दोपाध्यायभट्टः, सदानन्दोपाध्यायभट्टश्च समाययौ । सच्चिदानन्दः मन्त्रबलेन राजसूययज्ञे अग्निं प्रदीप्तवान् । अत आचार्यपदञ्च लेभे ।

धनः

(हसति) आचार्येषु एतादृशी शक्तिरस्ति । ततस्ततः किम् ?

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भानुभक्तः

(परितो नटति) सच्चिदानन्दस्य एकोनविंशतितमवंशजस्य श्रीकृष्णशर्मणो ज्येष्ठसुपुत्रः काशीरामो ढोरराज्यस्य मिचाखाणस्याश्रये स्थित्वा जन्मवंशं विद्यावंशञ्च ततान। काशीरामस्य पञ्चदशतमवंशजो गोकुलो हरिनाथश्च लमजुङ्गे गतवन्तौ आस्ताम्। मुकुन्दसेनस्य समकालिको विष्णुहरिर्दायविभागे भृङ्गीसेनस्य आधिपत्ये त्रितुङ्गराज्ये समागतवान्। तस्यैव सन्ततयो वयम्।

धनः

भवतः पूर्वजानामितिहासरेखा तु वक्रतरा, नेपालस्य नद्य इव। ततस्ततः किम्?

भानुभक्तः

मम पिता धनञ्जयः, तस्य पिता श्रीकृष्णः, तस्य पिता अग्नीश्वरः, तस्य पिता बालानन्दः, तस्य पिता ऋषीश्वरः, तस्य पिता स्थानेश्वरः, तस्य पिता मणिकण्ठः, तस्य पिता विष्णुहरिः, तस्य पिता इन्द्रमणिः, तस्य पिता सुनन्दः, तस्य पिता सूर्योपाध्यायश्चेति।

धनः

(परिहासं करोति) भवतो वंशपरम्परायाः इतिहास्तु दीर्घतरोऽनुभूयते।

भानुभक्तः

अस्माकं पूर्वजाः अस्मिन् हिमालयस्य कुक्षिभागे सहस्रेभ्यो वर्षेभ्यो नैरन्तर्येण तिष्ठन्तः सन्ति। आर्षकाले च अत्र बहवो ऋषयः तपस्थलं चक्रुः।

धनः

पराशरस्य आश्रमो वेदव्यासस्य जन्मभूमिश्च त्रितुङ्गस्य व्यासगुहेति जना कथयन्ति।

भानुः

सत्यं, जनाश्च कथयन्ति शास्त्रेषु च सूचना मिलति। अनेके ऋषयः अत्रैव पुण्यभूमौ तपोवने समागत्य तपस्तेपुरिति शास्त्राणि वदन्ति, शास्त्रकारा लिखन्ति च।

> द्वैपायनो भृगुपराशरयाज्ञवल्क्याः
> वाल्मीकिगौतमवशिष्ठसनातनाश्च।
> कात्यः, पतञ्जलि-मरीचि-नृपादयश्च
> तेपुस्तपो बहुतरं नयपालके हि॥

धनः

(हासयति) पण्डितः किं कथयति नाहं जाने। अन्यच्च कथयतु भवान्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भानुभक्तः

सर्वे च ज्ञानसहिता ऋषयो वसन्ति
ध्यानं विधाय सततं प्रकृतौ रमन्ते ।
नद्यः सुशैलवनकुञ्जनिकुञ्जशोभा
राराजते हिमगिरौ प्रकृतिप्रदेशे ॥

धनः

(क्षणं विरम्य, हासयति) पण्डितप्रवर ! व्याघ्रस्य ध्वनिश्श्रूयते, व्याघ्रस्य छाया दृश्यते । पश्य, पश्य । वृक्षस्य छायायां निलीनो भूत्वा तिष्ठाव । व्याघ्रः पण्डितापण्डितयोर्भेदं नैव जानाति । (भीतौ तौ भित्तौ निलीयेते । छायायां व्याघ्रौ गच्छन्तौ स्तः ।)

भानुभक्तः

मौनेन स्थीयते चेत् किमपि न करोति । सर्वे च जन्तवः प्रायो भयबोधं कुर्वन्ति चेत् आक्रामन्ति । अहिंसा प्रतिष्ठायां सर्वभूतवैरत्यागः ।

धनः

अस्माकं ध्वनिना मृगाः पलायिताः । व्याघ्र आखेटं कुर्वन् भवेत् । वानरा उत्प्लवन्तः सन्ति । अस्मिन् घोरेऽण्ये तु भल्लुकाश्च निवसन्ति, भ्रमन्ति च । ते नरान् आक्राम्यन्ति ।

भानुभक्तः

(मनसि) भयेन मूर्च्छाङ्गतो भवति चेत् अनर्थो जायते । उत्साहो दातव्यः । *(सस्वरम्)* न भेतव्यम् । तेऽपि विचारवन्तः सन्ति । भयेन स्वसुरक्षायै आक्रमणं कुर्वन्ति नो चेन्न । श्रृणु-

व्याघ्रादयोऽपि पशवो नु विचारवन्तः
तेषां स्वकीयसमजे नियमा भवन्ति ।
ज्येष्ठादयः किल पराक्रमशीलवन्तः
बुद्ध्या च शासति तदीयपराक्रमैश्च ॥

धनः

(हास्यचेष्टया) पश्यतु श्रृणोतु च भल्लुकस्य ध्वनिः । निकटे एवास्ति भल्लुकः सावधाननतया हिण्डितव्यम् ।

(किञ्चित् पश्चात् भल्लुकस्य समूहो दृश्यते, तौ भित्तौ छायायां लीनौ स्तः निःश्वासं कुर्वन्तौ गच्छतः ।) ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भानुभक्तः

(व्याघ्रभल्लुकादीनां भयं गतम् । तदा सः क्लान्तं मलिनश्च दृश्यते) धन ! निशामुखो समागतः । सन्ध्यायां पक्षिणः नीडे प्रत्यावर्तिताः । पश्य, अधोभागे नदनदीनां, वनोपवनानां, कृषिक्षेत्राणां, उत्तरस्यां दिशि हिमालयस्य च सुन्दरं दृश्यं मनोहरं विभाति । आवाभ्यामपि कुत्रचित् स्थातव्यम् । *(क्षणं विरम्य, परितः पश्यन्)*

अस्ताचले दिनकरः पशुपक्षिणश्च
गोष्ठालये स्वरचिते किल नीडमध्ये ।
कुर्वन् मनोहरयुतं मधुरं सुगानं
सर्वे गताः कलरवं कलयन् कलापम् ॥

धनः

(क्षणं विरम्य हास्यभावेन) भवान् तु कविरस्ति यदि प्रकृतिकुक्षौ कवयितुं प्राप्यते चेत् बुभुक्षाया, रात्रेः दिनस्य च विस्मरणं जायते । कविताकामिन्येव मनसि नरीनृत्यति । गन्तव्यं शीघ्रं गन्तव्यं, निकटे ग्रामो नास्ति ।

भानुभक्तः

पश्य, परितः प्रकृतेः छटा कीदृशी सुन्दरी अस्ति ?

नद्यः वहन्ति सततं शिखरात् दिनान्ते
तस्यां दिवाकरकरैर्ननु रागलिप्ताः ।
सिन्दूररागलसितोऽथ हिमालभाले
सर्वेऽधुना ह्युभयथा च मनोहरन्ति ॥
(क्षणं विरमति । चेष्टया हासयति च)

धनः

गच्छाव ! गच्छाव ! अत्र ग्रामो निकटे नास्ति । अत्र भल्लुकस्य व्याघ्रस्य च भयं भवति । कदा हरिणाः वानराश्च मिलन्ति । शीघ्रं हिण्डामहे । *(निर्गच्छन्तः)*

द्वितीयं दृश्यम्

समयः – सुघनसन्ध्या । स्थानम् – गजाधरस्य गृहाङ्गणम् ।

(रङ्गे तिमिरमाच्छन्नमस्ति । झिल्लिकीटानां गवां, महिषाणाञ्च ध्वनिः श्रूयते । दूरे कुक्कुरा बुक्कन्ति । पृष्टे छायागृहं दृश्यते)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भानुभक्तः

धन ! त्वं जानासि गजाधरसोतीवरस्य गृहम् । रात्रौ भ्रमो जातः । क्लान्तौ च आवाम् । (मनसि) गजाधरो नास्ति चेत् समस्या जायते । तस्य धर्मपत्नी पुत्रो वा सहयोगं विधास्यतः । किमतितर्केण । *(प्रकटे)* धन !

धनः

जानामि जानामि आगम्यताम् । *(जङ्गालं (बाह्यद्वारं) समुद्घाट्य प्राङ्गणे प्रविशतः)* के सन्ति भो । द्वारं समुद्घाट्यताम् । भो के सन्ति ? *(द्वारं समुद्घाटयति, गजाधरस्य पुत्रवधूः)*

पुत्रवधूः

(क्षणं विलोक्य विरम्य च) कौ भवन्तौ ! कुतः समायातौ ! किं कार्यमस्ति !

भानुभक्तः

(मन्दस्वरेण) निशिथिनी समागता । क्लान्तौ चावां वासाय समागतौ ।

पुत्रवधूः

(क्षणं विरम्य किं कर्तव्यमिव सम्भूय) श्वश्रूः समागच्छति, सा किं कथयति ।

गजाधरस्य पत्नी

(क्षणमुपरितोऽधःपर्यन्तं विलोक्य हुङ्कारं कृत्वा) कौ भवन्तौ ! रात्रौ किमर्थं समागतौ । सज्जना रात्रौ न हिण्डन्ते ।

धनः

(क्षणं परितो विलोक्य) मातः ! चुँदीरम्घायाः श्रीकृष्णाचार्यस्य पौत्रः, धनञ्जयस्य पुत्रः पण्डितो भानुभक्तऽऽाचार्यं नैव जानाति भवति ! अस्य मातुलस्य जयलालस्य भ्रातृजः कलाधरोस्ति । अयं पण्डितः कलाधरस्य व्रतबन्धसंस्कारे मन्त्रदानाय गच्छन्नस्ति ।

गजाधरस्य पत्नी

भानुभक्तो वा मानुभक्तो नाहं जानामि । अर्धरात्रे निद्राभङ्गं कारयतः, हुँ ।

भानुभक्तः

(ससभ्यम्) गजाधरो मम मित्रमस्ति । तेन भणितमासीत् यदि अस्मिन् क्षेत्रे समागम्यते चेत् मम गृहे समागन्तव्यं, स्थातव्यमिति च । अद्य अवसरो लब्धो, मिलनं वार्तादिकमपि जायते इति मत्वा समागतः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गजाधरस्य पत्नी

गजाधरो नास्ति निलये, स कार्यवशाद् बहिर्गतवानस्ति ।

भानुभक्तः

तस्य पुत्रः शिवलालोऽपि भवेत्, सोऽपि जानाति माम् ।

गजाधरस्य पत्नी

पुत्रोऽपि पित्रा सह गतः । अद्य गृहेऽहम्, पुत्रवधूश्च नान्ये । अतो वासो नैव दीयते ।

भानुभक्तः

रात्रिर्जाताऽतो विश्रामाय अनुमतिं न ददाति चेत् ! (मनसि - इयं दारिका हृदयदारिकास्ति, कठोरतमा, मध्यरात्रौ कुत्र गमनीयम्, अनुनयं विनयं कृत्वात्रैव स्थातव्यमिति ।) (प्रकटे) देवि ! तादृशं कठोरवचनं मा वद, चिपिटान्नमस्मत् पार्श्वे विद्यते, जलं ददातु । एकं पलालास्तरणं मिलति चेत् रात्रिर्गमिष्यति ।

गजाधरस्य पत्नी

अपरिचिताभ्यं युवकाभ्यां वासो नैवदीयते ।

भानुभक्तः

देवि ! एवं मा भण । श्रृणु -

रात्रिर्गमिष्यति भविष्यति तन्निशान्तं
भास्वानुदेष्यति प्रकाशयति मार्गचित्रम् ।
वासं च देहि सुभगे रजनीसुराज्ये,
अभ्यागताय कवये श्रुतिकोविदाय ॥
शीघ्रं भविष्यति गतिः शयनान्निशान्ते
कष्टञ्च नैव भवतीं किल कारयिष्ये ।
मातर्वदामि विनयेन नयेन रात्रौ
वासञ्च देहि निलये सुकृतं समीक्ष्य ॥

गजाधरस्य पत्नी

(आक्रोशभावभङ्ग्या) अर्धरात्रे समागत्य निद्राभङ्गं कारयित्वा पीठिकायां वासं पलालास्तरणं च याचेथे । अत्राऽहं पुत्रवधूश्च द्वे एव नार्यौ स्तः । यत्र नार्यौ एव स्तः तत्र अपरिचिताभ्यां युवकाभ्यां वासो नैव दीयते । अतो निर्गच्छतु निर्गच्छतु ।

धनः

(अनुनयपूर्वकम्) अद्य अर्धनिशायां विश्रामाय स्थानं देहि देवि । स्वः प्रातःकाले

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एव आवां गमिष्वावः। गृहस्य बाह्यभागे पीठिकायां वसावः। स्व उषसि एव हिण्डिष्यावहे।

भानुभक्तः

देवि ! समीचीनमेव कथयन्नस्ति धनः। शास्त्रमतिथिदेवो भवेति अनुशास्ति।

गजाधरस्य पत्नी

शास्त्रस्य अनुशासनं नाहं जानामि। शीघ्रं निर्गच्छतु, नोचेत् गलहस्तं कृत्वा निष्काशामि। गच्छ, गच्छ।

भानुभक्तः

गच्छाव गच्छाव। *(धनो भारं वहति। सा हुङ्कारशब्दैः अन्तःप्रविशति, कपाटं चोन्मिलति)*

पुत्रवधूः

(इतस्ततो विलोकयन्ती) श्वश्रूरित्थमेवास्ति। मौनेन तत्र कुटिरे गत्वा वसतु। तत्र धान्यकुट्टकं उन्मथश्च स्तः। सावधानेन भाव्यम्। अजाः शब्दायन्ते। अहं जलं पलालास्तरणञ्च मौनेनानयामि।

(भानुभक्तो धनश्च व्रजतः। कुटिरे क्लान्तत्वेन तिमिरराच्छन्नत्वाच्च भारः पतति, ध्वनिश्च उत्पद्यते। अजाश्च ध्वनिं कुर्वन्ति। पुनः गजाधरस्य पत्नी 'के सन्ति ! उन्मथे किं कुर्वन्तः सन्ति !' इति वदन्ती समागत्य क्रुध्यति।)

गजाधरस्य पत्नी

(कुप्याती सदण्डं) के सन्ति तत्र कुटीरे। मया तु पूर्वमेव कथितं सज्जना रात्रौ न हिण्डन्ते। अजा हरणाय समागता भवेयुः किम् ? अनुमतिं विना अन्येषां कुटीरे बलात् प्रविश्य यथेच्छा तथा कर्तुं पार्यते ? निर्गच्छ निर्गच्छ।

भानुभक्तः

(अधोमुखं कृत्वा) गच्छावो गच्छावः। *(भारं वहति धनः। छायायां वार्तां कुवन्तौ गच्छन्तौ स्तः। कुक्कुराणां, पक्षिणां झिल्लिकीटानां च ध्वनिः समायाति। पर्णकुटीनां, वृक्षाणाञ्च छाया दृश्यते)*

धनः

(स्वेदं प्रक्षिपन्) अतीव कोपना, भामिनी च गजाधरस्य पत्नी। अनया क्रोधमूर्त्या सह कथं गृहस्थजीवनं प्रचलति तस्य। इयं तु अध्यूढा भवितुमर्हति। दुष्टा। निविडतिमिरं जातम्। कुत्र स्थातव्यम् ?

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भानुभक्तः

(परितो विलोकयन्) कदाचिद् दारिका हृदयदारिका भवति। जीवनव्यवस्थायाः धर्मस्य च मूलं आश्रमः। आश्रमस्य मूलं गृहस्थाश्रमः। गृहस्य मूलं गृहस्वामिनी। गृहस्वामिन्याः मूलं सच्चरित्रता। गृहपरिवारस्य लालनं, पालनं, पोषणं शासनञ्च गृहस्वामिन्या भवति।

धनः

ग्रामस्यान्तिमसीम्नि आस्व। ततोऽरण्यरेखा प्रारभ्यते।

भानुभक्तः

(क्षणं विरम्य, सावधानेन श्रुत्वा) तत्र मानवध्वनिश्श्रूयते अत्र पल्लिः स्यात् तत्रैव रात्रौ विश्रामं विधेयम्। अरुणोदये मातुलगृहे गन्तव्यम्।

(रङ्गस्य दीपो मन्दं जायते। हिण्डमानौ तौ छायापुरुषाविव स्तः। रङ्गे शनैः शनैः कलरवः समागच्छति। शनैः शनैः रङ्गे प्रकाशः विकीर्यते। प्रातःकालो जायते।

तृतीयं दृश्यम्

स्थानम् -लमजुङ्गस्य भोर्लेटारस्थ-मातुलगृहम्। समयः - दिनस्य द्वितीयप्रहरः।

(भानुभक्तः किञ्चित् शोचन्नस्ति। कदाचित् शिरः कदाचित् करौ चालयति नर्तकी इव।)

भानुभक्तः

(हस्तेन दर्शयन् परितो ग्रामं विलोयन्) मम मातुलगृहं समागतम्। अत्रैव प्रविश।

मातुलः

भागिनेय! *(परस्परं नमतः)* दूरादपि प्रातःकाले एव कथं समायातः *(आसनं ददाति)*।

भानुभक्तः

आवां सोतिग्रामे कस्यचिद् घोषे स्थित्वा समागता प्रातःकाले।

मातुलः

(नटति) तत्र तु गजाधरसोतीपण्डितस्य गृहमेवास्ति। पण्डितगृहं विहाय कथं घोषे स्थितवन्तौ ?

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भानुभक्तः

(भानुभक्तो धनश्च विहसतौ) तत्र पण्डितस्य गृहन्त्वस्ति । तस्य गृहिणी चास्ति । परन्तु सा कोपना अधर्मस्य मूर्तिरवास्ति ।

मातुलः

ततस्ततः किम् ।

भानुभक्तः

(विहस्य) सा वासं नैव दत्तवती ।

दूराच्च दुःखसहितं वयमत्र प्राप्ता
मित्रस्य सोतिनिलयस्य तु प्राङ्गणं वै ।
क्लान्तेन पण्डितवरेण न वासलब्धः
पत्नी तु तेन नृवरेण न शिक्षिता हि ॥

मातुलः

(परितो भ्रमन् शिरो हस्तौ च चालयन्) तत्र वासोऽपि नैव लब्धः ? तर्हि रात्रौ कुत्र स्थितवान् । भागिनेयेन महत् दुःखं लब्धम् ।

भानुभक्तः

मातुल ! किं कथनीयम् । ग्रामस्यान्तिमे घोषोऽमिलत् । तत्रैव दुःखेन रात्रिं निनाय

वृक्षस्य पत्ररचितासु पीठिकासु
रात्रिर्गता गगनमण्डलभां निरीक्ष्य ।
पाषाणखण्डशयने ह्युपधानपिण्डे
निद्रा-गता च तिमिरे किल क्लान्तदेहे ॥

मातुलः

(नटति) घोषे पर्णकुटीरे निद्रया विना रात्रिर्गता, बुभुक्षया च भृशं पीडितः प्रातःकाले एव समागतो भागिनेयः !

भानुभक्तः

गजाधरस्य रमणी तु दुष्टैव ।

गजाधरसोतीनां निलयरमणी दुष्टमतिका
नु निर्ऋत्यां गन्तुं ननु ह्यनुमतिं याचितवती ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गतः सन्ध्यायां वै ह्यररनिकटे वासकथितोऽ-

वकृष्टः सन्ध्यायां ननु परतरे वासरचितः ॥

(व्रतबन्धस्योपक्रमे बटुकस्य क्षौरादिकं स्नानञ्च प्रचलदस्ति ।)

मातुली

वटुकं भागिनेयञ्च अत्रैव वेसवारादिकं प्रयुज्य स्नानं कारयामः *(हसन्ति जनाः)* । सन्ध्यावन्दनादिपश्चात् मन्त्रदानपश्चादेव भोजनं भवति ।

मातुलः

क्लान्तो बुभुक्षितो भागिनेयः कथं मन्त्रं श्रावयति ? श्रुणु -

इक्षुरापः फलं मूलं पयस्ताम्बूलमौषधम् ।

भक्षयित्वापि कर्तव्या स्नानदानादिका क्रियाः ॥ (आह्निकसूत्रावली)

फलाहारं कारयतु । दुग्धापानं कारयतु ।

(स्नाने क्षौरकर्मणि च वाद्यं वाद्यते । नेपथ्ये गीतनृत्यादिः सूच्यते । वैदिकमन्त्राणां मानवानां ध्वनिः समायाति । पटाक्षेपश्च जायते ।)

॥ इति पाराशर्य-नवराजकट्टेलविरचितं भानुभक्तीयं नाटकम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

खण्डः तृतीयः
सत्यघटनाश्रितानि रूपकाणि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विश्वपिञ्जरम्

पात्रपरिचयः

कृतिका : सुनीतायाः माता, इटालीदेशात् समागता
सुनीता : कृतिकायाः पुत्री, इटालीदेशात् समागता
प्रथमपात्रम् : सचेतनागरिकः
द्वितीयपात्रम् : सामाजिकाभियन्ता
तृतीयपात्रम् : अध्यात्माभियन्ता
चिकित्सकः : कोरोनाचिकित्सकः
अन्यो वैद्यः : कोरोनाचिकित्सकः
सविता : अन्या सहयोगिनी
नूतनराजः : चिन्तकः

प्रथमोऽङ्कः

स्थानम् - काष्ठमण्डपस्थगृहम् । समयः - कोरोनाप्रकोपकालः, निशामुखम् ।

(कृष्णवस्त्रेणावृताः सप्त मनुष्याकृतयो धूमायिते अतिमन्दप्रकाशे हूहूहू ! हाहाहा ! इति कटुस्वरेण भीषयमाणा नटन्तश्च दृश्यन्ते । पशूनां पक्षिणां च विविधस्वरोऽभिगुञ्जति । 'वयं मुक्ताः ! वयं मुक्ताः' इति वाक्यांशो विश्रूयते । झञ्झावातायते, विद्युतायते, मेघायते रङ्गमञ्चः । ता सप्तमानवमूर्तयः शिलायन्ते । एका विज्ञानमूर्तिर्मौनीभूय तिष्ठति । तिमिरायते रङ्गः । मानवा गृहाभ्यन्तरे बन्दीकृताः सन्तीति परिज्ञायते)

प्रथमपात्रम्

(प्रविश्य साश्चर्यम्) अयि ! भो ! के सन्त्यत्र सर्वे पिञ्जरायिताः, सर्वे शिलायिताः ! *(स्वयं शिलायते)*

द्वितीयपात्रम्

(सोद्वेगं प्रविश्य, तं शिलायितं पुरुषं विलोकमानः) सर्वे शिलायिताः पराजिता मानवसभ्यता ! पराजिता मानवसंस्कृतिः । *(शिलायते)*

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तृतीयपात्रम्

(सोद्वेगं नटति) चीनदेशस्य बुहाननगरमशयिष्ट । मानवप्रकृतिद्वन्द्वे को जेता ! कः पराजितः ! गार्गीं कथयति याज्ञवल्क्यः 'सर्वे अक्षरे ह्याश्रिताः ।' अक्षरा अपि क्षरायन्ते किम् !

प्रथमपात्रम्

(सोद्वेगं नटति) क्रुद्धा खलु प्रकृतिः । कालः कोरोनायमानः । अरणश्च रणायितः । कदाचित् रक्तबीजेन विजीता अवनिः ! कदाचित् कोरुणाविषाणुः उन्मत्तायते । कोरुणा विजयते किम् ! अथ च - *(गायति)*

कोरोना ननु मानवान् प्रतिदिनं सन्ताड्य नृत्यन्नसि
हाहाकारयुतं विरच्य विरवं गीतं च गायन्नसि ।
मुण्डानाञ्च विरागरचितं नृत्यञ्च किं ताण्डवं
विश्वं खादसि किं विनाशयसि किं लेलिह्य जिह्वाग्रया ॥

कृतिका

(सभीतं बहिः समागत्य खिन्नमनसा) अनुजाः ! मौनमाचरणीयं, वयमत्र एकान्तवासे स्थिताः स्म । भवन्तो जानन्ति एव वयं इटलीदेशात् समागताः । विषाणुभयात् तत्रास्माकं सुन्दरं भवनं, वाणिज्यं, सर्वकारीयसेवाञ्च विहायात्र समागताः । परन्तु ... *(रोदिति)*

सुनीता

(सदैन्यम्) इटली-फ्रान्स-जर्मन-ग्रीक-वेलायतादिदेशेषु हाहाकारो विद्यते । अत्र नेपाले शान्तिरासीत्, अतोऽत्र समागतः, परन्तु अस्माकं मौढ्यात् कोभिड-१९ विषाणुरस्मान् स्वागतमकरोत् । पिता, अग्रजौ, पितृव्यश्च एकान्तवासे सन्ति । उपचाराय औषधं नैव निर्मितं, औषधालया न विद्यन्ते, यानानि न चलन्ति, सर्वे मानवा निलये एव निरुद्धाः । *(रोदिति)*

प्रथमपात्रम्

(सदैन्यम्) भगिनि ! मा रुदिहि, वयं स्म, नेपालोऽस्ति, राज्यं जननां हितसाधनाया कार्यं करोति निश्चयम् ।

द्वितीयपात्रम्

(साश्चर्यम्) चीनदेशस्य बुहाननगरे कोरुणाभटैः द्विशतोत्तर-त्रिसहस्रजना घातिताः । अदृश्यभटाः भटभटायन्ते, फटफटायन्ते, न कोऽपि तान् द्रष्टुं शक्नोति, न कोऽपि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तान् ग्रहीतुं शक्नोति ! केन निर्मितो विषाणुः, खलु प्रकृत्या निर्मितः स्यात् । उत मानवनिर्मितः स्यात् ! *(गायति)*

चीने त्वं जनिता प्रकर्षसहिता तत्रैव ते पोषणं
वृद्धिंत्वञ्च गतासि तीव्रगतितो विश्वञ्च वा भक्षसि ।
क्रुद्धे किं तव कारणं वदसि किं कृत्वा दयां मानवान्
स्नेहं त्वं मनुजान् करोषि च कथं ! रुष्टे च के हेतवः ! ॥२॥

प्रथमपात्रम्

(विक्षिप्त इव नटति) अरे श्रुता किम् ! इटालीदेशः पिञ्जरायितः । तत्र स्थिता मानवाः स्वनिर्मिते गृहपिञ्जरे वद्धाः । गृहपिञ्जरात् प्राङ्गणेषु मार्गेषु विपणीषु समागच्छन्ति चेत् ते गोलिकां प्राप्नुवन्ति भोजनाय । गोलिकाभोजनापेक्षया अन्ये भोजनपदार्थाः तुच्छीभवन्ति, नेच्छन्तीन्द्रियग्रामाः अन्यान् पदार्थान् ।

द्वितीयपात्रम्

(साश्चर्यम्) कीदृशी ह्यस्ति गोलिका, एकया गोलिकया स्वोदरं पूर्येत ! स्वर्गात् आपतिता भवेत् । अहमपि बुभुक्षितः, को दास्यति मह्यं गोलिकां, यया ममोदरपूर्तिर्जायेत !

प्रथमपात्रम्

(करुणापूर्वकम्) जानासि पामर ! कोरुणाभटैः इटालीदेशे दशसहस्रं जनाः घातिताः, ते दिवङ्गताः । स्पेनदेशे पञ्चसहस्रं जनाः कोरुणाभटैः व्यापादिताः, ते भटाः कथं समागच्छन्ति, कथं प्राणानपहरन्ति, कथं पलायन्ते न कोऽपि जानन्ति ।

तृतीयपात्रम्

(नटति) अक्षरः प्रणिगदति 'कालः कलयतामहम्' हंहो काल ! किम् उपसंहरसि ! ऋतम्भरा रोदिति ! काऽसि त्वम् ? *(गायति)*

काऽसि त्वं कथमागता ह्यानुगता कीदृक् स्वरूपं तव
दृष्टा त्वं न च मानवैः स्वनयनैः सूक्ष्माऽसि स्थूलाऽसि वा !
कृष्णा किं धवला च स्थूलनयना विश्वम्भरा वाबला
प्राणान् कर्षसि ह्यन्धकारविवरात् भीतासि किं मानवात् ॥३॥

प्रथमपात्रम्

(साश्चर्यं, करुणासहितम्) जानासि किम् ! द्विशतराष्ट्रेषु कोरुणाभटदलं सशस्त्रं प्रविष्टम् । तत्स्वरूपं तच्छस्त्रग्रामं च जना नैव पश्यन्ति, एकेन प्रहारेण जनान्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पातयति, धरायां शाययति । शक्तिसम्पन्नः अमेरिकादेशोऽपि पराजितः, तत्र मार्गेषु, समुद्रेषु, विपणीषु, विद्यालयेषु, विश्वानुसन्धानकेन्द्रेषु च हाहाकारो वर्तते । जनाः इतस्ततः पलायिताः सन्ति । अन्नभाण्डागारं रिक्तम् । जलभाण्डागारं रिक्तम् । वायुजलान्नमयं शरीरम् । प्रपूर्णे सत्येऽपि द्रव्यभाण्डागारे प्राणान् को धारयिष्यति । *(शिलायते)*

द्वितीयपात्रम्

(शिलायितात् चेतनां सम्प्राप्य) अमेरिकादेशोऽपि पराजितः ! कीदृशं कोरोणाभटदलम् ! अमेरिकापि पराजितः । यस्य पार्श्वे अपरिमितानि क्षेप्यास्त्राणि सन्ति, अगणितानि शस्त्राणि लसन्ति । यत्र असंख्यानि युद्धपोतानि महायुद्धपोतानि च महासागरे परिभ्रमन्ति, युद्धकविमानानि, बम्बवर्षकविमानानि गगने उड्डीयन्ते, स्वचालितानि मानवरहितानि विमानानि पारेसहस्रं परिलसन्ति । प्रकाशगत्या परिधावति सूचनाप्रणाली, एतादृशोपि देशः पराजितः ! *(शिलायते)*

प्रथमपात्रम्

(गगनं विलोकमानो नटति) सर्वे पराजिताः ! लक्षाधिकाः शायिताः । न केवलं अमेरिका अपितु बेलायतदेशोऽपि घातितः रोगेण, प्रधानमन्त्री एव गृहे शायितः । कदाचित् यो देशो विश्वं प्रशास्ति स्म सोऽपि पिञ्जरे बद्धः ।

द्वितीयपात्रम्

(सकारुण्यम्) बेलायतदेशस्य इजरायलदेशस्य च प्रधानमन्त्री एकान्तवासेऽ वसताम् । स्पेनदेशस्य युवराज्ञी मारिया-टेरेसा कोरोना-विषाणुना स्वर्गमलङ्चकार किल । अतः युरोपादिसमृद्धदेशेषु कोरोनाप्रभावो दृश्यते । यथा-

जापाने खलु कोरुणा बहुधने ह्यष्ट्रेलियायां तथा
शास्त्रास्त्राणि लसन्ति यत्र बहुधा तत्रैव सा गच्छति ॥
शक्तिं दर्शयति प्रहत्य मनुजान् सर्वत्र भूमण्डले
घोरो घोरतरश्च कोरुनरुजा मृत्युर्नरीनृत्यति ॥

तृतीयपात्रम्

एकमासाभ्यन्तरे आविश्वं दशलक्षपरिमिता मानवाः अनेन रुजा आक्रान्ताः । पञ्चाशत्सहस्रं जनाः दिवङ्गताः । न जाने ह्यनेन कोरुणेति विषाणुना कतिमानवाः संहृताः भविष्यन्ति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रथमपात्रम्

इटली-स्पेन-जर्मनी-फ्रान्स-बेलायतादिदेशा अत्यधिकरूपेण प्रभाविताः सन्ति। इरान-स्विजरल्याण्ड-नेदरयाण्ड-टर्की-बेल्जियमादिदेशाश्च प्रभाविताः कोविड-१९ इति विषाणुना। अष्ट्रिया-दक्षिणकोरिया-क्यानडा-नर्बे-स्विडेनादयश्च विषाणुना ह्याक्रान्ताः सन्ति।

द्वितीपात्रम्

(परिभ्रम्य) एकमपि राष्ट्रं खलु संसारे कोरुणेति विषाणुना ह्यनाक्रान्तं न। आविश्वं द्विशतं देशाः एव आक्राताः। इटाली-स्पेनादिदेशेषु शवसंस्कारस्यैव समस्या जाता। इटालीदेशे नवतिः पादरीति इशाईधर्मगुरुवः दिवङ्गताः। महामारीव्याधिकारणात् तु शताधिका एव जना एकस्मिन्नेव गर्ते निपात्यन्ते। शवं न केऽपि जना स्पृशन्ति, राज्येन निषिद्धश्च। *(शिलायते)*

प्रथमपात्रम्

प्रलयस्य वेलेयं। संसारः प्रलयं गच्छतु। मानवाः प्रकृतौ लीना भवन्तु। पञ्चपदार्थाः परमाणौ लीन भवन्तु। *(शिलायते)*

द्वितीयं दृश्यम्

स्थानम्- काष्ठमण्डपस्य चिकित्सालयः। समयः - अपराह्नः।

(चिकित्सालयस्य प्रवेशद्वारे कोरोनाव्याधिहताः जना समागच्छन्तः सन्ति। चिकित्सका, परिचारिका च अन्तर्बहिः कुर्वाणाः सन्ति। जना मृताः सन्ति, परिवारस्य सदस्याः रुदन्तः विलोक्यन्ते। जनानां गमनागमने विलोक्येते। रविकिरणः सेवायां संलग्नोऽस्ति। सविता च सेवायमस्ति)

कृतिका

(रुदन्ती, परितः भ्रमन्ती) चिकित्सकमहोदय! मम पुत्रं जीवय! पुत्रीं जीवय! मम पतिं जीवय! एते मम प्राणाः सन्ति। एते मम जीवनं सन्ति। एभिर्विना मया कथं जीवितव्यं भो! एभिः साकमहमपि पञ्चत्वं गमिष्यामि।

(कोलाहलः श्रूयते, आकस्मिकस्वास्थ्ययानस्य ध्वनिर्गुञ्जति)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चिकित्सकः

(सश्वेतप्रवारकः सखेदम्) भगिनि ! वयं मनसा, वचसा कर्मणा च प्रयासं कुर्वन्तः स्म । मा भेतव्यं, मा रोदितव्यम् । अस्य विषाणोरौषधमेव नास्ति । परन्तु वयं प्रयतामहे ।

(केचिद् रुदन्तो गच्छन्ति, स्वजनाः मृता इतिसूच्यते)

कृतिका

(सदैन्यभावम्) मनसि नं शान्तिः, अपशकुनं दृश्यते, औषधमपि नास्ति, कथं मम पतिः, पुत्रो देवरश्च स्वस्थो जायेरन् ! ते सघनकक्षे सन्ति, तत्र गन्तुमपि नैव दीयते हंहो कष्टम् ।

चिकित्सकः

(सदैन्यम्) न भेतव्यम्, उपचारो जायते । एतादृशी एव समस्या पुरा च युगे युगे समापतिता आसीत् ।

(मनसि - यथा ईशवीयवत्सरस्य १६५तः १८० वर्षपर्यन्तं 'एन्टोनिन प्लेग' इति व्याधिना ५० लक्षपरिमिता मनुष्या मारिताः । खीष्टाब्दस्य ९१८ तः ९१९ पर्यन्तं ४-५ कोटिपरिमिता जना रोगेण घातिताः आसन् । अथ च ७३७ ईशवीयवत्सरे दशलक्षपरिमिता जना निपातिताः व्याधिना ।) तथा सत्त्वेऽपि मानवाः सर्वान् रोगान् पराजयमकुर्वन् ।

अन्यो वैद्यः

(श्वेतप्रावारकः, परिभ्रम्य) तथैव १९८१ तमे ईशवीयवत्सरे २-३ कोटिमिता जना व्याधिना मारिता आसन् ।

(मनसि - एवञ्च २००९-१० ईशवीयसंवत्सरे स्वाइनफ्लू-रोगेण द्विलक्षाधिका मानवाः मारिता अभूवन् । ईशवीयवत्सरस्य २०१४तः २०१६ पर्यन्तं मूलतः अफ्रिकादिदेशेषु इबोला इति जीवाणुना जना आक्रान्ताः, एवञ्च ११२०० जना दिवङ्गताः ।) तथैव एच.आइ.भी. इतिरोगेण प्रतिवर्षं लक्षत्रयं जना दिवङ्गच्छन्ति ।

कृतिका

(दैन्यम्) सा इतिहासस्य कथास्ति, इयं मम जीवनस्य विपत्पूर्णा स्थितिरस्ति । पतिहीनं किं जीवनम् ? पुत्रविहीनं किं जीवनम् ? तेषां जीवनस्य रक्षा कथं विधेयेति मम चिन्तास्ति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चिकित्सकः

(सशान्तम्) मा भेतव्यं, तेषां स्वस्थ्यं सुधारोन्मुखमस्ति ।

द्वितीयपात्रम्

(सोद्वेगम्) अयं खलु कोरोणाविषाणुः काल्या घातितस्य रक्तबीजस्य द्वितीयावतार इव लगति। तत्र तु शिरश्छेदनात् पतितात् रक्तबिन्दोः तादृशााः एव रक्तबीजपुरुषाः समुत्पद्यन्ते स्म। अयं विषाणुस्तु (छिक्कयैव शतशो जनान् आक्रामति, घातयति च। यथा शृणु-

कोरोना च विषाणुसूक्ष्मविषयः संघातको घातको
नित्यं नृत्यति रक्तबीजसदृशो हाहामयैर्हुङ्कैरैः ।
नृत्यं ताण्डवकं च मर्त्यशिरसि प्रोच्चैर्महामारक
आविश्वं करुणां विहाय भयदो मुत्युर्नरीनृत्यति ॥५॥

तृतीयपात्रम्

(सोद्वेगम्) अयं घातकशीलो विषाणुः । अस्य प्राक्तन इतिहासोऽपि नास्ति । केचित् प्राकृतिको विषाणुरिति कथयन्ति चेत् केचित् निर्मितविषाणुरिति भणन्ति । केचित् व्याधिमाध्यमेन कृतं धनिकदेशानां व्यापारयुद्धमिति गदन्ति ।

चिकित्सकः

(श्वेतप्रावारकेण साभिनयम्) अयं सञ्चरणशीलो रोगः, एकस्मात् नरात् सहजमेव अन्यस्मिन् नरे सङ्क्रामति। ज्वरः, छिक्का, उत्कासः, शरीरपीडा, वमनञ्च एतस्य रोगस्याभिलक्षणमस्ति । छिक्कादिभिर्जातः क्लिन्नबिन्दुरेव अस्य रोगप्रसारणस्य मूलकारणमिति विज्ञातव्यम्। रुग्णे जने रसनाशक्तिः घ्राणशक्तिश्च विनश्यति इति विज्ञा रोगिगणश्च कथयन्ति ।

तृतीयपात्रम्

(सोद्वेगम्) कदापर्यन्तं इयं परिस्थितिः ? मार्गा अवरुद्धाः, वायुयानानि, रेलयानानि च अवरुद्धानि । बृहज्जलयानम् अवरुद्धम् । अध्यागमनप्रणाली अवरुद्धा । न कोऽपि देशः प्रवेशाज्ञां स्वीकरोति, आविश्वं सर्वे विद्यालयाः विश्वविद्यालयाः पिनद्धाः। मन्दिराणि पिनद्धानि, सभासमारोहोऽवरुद्धः, संस्कारा अवरुद्धाः। किं विश्वं पिञ्जरबद्धम् ? विश्वमानवाः बन्दिनो जाताः। *(सर्वे पिञ्जरीभूता इव शिलायन्ते)* ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृतिका

(परिभ्रम्य) परन्तु अस्योत्पत्तिस्थलं किम् ? कश्चास्य शमनोपायः ?

चिकित्सकः

(परिभ्रम्य) कारोना इत्यस्य 'कोभिड्-१९' इति वास्तविकं नाम अस्ति । अयं रोगश्चीनदेशतः प्रसृतः । चीनदेशस्य वुहानप्रान्ते एका वधशालास्ति । तत्र कुक्कुर-विडाल-ग्राहादिसरीसृपानां मांसानि प्राप्यन्ते । सृष्टौ ये च पशवः सन्ति, ये च पक्षिणः सन्ति, ये च कीटाः सन्ति चीनस्था मानवाः तेषां भोजनं विक्रविक्रयञ्च कुर्वन्ति । तत एवायं व्याधिः समजनीति विज्ञा वदन्ति ।

कृतिका

ततस्ततः किम् ?

चिकित्सकः

(परिभ्रम्य) चीनस्थजना भक्षाभक्षयोश्च विवेचनं नैव कुर्वन्ति । ते चर्पटीखगस्य मांसं मांसरसञ्च खादन्ति, पिबन्ति च । चर्पटीतः एव अयं व्याधिर्मनुष्येषु समागतो, मनुष्येषु एव रमते, मनुष्येषु क्रीडति, आनन्दमनुभवति च । भक्षाभक्षयोः, कर्तव्याकर्तव्ययोः, गमनागमनयो र्विचार एव महामारीशमनोपायः । इन्द्रियजयः, एकान्तवासः कोर ोणाविषाणोः शमनोपायः ।

चिकित्सकः

(नटति) अयं महामारको व्याधिरिति भणन्ति जनाः । विश्वस्वास्थ्यसङ्घः परस्परं वैपरीत्यं वक्तव्यं प्रकाशयति । कोरोना एव जनान् घातयितुं नैव शक्नोति, अन्ये च व्याधयः सन्ति चेत् अयं व्याधिः शक्तिमान् भवति, मर्त्यान् मारयति । अतः नायं महामारकः । मधुमेह-रक्तचाप-हृद्रोगैः आक्रान्तजनान् यदि कोरोनाव्याधिः आक्रामति चेत् तदा जटिलायते उपचारप्रक्रिया । एतस्यां परिस्थितौ रोगिणः दिवङ्गन्तुं शक्नुवन्ति । जटिलपरिस्थितौ अपि ४ प्रतिशतमेव जनाः स्वर्गमलङ्कुर्वन्ति । अतः विज्ञाः तर्कयन्ति नायं महामारीति ।

प्रथमपात्रम्

(नटति) रुजः खलु प्रकृतिरुल्लङ्घनेन एव भवन्ति । मनुष्यो यदा अकार्यं करोति तदा प्रकृतिः क्रुध्यति । कदाचित् अग्निदाहः, कदाचित् चक्रवातस्य विनाशः, कूपारात् वातस्योत्पत्तिर्जायते । वातः मनुष्यान्, गृहाणि, पशून्, मत्स्यान्, मोटरयानादीन् च पातयति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तृतीयपात्रम्

(परिभ्रम्य) कदाचित् समुद्रः तटीयक्षेत्रं प्लावयति, पर्वतीयप्रान्तेषु जलप्रवाहो जनान् घातयति । समभूमौ जलप्लवो नरवसतिं निमज्जयति । कदाचित् भूस्खलनम्, कदाचित् भूकम्पनम्, कदाचित् भूप्लावनम् । प्रकृतिरस्माकं मूलमाता । प्रकृतिरखण्डतत्त्वतो जायते । वयं प्रकृतितः । प्रकृतिरक्षरतः ।

तृतीयपात्रम्

(सोद्वेगम्) केचिद् विज्ञाः अयं विषाणुरेव नास्तीति गदन्ति, अपरे अस्य विषाणोर स्तित्वं स्वीकुर्वन्ति, परन्तु नायं महामारको व्याधिरिति जना वितर्कयन्ति । अन्ये तु अयं भयदो महामारको व्याधिरिति प्रचारयन्ति । गृहाभ्यन्तरे एव पिञ्जरे शुकवत् वस्तव्यमिति गदन्ति, नैतत् समुचितमिति मे मतिः ।

अन्यो वैद्यः

(परिभ्रम्य) मानवैः पारस्परिकदूरता परिपालनीया । सति सम्भवे गृहाभ्यन्तरे एव वस्तव्यम् । बहिर्गन्तिव्यं चेत् मुखावरणं कृत्वा गन्तव्यम् । आपणे, याने, मार्गे, मन्दिरे, सभायां काचिद् दूरतामवलम्व्य स्थातव्यम् । सर्वाणि भोजनानि सुपक्वानि भवेयुः । दुग्धं, तप्तजलं, 'अमृता' इत्यस्य रसं पातव्यम् ।

द्वितीयपात्रम्

(सनुतिः) किं करणीयं भो ! अस्य रोगस्य अस्तित्वं कथं अस्वीकरणम् ? यूरोपदेशीयाः ग्रामे ग्रामे वा नगरे नगरे शवाक्रान्ता, (शवायन्ते), स्मशानायन्ते, शिलायन्ते च ।

(शिलायन्ते)

प्रथमपात्रम्

(सदैन्यभावम्) तत्र समृद्धेषु युरोपादिदेशेषु च हाहाकारोऽस्ति । सञ्चरणशीलो व्याधिर्जनान् तर्जयति, त्रासयति, व्यथयति च । अतः मानवा गृहबद्धाः, पिञ्जरबद्धं विश्वम् । अथ च –

> बन्धेऽस्मिन् मनुजा वृथा निजकृतौ स्वात्मालये स्वालये
> गच्छन्तः खलु रुग्णभावमधुना सन्त्येव सर्वत्र हि ।
> चीनादेव इटालिके ह्यरबके राष्ट्रे तथा ह्युन्नते
> स्पेनफ्रान्स–बिलायतादिबहुषु ख्यातेषु देशेषु च ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रथमपात्रम्

(सदैन्यभावम्) तत्र समृद्धेषु यूरोपादिदेशेषु च उपचारस्याभावेन उपकरणस्याभावेन हाहाकारोऽस्ति। नेपाले तु कोरोनामापक-यन्त्रस्याभावः, प्राणवायोरभावः (अक्सिजन इति), सघनोपचारयन्त्रस्य *(भ्यान्टिलेटर)* च अभावो दृश्यते। विज्ञचिकित्सकानामप्यभावः।

चिकित्सकः

(सस्मितम्) भगिनि ! विषाणोः प्रभावो न्यूनो जातः, पतिं पुत्रञ्च गृहं नयन्तु, स्वनिलये एव स्वास्थ्यलाभं कुर्वन्तु, यदि समस्या स्यात् पुनरानयन्तु।

कृतिका

(रुदन्ती, विश्वशन्ती) कथं गृहं नेतुं शक्यते ? अक्सिजनस्याभावोऽस्ति, औषधालेये तु अभावोऽस्ति चेत् गृहे कावस्था भवेत् ?

(क्षणं चित्रवद् भूय, मनसि) निलयं नीयते चेत् स्वयमेव सेवां कर्तुं प्राप्यते, तेषां रुच्यनुकूलस्य भोजनपेयादीनां व्यवस्था कर्तुं पार्यते इति।

चिकित्सकः

(मन्दं मन्दम्) किं विचरितम् ? गृहं नयतु, अत्र स्थानस्याभावोप्यस्ति। एवञ्च सङ्क्रमणस्य भयमपि दृश्यते। अत्र प्राणवायोः, सघनोपचारकक्षायाः, सघनोपचारयन्त्रस्य च अभावो वर्तते।

कृतिका

(सदैन्यम्) भवान् यदाज्ञापयति। यत्र कुत्रापि ते स्वस्था भवन्तु, सुखिनो भवन्तु, निर्भया रोगमुक्ताश्च भवन्तु।

(रोगिणस्त्रिचक्रासने आगच्छन्ति, किञ्चिद्दूरतामवलम्ब्य ते परस्परं मिलन्ति। अभिवादयन्ति। परस्परं स्नेहं दर्शयन्ति, नयनादश्रूणि वर्षयन्ति। कारुण्यवाद्यध्वनिश्च श्रूयते, पटाक्षेपश्च जायते)

तृतीयं दृश्यम्

स्थानम् - विषाणुग्रस्तगृहम्। समयः - अपराह्नः।

(निलयस्य प्रवेशद्वारे कोरोनाव्याधिहताः परिवारस्य सदस्याः सन्ति। स्वजनाश्च दूरत एव विलोकयन्तः सन्ति। कोलाहलस्य वातावरणं दृश्यते। केचन अन्तर्बहिः कुर्वाणः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सन्ति । परिवारस्य सदस्याः चिन्तिता दृश्यन्ते । रविकिरणः प्राणवायोर्व्यवस्थायां संलग्नोऽस्ति । सविता च सेवायमस्ति)

कृतिका

(खिन्नमनसा) चिकित्सालयः शीघ्रमेव रोगिणो निलयं प्रेषितवान् । तदा स्वस्था इव जायेरन् । परन्त्वधुना एतेषां स्वास्थ्यस्थितिः प्रतिदिनं क्षीयमाणास्ति । एतस्य रोगस्य निदानाय औषधस्याविष्कारो नैव जातः । किं करोमि ! क्व गच्छामि ! हा कष्टम् । अद्यापि ते एकान्तवासे सन्ति । कालः समागतः किम् !

प्रथमपात्रम्

(साभिनयम्) भगिनि नैव भेतव्यम् । ईश्वरः शं ते करिष्यति । शरीरं व्याधिमन्दिरम् । रोगादिना शीर्यते इति शरीरम् । व्याधिरहितं शरीरं नैव भवति । तथापि शरीरस्य रक्षा तु कर्तव्या एव । शरीरं खलु धर्मसाधनम् । चतुरशीतिलक्षञ्जन्मान्तरस्य पश्चात् मानवजीवनं लभ्यते । अतो येन केनापि उपायेन शरीरं रक्षणीयं, जीवनं रक्षणीयमिति मदीयो विचारः ।

सुनीता

(सोद्वेगम्) मानवजीवनं तु रक्षणीयम् । परन्तु कथं रक्षणीयम् ? व्याधिः विश्वं कवलयति । विज्ञानं शिलायते । वैज्ञानिकाः औषधमाविष्कर्तुं विफला एव । शतकोटित्रयं मानवा गृहाभ्यन्तरे कारागारे इव निबद्धाः सन्ति । द्विशतदेशेषु इयमेव दशास्ति ।

कृतिका

सर्वकारो निषेधाज्ञाम् आदिशति । अज्ञातेन हाहाकारेण विश्वं पिनद्धम् *(पिञ्जरायते)* । व्याधिना क्षुधया वा जना मरिष्यन्ति । गृहाभ्यन्तरे मुखाच्छादनं विधाय कतिदिनं जीव्यन्ति जीवाः । अतः खलु वन्दिजीवनात् बहिरागन्तव्यम् । विद्रोहो विधेयः ।

द्वितीयपात्रम्

विश्वः पिञ्जरायितः । सर्वे मानवा गृहे एव निबद्धाः । विश्वस्य वायुयानानि भूमिशायितानि दरीदृश्यन्ते । तैलयानरेलयानजलयानादीनि अवरुद्धानि । अतः आकाशे पक्षिणः निर्भयतया उड्डीयन्ते । वायुप्रदूषणमपगतम् । जलदूषणं शिथिलायितम् । जलजन्तवो स्वतन्त्राः, सुरक्षिताश्च । उत्पादनस्य यन्त्रशाला शायिता, मौनीभूताश्च । अथ च-(गायति)

> वेश्मान्ते च वयं बहिः किसलया जल्पन्ति क्रीडन्ति किम् !
> ईर्ष्यां ते ननु कारयन्ति मनुजान् धिक्धिक् कृतं जीवनम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गायन्ति प्रचुरं सुपर्णतरवो नृत्यन्ति ते शाखिनः
वाद्यं ते किल वादयन्ति सततं वायुप्रहारैर्मुदा ॥

सुनीता

(सोद्‌वेगम्) स्थलचराः जलचराः नभचराश्च जीवजन्तवो मानवपीडया स्वतन्त्राः । अधुना जन्तवः कारागारदुःखं स्मारयन्ति मनुजान् । मनुष्याः सदैव पशून् बध्नन्ति, घातयन्ति, पीडासागरे वा मृत्युसागरे पातयन्ति अधुना कोटिशो मनुष्या गृहे बद्धाः, पशवो मुक्ताः । अपि च - *(गायति)*

डीयन्ते खलु पक्षिणो हि गगने नृत्यन्ति गायन्ति च
मर्त्यान् ते ननु स्मारयन्ति वचसा कष्टञ्च कारागृहम् ।
किं दुःखं कतिधा च पिञ्जरभवं खाद्यस्य पेयस्य वा
स्वातन्त्र्यं सुखकारणं नरपशो ! जानीहि जानीहि भो ! ॥

कृतिका

(सदैन्यम्) स्वतन्त्रतैव सुखस्य कारणम् । वयं स्नेहपाशे बद्धाः, सुखस्य पाशे बद्धाः, रोगेणाबद्धाः, आक्रान्ताश्च । सर्वं चलमयम् । विश्वं चलमयं परमतत्त्वमचलमिति आर्षा वदन्ति । वयं गृहधनजनपाशेन बद्धाः, कोरुणाकाले वयं बद्धाः पशवो मुक्ताः । *(एवञ्च गायति)*

गेहे स्वे प्रतिबन्धिताः खलु वयं मुक्ताश्च वन्येभवा
धावन्तः समवाप्नुवन्ति हरिणा ह्येणस्य तामेषणाम् ।
सिंहो गर्जति कानने करिवरः स्वस्थं सदा बृंहति
स्वातन्त्र्यं मधुरं हि शिक्षति जनान् वन्येभवोऽसौ मृगः ॥

सविता

(सदैन्यभावम्) एतादृशी परिस्थितिरेतादृशी विश्वस्थितिः मानवसभ्यतायां कदापि न स्यात्। अत एकां क्रिया अपरां प्रतिक्रियां जनयति। प्रकृतिः स्वां शुद्धिं कुर्वन्ती अस्तीति अनुभूयते । अतो विश्वरचना एव परिवर्तिता भविष्यति । विश्वं पिञ्जरायितमस्ति, मानवरहिताः मार्गाः सन्ति, यानरहितमाकाशं विराजते । अतः एतत्कथनीयम् -

कारागारयुतञ्च गेहवसनं कारालयः स्वं गृह-
माविश्वं ननु कोटिशो नरवरा गेहे च वन्दीकृता ।
मार्गाः सन्ति च मानवेन रहिता वद्धीकृता ह्यापणा
यानं नास्ति च स्वच्छनीलगगने धूमो गतो ह्यम्बरात् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रथमपात्रम्

(सदैन्यं परिभ्रम्य) यथास्माकं शरीरं स्वचालितयन्त्रवत् प्रचलति, तथैव प्रकृतिचक्रमपि स्वचालितचक्रवत् प्रचलति । कदाचित् व्याधिपातः, कदाचित् हिमपातः, कदाचित् वर्षापातः, कदाचित् मधुपातः, कदाचित् विषपातः । यथा इयं प्रकृतिव्यवस्था, तथैव विश्वव्यवस्था । यथा पिण्डे तथैव ब्रह्माण्डे । शनैः शनैः सरति, अतः एव संसारः ।

द्वितीयपात्रम्

कोरोनप्रभावः आविश्वं दृश्यते । अद्यपर्यन्तं षष्टिकोटीपरिमिताः जनाः कोभिड्रोगेणाक्रान्ताः, पञ्चाशत्लक्षजनाः मृताः । अमेरिकादेशे दशलक्षजना अनेन रोगेण मृताः । इयमेवावस्था जायेत चेत् एक अर्बुदपर्यन्तं जना आक्रान्ता भविष्यन्ति, एककोटिपर्यन्तं जनाः मरिष्यन्ते ।

(कृतिका सुनीता च अश्रूणि विमुच्य अन्तर्बहिश्च कुरुतः)

प्रथमपात्रम्

भगिनि ! मा भेतव्यं, मा रोदितव्यं, पतिपुत्रयोर्जीवनस्या रक्षा भवति, अत्र चिन्ता मा कार्या । तेषां मनोबलमुच्चैः कार्यम् । ईश्वरे विश्वासो विधेयः ।

कृतिका

(अश्रूणि विमुच्य) परन्तु अग्रज ! तेषां स्थितिर्दयनीयास्ति, शुष्ककाष्ठवत् ते शयने शायिताः सन्ति, तत्र कोष्ठे गमनाय नाधिकारः, चिकित्सका नागच्छन्ति, पतिर्दिवङ्गच्छति चेत् मया जीवितेन किं भवति !, अतो निषिद्धक्षेत्रे गत्वा तेषामुद्धारं करिष्यामि । कार्यं साधयेयं शरीरं पातयेयं वा । *(करुणामयं वाद्यं श्रूयते)*

सुनीता

(अश्रूणि विमुच्य) मातः ! तत्र नैव गन्तव्यं, कालः त्वामपि नयति, त्वं गच्छसि चेदहमपि गच्छामि, शरीरं तिष्ठेत् शरीरं पतेत् वा ! पितृमातृविहिनेन मम जीवितेन किं स्यात् ! *(शोकवाद्यं ध्वन्यते)*

कृतिका

(अश्रूणि विमुच्य) अहं तु मातास्मि, पत्नी अस्मि, अहं भार्यास्मि, स भर्तास्ति, अहमर्धाङ्गिनी अस्मि, मया तु पत्युः शाकं स्वर्गन्तिव्यम् । अहं जायास्मि, त्वं जन्यासि । त्वमावयोर्दाम्पत्यजीवनस्य पदचिह्नाऽसि, त्वमस्माकं आर्यकुलस्य कुलदीपिकासि । *(करुणाद्योतकं वाद्यं ध्वन्यते)*

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तृतीयपात्रम्

(सदैन्यम्) कृतिके ! मा रोदितव्यम्, ईश्वरः शं ते करिष्यति । अस्मिन् व्याधौ एतादृशी स्थितिर्जायते । पुनः श्वासं प्रत्यागच्छति । पुनर्जीवनं समागच्छति ।

कृतिका

(अश्रूणि विमुच्य) सुनीते ! किं करोमि, क्व गच्छामि, मम जीवितेन किं भवति पुत्रि ! अहमग्निज्वालायां गच्छामि, अस्माकं कृते त्वं जीव त्वं जीव सुनीते !

(भूमौ पतति, पुनः उत्थाय अन्तः प्रविशति)

सुनीता

(अश्रूणि विमुच्य) मातः ! त्वं कालमुखे गच्छसि ! मा गच्छ मातः ! त्वं मां विहाय गच्छसि स्वर्लोकम् !

कृतिका

(रुदन्ती) अन्तः गच्छामि, तेषामेकान्तवासे गच्छामि, ततः कालमुखात् पतिं समाकृष्य आनयामि । यथा सावित्री स्वपतिं सत्यवानं कालमुखात् समाहृत्य आनीतवती, तद्वद् पुत्रं तव पितरं मम प्राणं कालमुखात् आकृष्य आनयामि ।

(गृहस्याभ्यान्तरे गच्छति, चक्रयानासने स्थित्वा त्रयः पुरुषाः बहिः समागच्छन्ति । सा तान् क्रमशः बहिः समानयति । पुत्री सुनीता, रुदन्ती भूमौ पतति, बान्धवाश्च रुदन्तः सन्ति)

सुनीता

(रुदन्ती) पितः अद्य किमजायत । यस्य व्यापारे सूर्यास्तं न भवति स्म । एकस्मिन्नेव दिने चत्वारो देशा भवता गम्यते स्म, अपरिमिता भूः, अपरिमितं द्रव्यं तव पार्श्वेऽस्ति, परन्तु ते तव जीवनं रक्षयितुं न प्राभवन् । रोग एव शक्तिशाली अस्तीति सिद्धो जायते ।

(सर्वेषां नेत्रे विरसमयः, करुणामयः, शोकमयः स्थितिर्जाता । एकः सपीतवस्त्रः पुरुषः समागत्य गतचेतनं शरीरं निरीक्षते, भ्रमति, ओष्ठौ चलतः, जलं सिञ्चति, करुणावाद्यं ध्वन्यते । कोलाहलो जायते ।)

नूतनराजः

(परिभ्रम्य) किमर्थमत्र कोलाहलं विद्यते ! कोभिड-१९ भयेन त्रस्ताश्चेत् मा भेतव्यं वैज्ञानिकैश्चिकित्सकैश्च कोभिडविषाणुविनाशाय औषधस्य आविष्करणं विहितम् । परास्ता कोभिडशक्तिः, मानवसभ्यतायाः विजयो जातः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(करतलध्वनिः, वाद्यं च गुञ्जति, तेन ध्वनिना रोगिणः चलन्ति, ते नयनं समुद्घाटयन्ति, क्रमशो व्युत्थाय हिण्डन्ति च)

सर्वे

मानवानां विजयो जातः, मानवानां विजयो जातः । मानवसभ्यताया विजयो जातः, परास्ता आसुरी शक्तिः । *(चक्राकारेण गायन्ति नृत्यन्ति च)*

नूतनराजः

(अन्यैः साकं गायति । कृतिका च सुन्दरं साभिनयं गायति)

प्रगच्छ गच्छ कोरना, विहाय मानवानहो
किमर्थमागतासि भो इतश्च गच्छ गच्छ भो ।
प्रताड्य विश्वमानवान् क्व यासि कुत्र नृत्यसि
विगिर्य मानवान् पुनः कुतश्च त्वं प्रसर्पसि ॥

अनेकव्यक्तिघातिका समाजघातिका तथा
समस्तविश्वघातिका त्वमुग्रभावमागता ।
विषाणुकोरुणा कथं दयां विहाय चण्डतां
गताऽधुना प्रशाम्यतां जगद्धिताय भूयताम् ॥

(गीतं गुञ्जति, पठाक्षेपश्च जायते)

॥ इति पाराशर्य–नवराजकट्टेलविरचितं 'विश्वपिञ्जरम्' नाम नाटकम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विगतसंज्ञा मानसी

(लघुनाटिका)

पात्रपरिचयः

मानसी : धीवरस्य प्रेमिका

चित्कला : मानस्याः सखी

मतिराजः : कश्चित् बोधकः ।

स्थानम् - भीमसेनस्तम्भनिकटम् । समयः - मध्याह्नः ।

(सदानीरात् शालग्रामग्रामात् परिभ्रमणाय काष्ठमण्डपमहानगरं प्राप्तौ प्रणयिनौ मानसी-धीवरौ भीमसेनस्तम्भमधिरोहतः । भीत्वा मानसी अधः समागच्छति, एतस्यामेव वेलायां भूकम्पो जायते । धरहरा खण्डत्रये विभिद्य भूमिमधिशेते । तस्मिन् हाहाकारसमये प्रेमिणो धीवरस्य न कापि सूचना, तस्य जीवितस्य न कोऽपि सङ्केतो, दुःखिता मानसी रुदित्वा मूर्च्छाङ्गता । सङ्कटावस्थासूचकस्य साइरनस्य ध्वनिः श्रूयते, कोलाहलो जायते । छायायां जना इतस्ततो धावन्तो दृश्यन्ते । एकः 'भीमसेनस्तम्भो ध्वस्तः, वसन्तपुरप्रासादो ध्वस्तः', अपरा 'कष्ठमण्डपो धराशायितः, अत्र स्थितानि अन्ये मन्दिराणि धराशायितानि' इति वदति । 'प्राचीनं शङ्खापुरं धरासात् जातम्' । अन्यः 'विनष्टो लयहीनो नेपालः' । वातावरणे स्तब्धता मौनता भयाक्रान्तता च' । युवकः 'वयं स्म, अतोऽस्माकं राष्ट्रं नेपालोऽस्ति, अपरा युवतिः 'भूकम्पं विजित्य जीवामः', अपरो युवकः 'भूकम्पं जेतुं मम देश उत्थितोऽस्ति' अपरा युवतिः 'सेना समागता, सेना समागता, सैव राष्ट्रं विपत्तितः समुद्धरिष्यति' अन्यो युवकः 'अहमपि सेना' अन्या युवतिः 'अहमपि सेना' अपरो प्रौढः 'अस्मिन् महासङ्कटे वयं सर्वे राष्ट्रस्य सैनिकाः, अस्माकं जन्मभूमिं नेपालं प्रणम्य देशं जनान् च समुद्धर्तुम् अग्रपङ्क्तौ गच्छाम' समूहध्वनिः 'गच्छामोऽग्रपङ्क्तौ स्थित्वा उद्धरामः' । छायायां जनोद्धारस्य आकृतिराभाति । करुणो वाद्यध्वनिश्श्रूयते)

मानसी

(समान्यवस्त्राभूषायां, साश्रुनेत्रा, भीता, विगलिताञ्जना हृदयविदारकध्वनिना रौति) प्रिय ! धीवर ! मामपि नय, त्वं यत्र व्रजसि अहमपि तत्रैव गच्छामि, नरकोऽपि त्वया साकं मत्कृते स्वर्गायिष्यते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(गतचेतनामिव भूमौ पतति, पुनः कम्पो जायते, कोलाहलो जायते, पुनरुत्थाय) हे भूकम्प ! दयां कृत्वा मामपि नय। तव गर्ते नय। तव गर्भे प्रियेण साकं शये। इयं सृष्टिः खलु लयमेतु। आवामनन्तकालम् अक्षरे लीना भवेव। *(पुनर्मूर्च्छाङ्गता)*

चित्कला

(सामान्यवस्त्रालङ्कारे दृश्यते। भीतभीता निश्वासं कृत्वा बोधयन्ती) मानसि ! मा रोदिहि, इयं सृष्टिर्नास्माकं नियन्त्रणे, यद्भाव्यं तद्भाव्यमेव, अपरायां यात्रायां न केनापि भवितव्यता वारयितुं शक्यते।

मानसी

(नटति) यः स्वप्न आसीत् स विनष्टः। गृहं परित्यज्य प्रियेण साकं समागता। मम अप्रत्याशितपलायनेन तत्र मम माता रुदती भवेत्। अनुजो रुदन् भवेत्। पिता क्रोशन् धिक्कुर्वन् भवेत्। अत्र ममेयं दुर्दशा। *(कदाचित् हसति, कदाचित् रौति)* सर्वं विनष्टम्। मम प्रिय आगच्छन् भवेत्। शालग्रामेऽपि आवां गूहनक्रीडां कुर्वः स्म। आगच्छतु प्रिय ! तवाङ्के निवसामि, तव कुक्षौ शिरो निधाय शये।

मतिराजः

(नेपालीवस्त्रालङ्कारे दृश्यते। श्वसन्नितस्ततो नटति) पितरं मातरञ्च अवमत्य किमर्थं त्वं गृहात् पलायिता ! यः पितरं मातरं वृथा परित्यज्य स्वेच्छया गच्छति तस्य दशा ईदृशी एव भवति बाले ! छिन्ने मूले नैव शाखा न पत्रम्।

मानसी

(करुणया) स मां कियत् प्रेम करोति स्म, मया खादितायां सत्यां खादति स्म, मया उत्थितायां सत्याम् उत्तिष्ठति स्म, मया शयितायां सत्यां शेते स्म, मया हसितायां सत्यां हसति स्म, मया विलोकितायां सत्यां पश्यति स्म, मया घ्रातायां सत्यां जिघ्रति स्म, स मां मम सौन्दर्यं च विलोक्य समाधिमधिगच्छति स्म।

(रुदती मूर्च्छाङ्गतेव पतति,उत्थाय कदा हसति, कदा रौति)।

चित्कला

(नटति) मानसि ! उत्तिष्ठ, मोहं परित्यज। तव मूलं तव कुलं परिपश्य। संसार इत्थम् आसीत्, अस्ति, भविष्यति च। वयं नद्याः प्रवाह इव। सृष्टिबीजं पश्य।

मानसी

(शनैरुत्थाय नटति) धीवर। कूपारात् मां नय, अहं सिन्धौ निमज्जन्त्यस्मि, मां तारय संसारसागरात्। त्वं कियत् मां प्रेम करोषि स्म, त्वं मां निचुम्ब्य मयि लीयसे स्म,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अहमपि त्वां निचुम्ब्य त्वयि लीये स्म। तव स्पर्श एव आनन्दायते स्म। मम मनसि तव उपस्थितिरेव आह्लादयति स्म। तव श्वेतदन्तहार उत्तेजयति स्म, स्थूलनेत्रे मां लज्जयतः स्म, रक्तोष्ठौ मां लोभयतः स्म, स्मितहास्यं मां विमुग्धयति स्म। अहं तव मनोमयकोषे लीये। मधुकरो मालतीमिव मां समुद्धर।

चित्कला

(नटति) मोह एव दुःखस्य कारणम्। भ्रान्तिर्दुःखस्य मूलम्। खल्वयं स्वप्नः। उत्तिष्ठ भद्रे! सर्वं स्वप्नमयं जगत्। चिन्ता मा विधेया।

मानसी

(नटति) धीविर! त्वं कुत्र असि, अहं हता खलु घोरे शिलारण्ये, अहं भस्मीभूता खलु महानगरे, खलु अस्मिन् कोलाहले तिरोहिता। रिडीक्षेत्रे खलु मम जन्म। अहं ग्रामबाला। शिखरिशिखरेषु, रमणीयारण्येषु, नदनदीषु, गिरिगह्वरेषु खेलन्ती, कूर्दन्ती, हसन्ती च वर्धिताहम्। प्रकृतिकुक्षौ वयमतिशयमानन्दमनुभवामः स्म। धीवर! स्मर अवयोर्बाल्यकालम्। स्मर आवयोर्यौवनकालम्। मम कृष्णकेशपाशे त्वं लीयसे स्म। भवान् मम दाडिमबीजतुल्ये दन्तहारे निमज्जति स्म, मम ओष्ठं स्पृष्ट्वा गतचेतन इव भवति स्म। आगच्छ मां पिब। आगच्छ मम सौन्दर्ये लीनो भव। आगच्छ एकाकारो भवाव।

चित्कला

(नटति) युवयोः प्रेमालापः खलु मधुरायते स्म। युवयोः शरीरसंयोगो वियोगश्च भ्रान्तिरिव। तव मित्रमविद्या त्वां भ्रामयति। तव मित्रम् अस्मिता त्वां पीडयति। तव मित्रम् अभिनिवेशः त्वां मूर्च्छयति। इमेऽपि सहैव समागताः स्युः। ते कुत्र गताः?

मानसी

(सकरुणम्) नाऽहं जाने चित्कले! परन्तु त्वं कान्त्या सह रमसे। सीता रामेण सह रमते स्म। राधा कृष्णेन साकं रमते स्म। अहं धीवरेण साकं रमे। सीता रामेऽलीयत। राधा कृष्णेऽलीयत। अहं धीवरे लीये। धीवर आगच्छ, मां तव हृदये लीनं कुरु। आवयोः संबन्धं न कोऽपि विहन्तुं समर्थः। प्रकृतिरपि न, भूकम्पोऽपि न। आगच्छ धीवर! अहं त्वयि लीना भविष्यामि।

मतिराजः

सर्वे खलु लयं यान्ति। कदाचित् लयो भवति, कदाचित् प्रलयो भवति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मानसी

(कदाचिद् हसति, कदाचिद् रौति) मम पिता कियत् मां स्निह्यति स्म, मम माता मां कियत् स्निह्यति स्म, स्नेहेन लालिता, दुग्धधारया पालिताहम् । मातुरङ्के नृत्यती वर्धिताहं, पितुरङ्गे उत्प्लुत्य वर्धिताहम् । अहं निलयस्य पुष्पमासम् । यत्र कुत्रापि मम ध्वनिः सङ्गीतायते स्म । यत्र कुत्रापि मम उपस्थितिः कुसुमायते स्म । अहं मातुर्नयनयोर्बिन्दुरासम् । अहं पितुर्नयनयोर्बिन्दुरासम् । अहं ग्रामस्य चलत् पुष्पमासम् । अहं निकेतनस्य पुत्तलिकासम्, अहं ग्रामस्य पुत्तलिकासम् । प्राप्तयौवनाहं शालग्रामसदानीरं परित्यज्य हसता, रमता प्रियेण सह महानगरं प्राप्ता । एतस्मिन् शिलारण्ये मम दुर्दशा जाता । हंहो क्व यामि ? क्व मां समुद्धरति । भूकम्प ! मां नय, हसता प्रियेण साकं नय ।

मतिराजः

अस्मिन् महासङ्कटे तस्याऽक्षरत्वं कामयस्व बाले ! मूलान्नैव विच्छिन्नया भाव्यं बाले ! मूलमेव कुलं भवति, कुलमेव बीजं भवति, सर्वं बीजे प्रलीयते ।

मानसी

(विक्षिप्तेव कदाचिद् हसति, कदाचिद् रौति) मम एकेनैव निर्णयेन सर्वं विनष्टम् । न मम पार्श्वे प्रियोऽस्ति, न प्रियजनाः सन्ति । ऐन्द्रियककामनया मया ममतामयी माता परित्यक्ता, स्नेहशीलः पिता परित्यक्तः । श्रद्धामयी पितामही, श्रद्धामयः पितामहश्च परित्यक्तः । आत्मनस्तु कामाय सर्वं प्रियं भवति, परन्तु मम मातामही मातुलानी मां स्मरन्त्यौ भवेताम् । कीदृशी आसं, कीदृशी जाता, चक्रवाते जलभ्रामर्यां वा निमग्ना ।
(पुनः भूकम्पो जायते, जनास्त्रस्यन्ति, कोलाहलो भवति)

चित्कला

(भीता श्वसन्ती) राम ! राम ! राम ! रक्ष रक्ष प्रभो !
(मेघो गर्जति, विद्युद् द्योतते, प्रकाशस्य आरोहावरोहौ जायेते, मानसी रौति)

मानसी

भूकम्प ! मां नय, मां तव गर्भे निवेशय । अहं तव प्रिया भवितुमिच्छामि । सीतापि भूगर्भे लीनासीत्, अहमपि तव गर्भे लीना भवामि । धी-वर ! मां प्रतीक्षस्व, अहमपि आगच्छन्त्यस्मि । भूकम्प ! मां नय । धी-वर ! आच्छन्त्यस्मि । भूकम्प ! मां नय ।
(परिभ्रम्य रौति, रङ्गस्तिमिरायते, प्रकाशकेन्द्रे मानसी मृतेव पतति, 'भूकम्प ! मां नय, धीवर ! मां नय' इति कारुणिको ध्वनिश्श्रूयते, शोकसूचको सङ्गीतध्वनिर्गुञ्जति) ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चित्कला

(प्रकाशः प्रसरति सा परिभ्रम्य) मानसि ! उत्तिष्ठ, प्राप्य वरान् निबोध, जीवन् नरो भद्रशतानि पश्यति । जीवनमक्षरप्रदत्तम् । वेदः प्रगर्जति 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः'। 'असतो मा सद्गमय, तमसो मा ज्योतिर्गमय, मृत्योर्माऽमृतङ्गगय इति मुहुर्मुहुर्मनसि भावय ।

असूर्या नाम ते लोका अन्धेन तमसाऽऽवृताः ।
ताँस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः' ।

(प्रकाशो भ्रमति, निद्रात इवोत्तिष्ठति, परितः पश्यति, रङ्गेऽटति, सकारुण्यं नृत्यति, क्रमशः शृङ्गारभावं, वीरभावञ्च प्रदर्शयति, पटाक्षेपश्च जायते)

॥ इति पाराशर्य-नवराजकट्टेलविरचिता 'विगतसंज्ञा मानसी' नामिका नाटिका ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

खण्डः चतुर्थः
कल्पनाश्रितानि रूपकाणि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कामरूपम्

(एक-दृश्यात्मकं लघुनाटकम्)

पात्रपरिचयः

कामरूपः – विप्रलब्धो नायकः

छायानारी – विप्रलब्धा मनश्छायारूपा नायिका

स्थानम् – प्रकृतिनिकुञ्जम् । समयः – पूर्णचन्द्रप्रकाशिता सन्ध्या ।

(रङ्गे मधुरो विद्युद्दीपो दृश्यते, तत्र मानवाकृतिः, प्रेमाभिनयं कामबाणहतकस्य प्रयिणः कामातुरस्येव प्रेमिकां स्मारं स्मारं व्याकुलं हृदयं दुनोति । छायानारी प्रेमकौतुकं रचयति, प्रेममयं ध्वनिर्वाद्यञ्च श्रूयते । पृष्टभागे पुष्पितमुपवनम्, अरण्यञ्च विलोक्यते)

कामरूपः

(प्रविशति प्रेमाघातो कामपुरुषः) अयि ! भो ! कान्ते ! कुत्रासि मम प्राणवल्लभे ! हा हतोऽस्मि त्वामप्राप्य । कुत्र प्रच्छन्नासि इन्दुमुखि ! मत्स्याङ्गिके ! हे मृगनयनि ! एकवारं त्वां द्रष्टुमीहे ।

(परितः नटति) निकुञ्जेऽहमेकाकी एवास्मि, आगच्छ, मां विचुम्ब्य परितोषय, कामरागं मारय, मनो मे परिरञ्जय । नितम्विनि ! चारुवदनि ! मम वार्ता नैव श्रुता ? कियद्वारं मया आहूता रूपाजीवे !

(इति कामाभिनयं कृत्वा परितो भ्रमति, वाद्यध्वनिश्श्रूयते, क्षणं शिलायते, पुनः परिभ्रम्येदं गायति)

नारीयं वै पुरुषहृदयं सनिन्कृष्यैव नित्यं
मर्त्यान् सर्वान् विषयलसितान् कामपुष्पं तनोति ।
यस्याः सृष्टिर्जगति वितता कौतुकेभ्यो विचित्रा
मन्दं हास्यं हृदि विलसतात् सुन्दरं सुन्दरीणाम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

छायानारी

(अज्ञातो ध्वनिः समायाति) हहह, कामबीजं हि सृष्टिमूलमस्ति अभिनयं करोषि।

(छायानारी नटति, शिलायते च)

कामरूपः

(ससम्भ्रममं परितः परिपश्य स्मितेन वचसा) कुतोऽयं ध्वनिः ! कथं समागतः ! भो मां पश्य, मम हृदयं विलोकय। अहं विक्षिप्तः। आवाम् एकमेव पिण्डम्। विधिवशाद् द्विधा विभज्य जातौ। पुनः परिमेल्य प्रेमराशौ एकीभूय परिवसावः। परिपश्य मम प्रेमाञ्जलिम्। मम हृदयं तव हृदये संयोजयामि, मम मनस्तव मनसि, मम चित्तं तव चेतसि, मम बुद्धिं तव बुद्धौ, ममाहङ्कारं तवाहङ्कारे सम्मेलयामि, न तवातिरिच्य ममास्तित्वम्, भो भोगदे, मां सर्वाङ्गं विचुम्ब्य सर्वं परिभुङ्क्ष्व। नायिके ! मां नय तव नासिकायां, मां नय तव नयने, मां नय तव दिव्यनाभिकमले, मां नय दिव्यनभसि, मम साम्राज्ञि ! मां मम मनश्च प्रशासय।

(क्षणं शिलायते, पुनः परिभ्रम्य गायति)

यस्या दन्ताः कमलसुमवत् हैमगौरं धरन्ति
श्वेतं रक्तं ह्यपि विघटितं भावुकेभ्यो विचित्रम्।
दन्ताहारो नभसि मुदितश्चन्द्रवत् शोभितोऽस्ति
मन्दं हास्यं हृदि विलसतात् सुन्दरं सुन्दरीणाम्॥

छायानारी

(अज्ञातो ध्वनि) शरीरं शरीरं कामयते, कामः कामं कामयते हहह। *(छाया नटति)*

कामरूपः

कामरूपे। एष आगच्छति, का च तव समस्या, किं भूतम् ? कथं लीना, कुत्र लीना। अहं तु तव वक्षसि लीनो भूत्वा शयितुं वाञ्छामि, तव मनसि लिलीषामि। यत्र आवयोर्भेदः परिसमाप्यते, सामरस्ये निमज्जयितुसमच्छावः। तव मनो मम तपस्थली, मम मनस्तव तपःस्थली। ममाङ्गेषु तवाङ्गेषु च चैतन्यं विराजते, व्यष्टिचैतन्यं परिहाय एकाकारे समष्टिचैतन्ये सामरस्ये लीनो भवाव।

(वाद्यं गुञ्जति, क्षणं शिलायते, पुनश्चलति, परिभ्रम्य गायति च)

ओष्ठं रक्तं युवकहृदयाहारिसौन्दर्यपूर्णं
यस्या हास्ये विलसति मनो मोदपूर्णं समन्तात्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शोभां धत्ते मनसि तनुते भावदीपं सुदीप्तं
मन्दं हास्यं हृदि विलसतात् सुन्दरं सुन्दरीणाम् ॥

छायानारी

प्रकृतिपुरुषं सृष्टिविस्तारमूलं हि नारीस्वरूपं हहह । *(छायानारी नटति)* ।

कामरूपः

(साश्चर्यं नटति) मृगनयनि ! आगच्छ वृषस्यान्तिके मां परिचुम्ब्य परमं तोषं नय । अभिसारिके मां नय भोगभवने । अहं बाणविद्धो हरिण इव कामबाणेन हतोऽस्मि, अहं जीवितोऽस्मि वा विगतप्राणोऽस्मि नाहं जाने । तव स्पर्शे मम इन्द्रियाणि व्युत्थितानि भवन्ति । तव मधुरेण स्वरेण मम तिरोहिता चेतना समागच्छति । मम दृष्टिपथे समागत्य मां जीवय, मम चेतनां व्युत्थापय । जाये ! जायात्वं परिपालय । तव वचनमनादृत्य अस्मिन् भवाटव्यां क्षणमपि स्थातुं न शक्नोमि ! इत एव समागच्छ, मां व्युत्थापय, त्वामतिरिच्य अहं विछिन्नपादकोऽस्मि ।

(क्षणं शिलायते, पुनः परिभ्रम्य गायति)

हास्यन्धत्ते ललितनयनं सप्तरङ्गैः सुरङ्गं
स्मारं स्मारं गदति नयनं मुह्यमानान् मनुष्यान् ।
किं किं ते मे मनसि लसिताम्भावधारां व्यनक्ति
मन्दं हास्यं हृदि विलसतात् सुन्दरं सुन्दरीणाम् ॥

छायानारी

(अज्ञातः ध्वनि) ममतामूलं हि नारीकुलं, हहह । *(नटति)*

कामरूपः

(नटति) अहमेकाकी एव चलितुं न प्रभवामि, पुररञ्जनि ! पुरं रञ्जय । सुरते, रतिरसस्यानन्दं देहि । तव कुचकाठिन्यं को जानाति ममातिरिच्य, मम रतिबाणं को जानाति कियत् प्रहरति तवातिरिच्यम् । तव बाहुपाशलतिकया स्वं परिवेष्टितुमीहे । मुग्धे विरहिणं मां विमोहय । स्मर प्रगल्भे ! तदानीं सुरतालापैः रजनीं नयावः स्म, कथं तद् विस्मृत्य मां मूर्च्छयसि ! लज्जावति ! मदनमदविक्लवतामनुभूय चञ्चलापाङ्गी त्वं चित्करोसि स्म ।

(पुनः क्षणं शिलायते, परिभ्रम्य चेदं गायति)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मत्स्यापाङ्गी सुगजगमना पद्मनेत्री सुनेत्री
रामा कान्ता सुमृगनयना शीतलाङ्गी कृशाङ्गी ।
जायाऽजेया हृदयनिवहा मानिनी मानवानां
मन्दं हास्यं हृदि विलसतात् सुन्दरं सुन्दरीणाम् ॥

छायानारी

(अज्ञातो ध्वनि) न केवलं गृहमूलमपि तु सम्पोषणमूलं हि नारी- हहह ।

(छाया नटति)

कामरूपः

ऋतुस्नाते! तव उत्तुङ्गवक्षः किं वक्ति! सुघनजघने! विशालनयने! सङ्कल्पाज्जायते प्रीतिः, प्रतीतिः प्रीतिकारणं भवति । कलहान्तरिते ! कदाचित् स्तनगतहस्तेन, ओष्ठरागरसिकेन, अधरपानेन, नितम्बं स्पृशन् तव मदं मर्दयामि स्म । कुपितेव त्वं नटसि स्म । अधुनापि आगच्छ मां भोगभवने नय, कमनीयकामकलायां कीलय ।

(अभिनयं कृत्वा शिलायते च)

॥ इति पाराशर्य-नवराजकट्टेलविरचितं कामरूप-नाम लघुनाटकम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कामरूपा

(एकदृश्यात्मिका लघुनाटिका)

पात्रपरिचयः

कामरूपा - विप्रलब्धा नायिका

छायापुरुषः - मनसः कामपुरुषस्य छाया

स्थानम् - निकुञ्जम् । समयः - अपराह्नः ।

(यवनिकायाः पृष्ठभागे मधुरो विद्युद्दीपो दृश्यते, तत्र मानवविम्बं, प्रेमाभिनयश्च अभिलसति । वाद्यध्वनिः, हहहहह इति ध्वनिश्च यवनिकायाः पृष्ठभागे श्रूयते)

कामरूपा

(प्रविशति सालङ्कारेण युता कनकमयी कामिनी कामकौतुकाय) व्याध ? अयि ! भो ! कुत्रासि भो कामरूप ! अस्मिन् एकान्ते निकुञ्जे ।

(साभिनयं मधुरेण स्वरेण परितः पश्यन्ती मन्दं मन्दं गच्छन्ती) अरे कामचोर ! मां विस्मयितुमत्र प्रच्छन्नोऽसि । किं कुर्वन्नसि, मम प्रेमालापो नैव श्रुतः ? कियद्वारं मया आहूतः कामारे ! कामराज ! कामकेलिकान्त ! *(सक्रोधमिव)* झटिति ह्यागच्छ ममाग्रे नोचेत् नेत्रवक्त्रविकारेण त्वां मूर्च्छां प्रापयामि । *(रौद्ररूपेण परितो भ्रमति, शाम्यति च)* पुनश्च स्मरामि त्वाम् मम प्राणनाथम् । *(गायति)*

गौराङ्ग हे प्रियतम मम प्राणभूत !
नित्यं स्मरामि हृदये मम स्वप्नराजम् ।
भालं नशौ च नयने चिवुकं विशालं
दन्ताश्च श्वेतलहरा नु मनो हरन्ति ॥

छायापुरुषः

(पृष्ठतो ध्वनिः समायाति) क्रोधो विनाशस्य कारणम् । जीवनं प्रेमरूपम् ।

कामरूपा

(नटति, स्मितेन वचसा) भो कामराट् ! नाहं क्रुद्धास्मि, अहन्तु पिपाषितास्मि, बुभुक्षितास्मि । आगच्छ, मां निचुम्ब्य भोगभवने नय, मामालोड्य मयि आलम्वनं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कुरु, अहं त्वां कामसागरे निमज्जयामि, तत्र आवां द्वौ भविष्यावः, कदाचित् हसावः, कदाचित् शेवहे, कदाचित् अनन्तगगने उड्डीयावहे । अहन्तु सदैव तव आलिङ्गने स्वं परिवेष्टितुं वाञ्छामि । तव क्रडे शिरः सन्धाय तत्रैव लीनो भवितुमुत्कण्ठायते मम चेतः । *(गायति)*

कान्तञ्च पद्महृदयं मम चोरयन्ति
सौन्दर्यदर्पः तव मां व्यथयन्ति नित्यम् ।
बाणेन विद्धहरिणीव त्वया हतास्मि
श्वासः सुकोमलमनो नयनं निरुद्धम् ॥

छायापुरुषः

(पृष्ठतो ध्वन्यते) चेतः कामालयम् ! (छायापुरुषो नटति क्षणान्तरं शिलायते)

कामरूपा

एष ध्वनिः कुतः समायातः ! (ससम्भ्रमं परिताऽटति) किमर्थं प्रच्छन्नोऽसि मनोराजः का च तव समस्या, किं भूतम् ? मा वृथा ब्रूहि तारेण । मम कोमलानि चाङ्गानि शिथिलायन्ते, मनो मे व्यथते नाथ ! एषो निकुञ्जः तपःस्थली इव भाति, अत्र वनस्पतयः अस्माकं साक्षिणः सन्ति । तेषु वनस्पतिषु चैतन्यं विराजते, तैः साकमहं वार्तालापं करोमि ।

(वायुघातं ध्वनिं, कलरवं च श्रुत्वा सा शिलायते)

किं भवानपि लतासु क्रीडन् भवेत् ! त्वं तु अपकारी असि, किन्तु वनस्पतयः सदैव परोपकारं कुर्वन्ति । वनस्पतिषु पञ्चाङ्गानि भवन्ति मूलं, वल्कलं, पत्रं, पुष्पं, फलम् । तानि सर्वाणि परोपकारं कुर्वन्ति । त्वं तु मानवो भूत्वापि ममोपरि उपकारं नैव करोषि ! वृक्षाः सदैव अस्मान् परोपकाराय शिक्षयन्ति । पुनश्च स्मरामि त्वां हे मन्मथ । *(गायति)*

वक्षस्थलञ्च नयने किल केशवल्लीं
स्कन्धं विशालविषयं किल कम्बुग्रीवम् ।
कृष्णञ्च रोमसहितं हसितं सुभालं
नित्यं स्मरामि मदनं तव बाहुपाशम् ॥

छायापुरुषः

(अज्ञातध्वनिः) नरस्य मूलं गृहस्थः, गृहस्थस्य मूलं नारी, नार्या मूलं धर्मः । अहह ! रूपजीवे । *(नरस्य छाया नटति, विस्मिता सा शिलायते)*

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कामरूपा

ममापि पञ्च ज्ञानेन्द्रियाणि सन्ति । चक्षु-घ्राण-रसना-श्रवण-त्वगिन्द्रियाणि । मम चक्षुः सदैव हृदयेश्वरस्य रूपराशिं पातुमिच्छति, घ्राणस्तु शरीरोद्भवगन्धं मन्दमाघ्रातुमभिसरति । रसना रसचर्वणामभिलसति । मम श्रवणेन्द्रियं सदैव तव मधुरं वचनं, गायनं हसनं च काङ्क्षते । त्वक् स्पर्शनमीहते । *(गायति)*

> **ओष्ठं स्मरामि रसनाममृतां सकान्तां**
> **हा चुम्बनं स्मरति हृद् किल देहजातम् ।**
> **जङ्घां च नाभिसहितां ननु सुन्दरीणां**
> **सौन्दर्यदां तव कलां वपुराश्रिताञ्च ॥**

छायापुरुषः

(अज्ञातः ध्वनिः) अहह ! कामरूपे ! ऐन्द्रियसुखं क्षणभङ्गुरम् ।

(धूमायते रङ्गः, पुरुषबिम्बं नटति, सा विस्मिता भवति, क्षणं शिलायते)

कामरूपा

(साश्चर्यं नटति) कोऽयं ध्वनिं विमुञ्च्य मां त्रासयति ! मां मम वचनमनादृत्य कुत्र प्रच्छन्नोऽसि प्राणेश्वर ! अस्यामटव्यां मां परिहाय कुत्र प्रलीनोऽसि ! तव गभीरे समुद्रसदृशे विशाले नीरनयने मां समाकर्षतः, विशालं गौरवर्णं ललाटं माम् आह्लादयति । श्वेतदन्तपङ्क्तयः, रक्तौ ओष्ठौ, सतिलकं चिबुकं, उष्णश्वासयुता नासिका मे मनो हरन्ति, मुहुर्मुहुः मुर्च्छां नयन्ति ।

(कलरवं श्रुत्वा सा शिलायते । क्षणान्तरं पुनः प्रसरति)

तव सुदृढं बाहुपाशं, रोमावलीयुतं विस्तृतं वक्षस्थलं, गभीरं रोमावलीयुतं चक्रायितञ्च नाभिकमलं, सुघनौ जघनौ, मां स्मारयन्ति कमनीयं, कनकमयं, कामरहस्यं कामरूपम् । मदनो मदरूपां मां मम मदञ्च दहसि किम् ! कनकमयीं कामलतां किसलयां प्रफुल्लां मां पश्य कामकलानिपुण ! कामराज ! *(गायति)*

> **भव्यं मनोहरयुतं तव दिव्यदेहं**
> **चित्ते स्मरामि सततं तव नेत्रबाणम् ।**
> **हास्यानि ते मम मनांसि विलोडयन्ति**
> **शीघ्रं ! वचांसि तव मां व्यथयन्ति नित्यम् ॥**

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

छायापुरुषः

(अज्ञातो ध्वनिः समायाति) अहह ! मोहिनि ! मोहजालं विस्तारयसि, रूपाजीवे ! रूपमारोप्य मूर्च्छयसि । कामकौतुकं उद्भाव्य मां चित्रीयसे !

(विस्मितो भवति छायापुरुषः)

कामरूपा

(सोद्वेगं नटति) सर्वं काममयं विश्वमनुभवामि । *(दर्शयित्वा)* कामतः खल्विमानि भूतानि जायन्ते । चटकाचटकयोः नृत्यं कामं दुनोति, कोकिलः कामकौतुकं गायति, मत्तमयूरः कामनृत्यं नृत्यति । पवनः कामिन्याः वक्षस्थलं स्पृष्ट्वा गगने उड्डीयते । मम रोमाणि जागरयति पवनः, मम वस्त्राणि गगने उड्डाययते । मम शिरोवस्त्रं उड्डाययते । *(वस्त्रं उड्डीयते)* प्रियेषु सौभाग्यफला हि चारुता भवति । आगच्छ मां परिचुम्ब्य काममयीं सृष्टिं रचय । *(गायति)*

आगत्य काम ! परिदेहि सुदिव्यमायां
कुक्षौ विशामि च वदामि हसामि नित्यम् ।
सर्वञ्च देहि निलयं हृदयं त्वदीयं
दास्यामि दिव्यहृदयं मृदुलं मदीयम् ॥

(अभिनयं कृत्वा शिलायते, धूमायते रङ्गः । गीतं विविधवाद्यानि च गुञ्जन्ति)

॥ इति पाराशर्य-नवराजकट्टेलविरचितं कामरूपा नामिका नाटिका ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सङ्घातम्

(विविधरसात्मकं नाटकम्)

पात्रपरिचयः

शकुन्तला	: जयायाः पुत्री, छात्रा	श्वेतच्छाया	: जयायाश्छाया
दीपकः	: शकुन्तलाया अग्रजः	कृष्णच्छाया	: दीपकस्यच्छाया
भैरवी	: शकुन्तलायाः सखी	वीरभद्रः	: शकुन्तलायाः सखा
जयरामः	: शकुन्तलायाः पिता		

प्रथमं दृश्यम्

स्थानम् - नेपालस्य कस्यचित् ग्रामस्य निलयः । समयः - रात्रिः ।

(करुण-रसात्मकम्)

(घोषो दृश्यते, घोषस्य प्रकोष्ठे मनःशिलादीपस्य प्रकाशे शकुन्तलायाः मातुः चित्रपटः, काल्याः चित्रपटश्च दृश्यते, मध्यरात्रौ शकुन्तला पठन्ती अस्ति)

शकुन्तला

(किञ्चित् रटन्ती प्रतिभाति, उत्थाय जयामातुः चित्रपटं विलोकयति, रुदती कथयति च सकरुणम्)

मातस्त्वमधुना दिवङ्गतासि, आक्रान्तृभिस्त्वं घातिता । अहमेकैव पुत्री, कियता स्नेहेन वर्धिताऽऽसम् । भवत्या हृदये मातृत्वमासीत्, ममतायाः आकारः आसीत् । भवत्या एकः स्वप्न आसीत्, पुत्री वर्धेत, बहु पठेत् परन्तु मातरधुनाहमश्रुसागरे निमग्नाऽस्मि । *(रोदिति निपतति च)* ।

श्वेतच्छाया

(शकुन्तला छायां न पश्यति) पुत्रि ! अग्रे गच्छ, न पृष्ठं विलोकय ।

शकुन्तला

(साश्चर्यं सान्द्रेण करुणस्वरेण नटति) एष ध्वनिः कुतः समायातः ? भो मातः ! भवत्याः स्वप्नो नष्टः । मातुर्मृत्युना (वधेन) पितापि विलुप्तचेतनामिव जातः । मया पठनस्य अवसरोऽपि नैव लब्धः । पिता जयरामः 'पठित्वा किं भवति, निरक्षरा जना

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अपि गृहस्थं चालयन्तः सन्ति । गृहस्थं परिचालय, नो चेद् विवाहं कारयिष्यामि' इति कथयति, अत आ-दिवसं गृहस्य कार्याणि सम्पादयामि । रात्रौ एकान्ते पठामि । पठितां मां पश्यति चेत् पिता हुङ्कृत्य प्रताडयति, प्रपातयति च मां मातः ।

श्वेतच्छाया

(एका अव्यक्ता वाक् अनुभूयते) नारी शक्तिरस्ति न पराजिता जायते न च पलायते, अग्रे गच्छ ।

शकुन्तला

(साश्चर्यमटन्ती रुदन्ती च) मातः ! सर्वाऽपि इच्छा नष्टा । प्राच्यमर्वाच्यञ्च रहस्यं पठित्वा ज्ञात्वा च राष्ट्रसेवां, मानवसेवाञ्च करोमीति सङ्कल्प आसीत् मनसि । भवत्या अकालदिवङ्गततया पितुः गृहस्थजीवनं नष्टम् । नारी एव गृहस्थस्य मूलम् । नारी सन्ततिमूलम् । नारी हि सृष्टिमूलम् । भवतः स्वर्गमनेनास्माकं जीवनस्याधारोऽपि नष्टः ।

श्वेतच्छाया

यत्नेन साध्यते सर्वम् । अग्रे गच्छ । कर्म नियतिं पराजयति, जीवनं परिवर्तयति ।

शकुन्तला

(ध्वनिना शकुन्तला त्रस्ता भवति, चित्रं विलोकयन्ती) मातः ! यमपथे कष्टदायिनी यात्रा भवेत्, यमपथे जलम् अमिलत् वा न । यमपथः उत्पीडयति वा न, तप्तवालुकापथे कथं चलसि । इतोऽपि कष्टमासीत्, तत्रापि कष्टं भवेत् । अस्माकं जीवने कष्टस्यैव चक्रं परिभ्रमति । अग्रजो मारितः, अनुजो मूकायते, पितापि न नियतपथमनुगच्छति । हंहो कष्टायते जीवनं मातः । हंहो ! दुःखायते जीवनं मातः ।

श्वेतच्छाया

(विस्मितवाद्यध्वनिः समागच्छति) सुखदुःखात्मकं जीवनमस्ति । नद्याः प्रवाह इव जीवनस्य प्रवाहोऽस्ति । नद्यः समुद्रपर्यन्तं प्रवहन्ति, जीवनं मृत्युपर्यन्तं प्रवहति । *(शिलायते)*

शकुन्तला

(सरोषम्) तैरस्मदुपरि घोरोऽन्यायो विहितः । विनाकारणं मानवहत्या विहिता, स्त्रीहत्या कृता, मातृहत्या विहिता ।

श्वेतच्छाया

(विस्मितध्वनिना गर्जति) दुष्टैराक्राम्य मारितोऽहम् । पुत्रस्य रक्षणाय यदाहं उग्रचण्डी जाता, तान् खड्गं प्रहृतवती, ते मां गोलिकया प्रहारं कृतवान्तः । *(शिलायते)* ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शकुन्तला

ये मम मातरं अग्रजञ्च अकारणं घातितवन्तः तेषामपि मृत्युस्तादृशी एव भूयात्। यदि अपूर्वः, अदृष्टः, सदस्ति चेत् तद् भूयात्।

श्वेतच्छाया

(विद्युत् द्योतते, मेघो गर्जति, विष्मयमुत्पाद्य रङ्गे परिभ्रमति) हुँ हुँ हुँ। ते स्वपापेन भूमिसात् भवन्ति, धूलिसात् भवन्ति, पश्चात्तापस्य कुण्डे ते निमग्ना भविष्यन्ति, मानसरोगेण ते विक्षिप्ता भविष्यन्ति।

शकुन्तला

(सरोषम्) नियतिस्तु दण्डयति, प्रकृतिरपि दण्डयिष्यति। एवञ्च मानवाचारसंहितानुसारमपि ते खलु दण्डनीया। ते लौहमानवा मानवलोहा वा आसन्। यथा ते अङ्गारमिव आसन्, अग्नौ स्पृश्यते दहति, पश्चात् स्पृश्यते चेत् कृष्णायते करम्।

श्वेतच्छाया

(विद्युत् द्योतते, मेघो गर्जति) निविडनिशिथिन्यां मारितोऽहम्। यदुप्यते तदेव फलति। ये घातका आसन् ते च तादृशेनैव रूपेण मारिताः।

शकुन्तला

सत्कर्मस्य फलं सदेव भवति, दुष्कर्मस्य फलं दूषितमेव जायते। हिंसायाः प्रभावेण अपरजन्मनि चापराधस्य प्रतिफलं लभ्यते। धर्माधर्मौ संस्काररूपेण तिष्ठतः। अतः अपराधीनं नियतिर्दण्डयति।

(करुणामयेन रुदन्ती सा भूमौ पतति। पटाक्षेपश्च जायते)

द्वितीयं दृश्यम्

(रौद्ररसात्मकम्)

(दीपः सरति, दीपकः कदा छायायां कदा प्रकाशे दृश्यते, परिभ्रम्य रौद्रं नटति)

शकुन्तला

(सरौद्रम्) अग्रज। दीपक। भवानपि दुष्टैः मारितः। अग्रजो भोजनं कुर्वन् आसीत्, तदा आक्रान्तृभिः शिरःकचान् सङ्गृह्य बहिः समानीय अट्टालिकायाः स्तम्भे वध्वा खड्गेन शिरश्छेदनाय प्रयत्नो विहितः। तस्मिन् क्षणे माता कालीरूपं गृहीत्वा खुकुरि शस्त्रेण दुष्टान् प्राहरत्। *(सरौद्रं खुकुरिशस्त्रप्रहारस्याभिनयं करोति)*।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृष्णच्छाया

(विस्मितध्वनिना गर्जति) दुष्टैराक्रम्य मारितोऽहम् । तैर्दशलक्षाणि रूप्यकाणि याचितान्यासन् । तद्दानस्य असामर्थ्यत्वात् मारितः । ते लौहमानवाश्चौरा इव, लुण्ठका इव समाचारन्ति । *(शिलायते)* ।

शकुन्तला

(विस्मितं, चित्रमिवाचरति, पुनर्व्युत्थाय सरौद्रम्) कुतोऽयं ध्वनिः, अग्रजमिवाचरति ! *(इतस्ततो भ्रमति)* तस्मिन् क्षणे पितापि बद्धः, मुखं वस्त्रेण पिनद्धमासीत्, हस्तौ पादौ च बद्धौ स्तः । त्रासदं वातावरणमासीद्, आयुधजीविनां हस्ते नालिकास्त्रमासीत् । तथापि रणचण्डी माता कतिपयानाततायिनां शिरः उपरि खड्गं प्रहृतवती *(खड्गप्रहारस्याभिनयं करोति)* । तान् घातकान् अहमपि मारयामि भो !

(विक्षिप्तमिव सरौद्रं प्रहारस्याभिनयं करोति, क्षणं शिलायते)

कृष्णच्छाया

(विस्मितध्वनिना गर्जति) तैः पशुभिर्मारितोऽहम् । अधुना गुणरूपकर्मविहीनो जातः । *(शिलायते)* ।

शकुन्तला

(सरौद्रम्) आततायिनाम् उपस्थित्या तत्र कोलाहलो जातः, मध्यरात्रौ गृहं रणक्षेत्रं जातम्, माता हुङ्कृतवती, तथापि अग्रजं रक्षितुं न प्राभवत् । मातुः अग्रे, पितुः अग्रे, भ्रातृजायायाः अग्रे बद्धाग्रजस्य शिरश्च्छेदनं विहितं, अजस्येव शिरः भूमौ न्यपतत्, कबन्धः खर्परश्च क्षणम् अचलत्, हस्तौ पादौ च अचलताम् । बकन्धाच् जलधारा इव रक्तधारा अवर्षत् । वयं सर्वे रुदन्तः आस्म । गतप्राणा इव, गतचेतना इव आस्म ।

(भूमौ पतति गतचेतनेव । विद्युत् द्योतते, मेघो गर्जति)

कृष्णच्छाया

तैर्लोहमानवैः कबन्धेऽपि छुरिका प्रहृता, पादैश्च ताडितः । मृतवपुस्यपि तैः रक्तपिपाशुभिः भुशुण्डिना प्रहृतम्, खुकुरीशस्त्रेणापि कर्तितम् । तदा ते रक्तपायिनो दैत्या इव दृष्टाः । *(शिलायते)* ।

शकुन्तला

(सरौद्रं) स्मृत्वापि तां रात्रिं शरीरं शिलायते, चेतना च शिलायते । तान् दुष्टान् कः दण्डयति ? ईशो दण्डयति किम् ? नियतिर्दण्डयति किम् ? *(सरौद्रम्)* नो चेदहं दण्डयामि । दुष्टान् असुरान् अहं दण्डयामि । उत कालो दण्डयति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृष्णच्छाया

(प्रकाशो मलिनायते, रौद्राकृत्येन दृश्यते) मम प्रिये अनुजे ! तैः उन्मुत्तपुरुषैः मानवहिंसा विहिता, ते महापातकस्य दण्डं लप्स्यन्ते, स्वपापमेव तान् मारयिष्यति, कालश्च दण्डयति, मानवाश्च दण्डयन्ति । त्वया वीरत्वेन भाव्या भगिनी । त्वं हि तेषां दण्डस्य कारणं भविष्यसि भगिनि !

शकुन्तला

(वीरोचितं वाद्यं श्रूयते, गभीरया मुद्रया वीरत्वभावेन) अहं दण्डयामि । बहु पठित्वा दण्डाधिकारिणी भूत्वा तान् दण्डयामि । ते खलु मानवसभ्यतायाः, संस्कृतेः, मानवास्तित्वस्य च विरोधिनः सन्ति । 'शठे शाठ्यं समाचरेत्' इति नीतिमनुसृत्य ते दण्डनीयाः ।

कृष्णच्छाया

(विद्युत् द्योतते, मेघो गर्जति) ते खलु दण्डनीयाः, तैः आततायिभिः शतशो नेपालिनः विना कारणं घातिताः । ये च दशगात्रविधौ संलग्नाः आशौचसंस्कारे स्थिताः पुत्राः तेऽपि मारिताः, शिक्षकाः, वृद्धाः, बालकाश्च हताः । तान् किल दण्डयित्वा राज्यस्य स्थितिः स्थापनीया ।

शकुन्तला

(सवीरभावम्) ते नैव मारणीया खलु ते कठोरदण्डेन पातनीयाः, तेषां हिंसाबुद्धिः उत्पाटनीया, मारणवृत्तिर्निःशेषयितव्या, विजित्य मनः, विजित्य च भ्रमबोधं, सत्पथे आनेतव्याः । तैः 'विषकुम्भं पयोमुखं' दर्शनं समधीत्य हिंसावृत्तिर्जागरिता । तैश्चित्तवृत्तौ हिंसा, बुद्धौ हिंसा, व्यवहारे कर्मणि च हिंसा पालिता, पोषिता च ।

कृष्णच्छाया

(सदृढम्) यो सदा बिभेति सोऽकाले पञ्चत्वमेति । वीरत्वेन भाव्यं भगिनि !

शकुन्तला

(सदृढम्) यथा ते शनैः शनैः हिंसापथं गतवन्तः, हिंसायाः प्रशिक्षणं गृहीतवन्तो, हिंसाया अभ्यासं कृतवन्तः, कारितवन्तश्च । तद्वद् हिंसामार्गतो विनिवृत्तये तेनैव पथेन बोधनेन, प्रशिक्षणेन, अभ्यासेन, जीवनस्य क्षणभङ्गुरताप्रदर्शनेन, दया-दान-करुणा-मैत्री-भावबोधनेन, अभ्यासेन च ते सत्पथमानेतुं शक्यन्ते । तेषां दुर्वृत्तिं घातयित्वा ते मानवपथे आनेतुं शक्यन्ते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृष्णच्छाया

(विस्मिता विद्युद् द्योतते, वाद्यं श्रूयते, परिभ्रम्य) दुष्टा दण्डेन शाम्यन्ति । कदाचित् शौचत्यागतपोभिः, कस्मैचित् योगदमदानेन, कदाचित् सत्यदयाश्रुतेन, कदाचित् आस्तिक्यविद्याविज्ञानेन च विपथगाः सत्पथे आनेतव्याः । प्रायो दुष्टा दण्डमर्हन्ति ।

शकुन्तला

(सोद्वेगम्) नाहं भीरुः, अहं वीराङ्गना, व्यावहारिकजीवने वीरत्वं प्रदर्श्य विद्याबलेन जीवामि। साहसपूर्णं कार्यं सम्पादयामि। शत्रून् विजित्य स्वकीयं लक्ष्यबिन्दुं प्राप्स्यामि। हिंस्रकानां क्रूरकर्मनिमग्नानां मानसं परिवर्त्य तान् विचारेण, व्यवहारेण भुजदण्डेन च सत्पथम् आनेष्यामि ।

कृष्णच्छाया

(विद्युत् द्योतते, मेघो गर्जति) शठे शाठ्यं समाचरेत् । स्वस्य असत्कर्मणा दुष्टकर्मणा वा ते खलु घातिताः, तेषामङ्गभङ्गो जातः । ते परस्परं ताडयन्तः, मारयन्तः, उच्छेदयन्तः सन्ति, स्वयञ्च यमपथं गच्छन्तः सन्ति । एतन्महदाश्चर्यम् । (शिलायते) ।

शकुन्तला

(आकृत्यां कठोरता दृश्यते, क्षणं विरम्य) तेषां विचारोऽस्ति यत् सर्वदैव मानवसंहारेण, हिंसाताण्डवेन जीवनं चलिष्यति । भुशुण्डिना, खड्गेन च जनाः पलायन्ते, परन्तु तत्सर्वदैव न प्रचलिष्यति भो ग्रामसिंहाः । नाहं तादृशो भीरुः । 'वीरभोग्या वसुन्धरा' ।

(शान्तरसः)

(विद्युद् द्योतते, मेघो गर्जति, इतस्ततः करोति वीरभावोचितं वाद्यं श्रूयते । क्षणं निशायते रङ्गः, दीपो नृत्यति, मधुरं शान्तं वाद्यं क्रमशः गुञ्जति, चक्राकारे प्रकाशपुञ्जे शकुन्तला दृश्यते)

शकुन्तला

(सविनयम्) अहिंसा हि परमो धर्मः । हिंसा दुःखस्य कारणम् । हिंसापि वाचिकी, शरीरिकी, मानसिकी चेति त्रिविधा भवन्ति । तत्र हिंसा कृतकारितानुमोदिताः भवति । अहिंस्रकेण भाव्यम्, मानवजीवनस्य कृते, समाजव्यवस्थायाः कृते, विश्वबन्धुत्वस्य कृते च ।

कृष्णच्छाया

(कदाचिद् दृश्यते, कदा विलुप्ता, कदा शनैः रौति कदा हसति) येन केन प्रकारेणापि अपराधिनो दण्डिताः भवेयुः । विलोपितः पितापि एभिराततायिभिर्घातितः स्यात् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शकुन्तला

(साभिनयम्) अस्माकं जीवनं क्षणभङ्गुरमस्ति, तथापि जनाः मारणे, मरणे च संलग्ना भवन्ति। जीवनं फेनोपममस्ति। महाकालस्य रेखायामस्माकं जीवनं बिन्दुरिवास्ति। ब्रह्माण्डस्य न कोऽपि परिधिः। परन्तु मर्त्यस्य परिधिरस्ति। विशाले ब्रह्माण्डे नरस्तु कीट इव प्रतिभाति। तथापि स कुञ्जर इव केसरी इव उन्मत्तायते।

कृष्णच्छाया

(विविधवाद्यध्वनिः पशुपक्षिणां त्रासध्वनिश्चायाति) उन्मत्तो नरः खलु विनाशाय जायते। कामक्रोधलोभमोहमदजातं पुरुषपिण्डं खलु अपूर्वं दण्डयति।

शकुन्तला

(कलरवं श्रूयते) एकश्चान्यम्, अन्योऽन्यतरं मारयिष्यति। अयं मरणमारणस्य अशान्तेः चक्रं कदा पर्यन्तं प्रचलेत्? हिंसावृत्तेरवसानः कदा जायते?

श्वेतच्छाया

(कलरवं श्रूयते, मधुरं गीतं गुञ्जति) मनुष्याणां चित्तवृत्तौ हिंसावृत्तिः, अहिंसावृत्तिश्च अनादितया विराजते। एषा सदसद्वृत्तिः। जानासि पुत्रि तव पितुः जयरामस्य हत्याऽपि एभिराततायिभिर्विहिता।

कृष्णच्छाया

(मधुरं वाद्यं श्रूयते) रामः सद्वृत्तिः, रावणोऽसद्वृत्तिः। एतयोः सङ्घर्षः सदसदोः सङ्घर्षः। मनुष्यहृदये सदसदोः सङ्घर्षोऽनादितया अनुस्यूतो विद्यते।

शकुन्तला

(श्वेतच्छाया, कृष्णच्छाया च मानसे नृत्यति, सा तामन्वेषयति) ये मारणे उद्यताः सन्ति ते, ये मृताः मृत्युपूर्वं ते चामरत्वं कामयन्ते अमरबीजत्वात्। अपरे चैतन्यं कामयन्ते, ननु चिद्बीजत्वात्। अपरे स्वस्य सत्त्वं कामयन्ति सद्बीजत्वात्। बीजानुकुलं फलं फलति सर्वत्र। सृष्टौ समागतानां जीवानां मनसि 'तासामनादित्वं चाशिषो नित्यत्वात्' इत्यनुभूतिर्जायते, अतो यतन्ते जीवितुं प्राणिनः, अतो जीवहत्या नैव विधेया।

(कदा कृष्णच्छाया, कदा श्वेतच्छाया परितो भ्रमति, कदा घातकानामाकृतिर्नृत्यति, सा बिभेति, आक्रामति, वसति, उत्तिष्ठति, विविधवाद्यध्वनिश्च श्रूयते, तान् घातकान् हन्तुकामा सा सशस्त्रं भूमौ पतित्वा मूर्च्छां प्राप्नोति। दीपो मिन्दायते, पटाक्षेश्च जायते।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तृतीयं दृश्यम्

(वीररसात्मकम्)

(घोषो विलोक्यते । तस्याः सखी भैरवी समागत्य आह्वयति, 'शकुन्तले ! अयि शकुन्तले' इति । प्रकाशः सरति, शकुन्तला भूमौ पतिता गतचेतनैव दृश्यते । सा बिभेति, शनैः शनैर्गत्वा सम्पृश्याह्वयति, जलं सिञ्चति, सा जृम्भते, निद्रात इवोत्थाय पश्यति । तस्या हस्तयोः खड्गौ दृश्येते)

भैरवी

(भैरवी इतस्ततः करोति, प्रकाशो नृत्यति, सा अपि विक्षिप्ता इवास्ति) शकुन्तले तव हस्तौ खड्गौ कुतः किमर्थम् ! युद्धाय गच्छन्ती असि त्वम् ! वा त्वं दुष्टैराक्रान्ता ?

शकुन्तला

(रौद्ररूपं प्रदर्श्य) भैरवि । अहमाक्रमिता, आक्रमणाय सज्जीभूता च । तैर्मम माता घातिता, अग्रजश्च मारितः । पिता विक्षिप्तो जातो घातितश्च । कथं जीवेयम्, कथं पठेयम्, कथं कथं ...मित्रे !

भैरवी

(रुदन्ती, क्रुध्यती च) शकुन्तले ममापि तादृशी एवावस्थास्ति । पिता, माता, अनुजश्च हताः याने वम्बास्त्रेण । पिता कृषक आसीत् माता च गृहिणी आसीत् । ते मातुलं घातितवन्तः, अतस्तत्रैव सहयोगाय गतवन्त आसन् । युद्धम्, सङ्घर्षः, आन्दोलन-शब्दश्च तैर्नैव श्रुता भवेयुः, परन्तु दोषरहितास्ते घातिताः । तैस्त्रैमासिकं शिशुः, अष्टाशीतिवर्षीयो वृद्धो, युवानो युवत्यश्च मारिताः ।

शकुन्तला

(रुदन्ती परितो भ्रमन्ती) भैरवि । ते दोषरहितं मातरं भ्रातरं घातितवन्तः । मया विद्रोहः कृतः, यत्रतत्रापि तेषां मानवहिंसायाः प्रतिवादो विहितः । मामपि ते तर्जयन्तः सन्ति । ते 'अधिकं मा ब्रूहि, अन्यथा शिरःपातो भविष्यती'ति भणन्ति । किं विधेयं सखे !

भैरवी

(क्रुध्यन्ती, इतस्ततः भ्रमन्ती) शकुन्तले ! संघर्षो विधेयः, सत्यतथ्यघटनायाः प्रचारप्रसारः करणीयः, हिमालप्रान्तस्थ-शान्त-सुन्दरदेशात् मानवहिंसायाः शृङ्खला निवारणीया । तेषां मनसि भ्रमबोधो हिंसावृत्तिश्च दमेन, प्रहारेण, भयेन बोधनेन च प्रहातव्या ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शकुन्तला

(क्रुध्यन्ती कदा प्रकाशे कदा तिमिरे भ्रमन्ती, पुनश्च विस्फोटनस्य ध्वनिः मानवचित्कारस्य ध्वनिः श्रूयते, रङ्गो धूमायते च) भैरवि ! पश्य, ग्रामे ग्रामे इयमवस्थास्ति, जनाः कोलाहलायन्ते, ते जनान् मृत्युपथं गमयन्ति । कदा पर्यन्तं ग्रामीणाः इत्थमनुभवेयुः ? भूमयः धान्यादिबीजहीनाः, भवनानि मानवहीनाः, विद्यालयाश्छात्रहीनाः कदापर्यन्तम् ?

भैरवी

(क्रुध्यन्ती सा कदा दृश्यते कदा धूमे विलीयते) शकुन्तले ! ग्रामात् ग्रामात् जनाः पलायन्तः सन्ति, जीवितुमुपायहीना नरा आत्महत्यां कुर्वन्तः सन्ति । सीमन्तिन्यः विधवाः, भर्तारो विधुराः, पितरः पुत्रहीना, मातरः पतिहीनाः पुत्रीहीना, पुत्राः जन्मन एव जनकहीनाः, किं रचयन्तः सन्ति नैपालवैभवम् ! नवनेपालं वा !

वीरभद्रः

(प्रविशति, शिरसि श्वेतवस्त्रं, कुक्षौ शस्त्रं, हुंकृत्य रङ्गं भ्रमति) भगिन्यौ ! नैव सहनीयः अयमत्याचारः । प्रतिवादो विधातव्यः । ग्रामात् ग्रामात् प्रतिवादं कार्यं, सत्यतथ्यं समुद्घाट्यम् । सर्वे भीताः सन्ति, मा भेतव्यं, 'सङ्घे शक्तिः कलौ युगे' । (कदा प्रकाशे कदा तिमिरे) ममापि पिता घातितः, जननी जननं विधाय स्वर्गता । गृहमग्निसात् कृतम् । मम जीवनं शून्यं, गृहं शून्यं, (हस्तौ उत्थाय) मृतेऽपि का हानिः ! जीवितेऽपि को लाभो मत्कृते !

भैरवी

(वीरभावं प्रदर्शयन्) सखे ! असहायूयानां सहायूयं भवितव्यम् । (वीरभावद्योतकं वाद्यं गुञ्जति) अन्यायस्य, अत्याचारस्य, विरोधो कर्तव्यः, मानवहिंसाया विरोधे हस्तौ उच्चैः कृत्वा उच्चैःस्वरेण कोलाहलः कर्तव्यः । जनपदे जनपदे विरोधप्रदर्शनं विधातव्यम् । जनजागर्तिरानेतव्या । राजधान्यां विश्वमञ्चे च हिंसाया विरोधो महता स्वरेण विधेयः । हिंस्रकाः खलु दण्डनीयाः ।

वीरभद्रः

(वीरभावं प्रदर्शयन्) मानवहिंसायाः विरोधे आजीवनं संघर्ष करिष्यामि । यावज्जीवेयं तावत्पर्यन्तं हिंसावृत्तिसमाप्तये, मानवहिताय च जीवामि । हातव्यस्य कृते मम किमपि नास्ति, अहं दिगम्बरोऽस्मि । दिगम्बरस्य का हानि को लाभः ! हिंस्रका दण्डनीयाः, जीविते मृतेऽपि वा मानवहिंसका दण्डनीयाः । स्वदेशस्य न्यायालये,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्तरराष्ट्रियन्यायलये वा हिंसका खलु उपस्थाप्य दण्डनीयाश्च। (हस्तावुत्थाय, परितो परिभ्रम्य) यावत्कालं ते दण्डिता न भवेयुः तावत्पर्यन्तं क्षौरं नैव विधाष्यामि। शवदाहं नैव करिष्यामि। *(विद्युद् द्योतते, वाद्यं ध्वन्यते)*

शकुन्तला

(सवीरभावम्) मानवघातकाः खलु दण्डनीयाः।

(चक्राकारे सविना शकुन्तलाया हस्तोपरि हस्तं संयोज्य) भैरवि ! मातृघातका खलु दण्डनीया' इति।

(वीरभद्रस्तस्या हस्तोपरि हस्तं संयोज्य) वृद्धघातकाः खलु दण्डनीयाः' इति।

(विस्फोटस्य ध्वनिः समागच्छति, प्रकाशः सरति, कदाछाया, कदा प्रकाशो दृश्यते)

(अपरध्वनिः) बालघातकाः खलु दण्डनीयाः।

(अन्यध्वनिः) शिक्षकघातकाः खलु दण्डनीयाः।

(अपरध्वनिः) ननु राष्ट्रघातकाः उपदेष्टृघातकाः खलु दण्डनीयाः।

(समूहध्वनिः) आततयिनः खलुदण्डनीयाः, बन्धुघातकाः खलु दण्डनीयाः।

(वीरवाद्यं श्रूयते, विविधगानैः सह पटाक्षेपो जायते)

॥ इति पाराशर्य–नवराजकट्टेलविरचितं सङ्घात –नाम नाटकम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मौनम्

(लघुतमं भावनाटकम्)

पात्रपरिचयः

प्रकृतिः : नारीपात्रम्
पुरुषः : पुरुषपात्रम्

समयः – रात्रिः । स्थानम् – मुक्तप्रकृतिकुञ्जम् ।

(यवनिकायाः पृष्ठभागे मधुरो विद्युद्दीपो दृश्यते, तत्र सृष्टिस्थितिलयस्य ध्वनिः श्रूयते । शृङ्गारवीरशान्तभावस्य प्रकाशनं जायते । भावाभिनयेन सृष्टिस्थितिलयस्य द्योतनं क्रियते । वाद्येन रङ्गो गुञ्जति, वाद्ये कुत्रचित् सार्थकः कुत्रचित् निरर्थको ध्वनिः श्रूयते । विद्युद्दीपाः मन्दरूपेण, मध्यमरूपेण, उच्चैरूपेण च विविधरङ्गेषु द्योतन्ते, नटन्ति च । प्रकाशः नृत्यति तदनुसारं तौ नटतः ।)

(सृष्टिः)

प्रकृतिः

(हस्तं प्रसार्य नाट्याभिनयेन रङ्गं परिभ्रमति । प्रेमभावं, स्मितम्, आलिङ्गनं, विविध हस्तमुद्राः प्रदर्शयति । विविधप्रकाशो भ्रमति । गानवद् मुखं चालयति । शृङ्गारव्यञ्जकः सृष्टिव्यञ्जको वाद्यध्वनिरायाति, तदनुसारं नटति पश्चात् शिलायते)

पुरुषः

(हस्तौ प्रसार्य नाट्याभिनयेन रङ्गं परिभ्रमति । प्रेमभावं, स्मितं, आलिङ्गनं, शृङ्गारं, विविधहस्तमुद्राश्च दर्शयति । गीते इव मुखं चालयति । वाद्यानुसारं नटति)

प्रकृतिः

(हस्तं प्रसार्य नाट्याभिनयेन रङ्गं परिभ्रमति । प्रेमभावं, स्मितं, आलिङ्गनं, शृङ्गारं, विविधहस्तमुद्राश्च प्रदर्शयति । गायकवद् मुखं चालयति । वाद्यानुसारं नटति ।)

पुरुषः

(हस्तं प्रसार्य नाट्याभिनयेन रङ्गं परिभ्रमति । प्रेमभावं, स्मितं, आलिङ्गनं, शृङ्गारं,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विविधहस्तमुद्रां प्रदर्शयति । गायकवद् मुखं हस्तौ च चालयति । वाद्यानुसारं नटति, पश्चात् शिलायते)

(स्थितिः)

प्रकृतिः

(हस्तौ प्रसार्य नाट्याभिनयेन रङ्गं परिभ्रमति । वीरभावं, आक्रामकभावं, प्रतिपालनभावं, मन्दस्मितं, प्रतिरक्षणं, किञ्चित् रौद्रं, विविध हस्तमुद्राः प्रदर्शयति । गायकवद् मुखं चालयति । स्थितिव्यञ्जकं वाद्यानुसारं नटति, प्रकाशस्य गत्यनुसारं नटति)

पुरुषः

(हस्तं प्रसार्य नाट्याभिनयेन रङ्गं परिभ्रमति । वीरभावं, आक्रामकभावं, प्रतिपालनभावं, मन्दस्मितं, प्रतिरक्षणं, किञ्चित् रौद्रं, विविधहस्तमुद्राश्च प्रदर्शयति । गायकवद् मुखं चालयति । वाद्यानुसारं नटति)

प्रकृतिः

(हस्तं प्रसार्य नटति, रङ्गं भ्रमति । वीरभावम्, प्रतिपालनभावं, शृङ्गारभावं, मन्दस्मितं, प्रतिरक्षणं, किञ्चित् रौद्रं, विविधहस्तमुद्राः, प्रदर्शयति । गानवद् मुखं चालयति । प्रकाशानुकूलं, वाद्यानुसारेण च नटति)

पुरुषः

(हस्तौ प्रसार्य नाट्याभिनयेन रङ्गं परिभ्रमति । वीरभावम्, आक्रामकभावं, प्रतिपालनभावं, मन्दस्मितं, प्रतिरक्षणं, किञ्चित् रौद्रं, विविध हस्तमुद्राः प्रदर्शयति । गायकवद् मुखं चालयति । वाद्यानुसारेण नटति, पश्चात् शिलायते)

(लयः)

प्रकृतिः

(हस्तं प्रसार्य नाट्याभिनयेन रङ्गं परिभ्रमति । लयभावम्, अट्टहासं, अनालिङ्गनं, कारुण्यं, शान्तं, विविध हस्तमुद्राः प्रदर्शयति । गायकवद् मुखं चालयति । लयव्यञ्जकं वाद्यानुसारं नटति) ।

पुरुषः

(हस्तं प्रसार्य नाट्याभिनयेन रङ्गं परिभ्रमति । लयभावम्, अट्टहासं, अनालिङ्गनं,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कारुण्यं, शान्तं, विविधहस्तमुद्राः प्रदर्शयति । गायकवद् मुखं चालयति । लयव्यञ्जकं वाद्यानुसारं नटति)

प्रकृतिः

(हस्तौ प्रसार्य नाट्याभिनयेन रङ्गं परिभ्रमति । लयभावम्, अट्टहासं, अनालिङ्गनं, कारुण्यं, शान्तं, विविधहस्तमुद्राः प्रदर्शयति । गायकवद् मुखं चालयति । लयव्यञ्जकं प्रकाशस्य वाद्यस्यानुकूलं नटति)

पुरुषः

(हस्तौ प्रसार्य नाट्याभिनयेन रङ्गं परिभ्रमति । लयभावम्, अट्टहासं, अनालिङ्गनं, रौद्रं, कारुण्यं, शान्तं, विविधहस्तमुद्राः प्रदर्शयति । गायकवद् मुखं चालयति । रङ्गे धूमो व्याप्नोति । लयव्यञ्जकं वाद्यानुसारं नटति, पश्चात् शिलायते) (सृष्टिस्थितिलयगीतानि ध्वन्यन्ते, अभिनयं कुर्वन्तावुभौ शिलायितौ)

॥ इति पाराशर्य-नवराजकट्टेलविरचितं मौनं भावनाटकम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रेतात्मा

पात्रपरिचयः

प्रेतः, अन्यप्रेतः, अपरप्रेतः – आततायिभिर्मारिताः प्रेताङ्गता

पथिकः, अन्यपथिकः, अपरपथिकः – हिंसायां संलग्नाः आततायिनः

स्थानम् – नेपालस्यारण्यपथः । समयः – रात्रिः ।

(द्वौ श्वेतवस्त्रधारिणौ द्वौ कृष्णवस्त्रधारिणौ प्रेतात्मानौ रहसि स्थितवन्तौ स्तः । तयोः लम्बः केशराशिः विकीर्णः, नयने कज्जलेन विकृते नारीछाया आकृतिर्वा दृश्येते । अपरौ कृष्णवस्त्रधारिणौ प्रेतात्मानौ परस्परं वार्ता कुर्वन्तौ अमृतलाभाय प्राप्तं चैतन्यमयं जीवनं वृथा गतमिति विचारयन्तौ स्तः । ततः एव घातकाः अपराधिनः तदेव मार्गेण रात्रौ कुत्रचित् गच्छन्तौ स्तः । आकस्मिकरूपेण तौ प्रेतात्मानौ अग्रे आगत्य तर्जयतः । ते कदाचित् हुँ हुँ हुँ, कदाचित् हीँ हीँ, हीँ इत्यादयः शब्दाः कुर्वन्ति, भीतिदो ध्वनिश्चायाति, ते स्वघातकान् भ्रामं भ्रामं तर्जयन्ति)

प्रेतः

(साट्टहासम्) हीँ हीँ ३ *(द्वौ पथिकौ आकस्मिकरूपेण प्रेतच्छायया सन्तर्ज्य भीत्वा पततः)* अयि ! भो ! हा हा हा ३ । त्वं मम शरीरं त्रिंशत्खण्डान् कृत्वा बहुकालं मूर्च्छीयित्वा माम् अमारयः । मम पत्नी विधवा जाता । पिता पुत्रहीनो जातः । दुःखितः पुत्रः पुत्री च जनकरहितौ अजायतां, दुःखसागरे निमग्नौ । *(भीत्वा पततः, निःश्वासं कुरुतः)* ।

पथिकः

(सभयं कम्पमानः) मया न मया न, क्षम्यतां भो अहं तैः प्रचालित आसम् । मौढ्यात् तेषां वादे विश्वासः कृतः परन्तु ते धूर्ता वञ्चका आसन् न मया पूर्वं ज्ञातः अतस्क्षम्यतां भो । *(इति अवरुद्धेन स्वरेण गदन् भीत्वा आगतेन मार्गेण पलायेते ।)*

अन्यप्रेतः

(घातकेन सह पुनः अन्यः पथिक आयाति) हाहाहा ! हीहीही ! घातक ! शतशः पुरुषानमारय, मामपि अमारयः, निर्लज्जया भ्रमसि, जनान् वञ्चयसि ! अहं विद्यालये पाठयन्नासम्, छात्रान् तर्जीयित्वा, तान् रोदयन् कक्षातः मां समाकृष्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शिखरं नीत्वा वृक्षे लम्बयित्वा भुसुण्डिना अमारयः । हाहाहा, हीहीही *(विविधया आकृत्या तर्जयति । भयदो विविधो ध्वनिश्च श्रूयते, क्षणं शिलायते ।*

अन्यपथिकः

मया न मया न, भो क्षम्यताम् । अहं तैर्निर्दिष्टः । तत्क्षेत्रमेव मम नियन्त्रणे आसीत् तत्र ग्रामे लुण्ठयित्वा सङ्कलितानि षष्ठिप्रतिशतानि द्रव्याणि ममैव भवन्ति स्म । मया त्वं न मारितः स्यात् ते मां मारयन्ति स्म । धनानि सङ्कलितानि आदेशस्य तत्र पालनञ्चाभवत् । एतादृशी परिस्थितिरासीत् । *(इति कथयन् आगतेन मार्गेण निःश्वासं कुर्वन् मित्रैः सह पलायते) ।*

प्रेतः

(पुनर्मित्रेण सह अन्यः पथिक आयाति । नारीस्वरेण) घातक ! हाहाहा ! हीहीही *! – दृष्ट्वैव भूमौ पततः वक्षसि पादं विन्यस्य)* बहून् शिक्षकान्, कृषकान्, व्यापारिणः, नेतृञ्न् त्वम् अमारयः । मम घातक ! पत्युरग्रे, अहं मारिता, पतिरपि मारितः, तत्र च सार्ध नवमासपर्यन्तं गर्भाशये संरक्ष्य जनितां नवमासवयस्कां बालां मातृहीनां कारयित्वा त्वया मारिताहं, सा कतिदिनपर्यन्तं रुदन्ती मम मृतदेहे क्रीडन्ती स्तन्यं पीतवती । भीत्या आवयोः शवदाहोपि नाभवत् । *(हस्तावुत्थाय आक्रमणस्याभिनयं करोति । तौ च पलायतः।)*

अपरपथिकः

(भीत्या कम्पते, पतति, पुनरुत्थाय) 'मया न, मया न मारिता त्वं भो क्षम्यताम्' । अहमादिष्टः धूर्तैश्चौरैः । तदाहं 'ते महापुरुषाः, देशस्य समुद्धर्ता, जनतायाः क्षेमकर्तारः' इति मानितवान् । परन्तु ते कामक्रोधलोभमोहमदैः भरिताः मांसपिण्डाः सन्तीति बोधेन पश्चात्तप्तोऽहमरण्यवासाय गच्छन्नस्मि । *(भूम्यां मूर्च्छिता पथिकाः पलायन्ते, भीतिदा ध्वनयश्च श्रूयन्ते)* ।

प्रेतः

(मित्रेण सह अन्यः पथिकः समागच्छति) हुहुहु, हीहीही *(तौ पथिकौ भीत्वा पततः,तयोः पादयोः स्वपदं विन्यस्य)* अहं आशौचक्रियायामासम् । यूयं मिलित्वा मम पितुः हत्या विहिता । तदा बालोऽहं दशगात्रविधौ संलग्नः । तदा आशौचस्थानात् समाहृत्य खुकुरीशस्त्रेण अजमिव शिरश्छेदनं कृत्वा माममारयः । *(विविधया कृत्या तर्जयति, पथिकः पतति, शनैः पलायते च)*

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्यपथिकः

(सभीतं, सनिःश्वासम्) 'मया न, मया न घातितः, भो क्षम्यताम्' अहमपि अन्यैः दुष्टैः परिचालित आसम् । तदाहमज्ञानेन भ्रामितः, दक्षिणवायुना हतः । कदाचित् तदाहं भ्रमात् पश्चिमवायुना हतो धनस्य लोभेनाकृष्टः । प्रतिहत्यां मां धनं ददति स्म । इदं रहस्यमधुनापर्यन्तं न कैरपि प्रकाशितम् *(प्रेतः तर्जयति, भीत्वा आगतेन मार्गेण, भूम्यां घर्षन्, निःश्वासं कुर्वन् मित्रेण सह पलायते)* ।

अन्यप्रेतः

(मित्रेण सह अन्यः पथिकः समागच्छति) हुहुहु, हीहीही (अग्रे दृश्येते, तौ पथिकौ भयानकं दृश्यं दृष्ट्वा पततः) अहं पञ्चाशीतिवर्षको वृद्धः । मध्यरात्रौ मम गृहे प्रविश्य कापट्येन स्वशय्यायां निद्रितं मां लघुभुसुण्डिना प्रहृत्य घातितोऽहम् । *(हाहाहा । हीहीही उच्चार्य तर्जयति)*

पथिकः

(भीत्वा पतित्वा च) नाहं घातकः, अहं आदेशपालकः, भो क्षम्यताम् । तदाहं पश्चिमवायुनाहतः, मादकद्रवैः दुष्टान्नेन दूषितः, अत उग्रकार्ये संलग्नः । तैर्भणितमासम् । 'भ्रान्तियोजनायाः साफल्ये सति मां काष्ठमण्डपे भवनं दास्यन्ति, कुलीनकन्यया सह विवाहो रच्यते । भोगिनीभिः परिवृतोऽहं कुबेरो भविष्यामि ।' परन्तु सा भ्रान्तिरासीत्... *(मित्रेण सह निःश्वासं कुर्वन् पलायते)* ।

अपरप्रेतः

(मित्रेण सह अन्यः पथिकः समागच्छति) हुहुहु, हीहीही (अग्रे दृश्यते, तौ पथिकौ भीत्वा ततः) त्वं मां कष्टप्रदं मृत्युममारयः । त्वया मन्दिरे मलमूत्रत्यागपूर्वकं शिवस्यापमानं विहितं, मुख्याभियुक्तस्तु तेनैव कारणेन मानसिको दीर्घरोगी च भूत्वा मृतः । हंहो हंहो त्वमधुनापि श्वसन्नसि । जीवन्मृतः ! सखिभिः सह त्वया प्रकृतिरूपायाः मातृशक्त्याः अपमानं विहितं, वासनावशाद्दुराचारो विहितः । कुत्रचित् तासां कौमार्यं नाशितम् । कुत्रचित् सतीत्वं नाशितम् । *(विविधया आकृत्या हाहाहा ! हीहीही उच्चार्य तर्जयति ।)*

पथिकः

(भीत्या पतति) मया न मया न, भो क्षम्यताम्, अहन्तु विधर्मिणामन्नेन दूषितः आसम् । ते यथेच्छं द्रव्यं ददति स्म । तदा विधर्मिणां सहस्रं केन्द्राणि आसन् । अधुना तेषां अष्टादशसहस्रं केन्द्राणि सन्ति । एतादृशं षड्यन्त्रं द्रव्यलुब्धो मया न

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बुद्धम् । विदेशे दूतावासे च तेषां योजना निर्मीयते स्म । ततः कोटिशो रूप्यकाणि समायान्ति । वयं कणलोभेन भस्मीभूताः ।

(भल्लूकानां समूहः ततो गच्छति । भीत्वा भूम्यां घर्षन्, निःश्वसन् मित्रेण सह पलायते) ।

प्रेतः

(मित्रेण सह अन्यौ पथिकौ समागच्छतः) हुहुहु ! हीहीही ! हीहीही *(अग्रे दृश्यते, तौ पथिकौ भीत्वा पततः)* हुतात्मनां प्रतिनिधिरस्मि । त्वया तव समूहेन द्विचत्वारिंशत् बालयुववृद्धा एकस्मिन्नेव याने बम्बास्त्रेण गगने उड्डाय्य मारिताः ।

(बम्बास्त्रस्य ध्वनिश्श्रूयते, व्याघ्राणां समूहश्च तेनैव मार्गेण पथान्तरे गतवन्तः, विविधा ध्वनयश्च ध्वन्यन्ते, प्रेतव्याघ्रयोः मध्ये पथिकौ भीतभीतौ स्तः । *(विविधया आकृत्या हाहाहा ! हीहीही उच्चार्य तर्जयति)* ।

अन्यपथिकः

(भीतः, हस्तौ कम्पितौ स्तः) 'न मया एकोऽपि जनो घातितः, अहन्तु आदेशस्य पालनकर्ता एव । अतो भो क्षम्यताम्, अहन्तु पश्चिमवायुनाहतः तदानीम् ।

(इति ब्रूवन् कम्पित्वा, भूम्यां पतन् मित्रेण सह पलायते) ।

अन्यप्रेतः

(मित्रैः सह अन्याः पथिकाः समागच्छन्ति) हुहुहु ! हीहीही ! हीहीही *(अग्रे दृश्यते, ते भीत्वा पतन्ति)* त्वया गोहत्या कृता, गोमांसं भक्षितम् । बलपूर्वकं पौरोहित्येन जीवन्तं मामपि गोमांसं भक्षयितवान्, तदा कालभैरव इव मां भुसुण्डिना प्रहृत्य खुकुरीशस्त्रेण शिरश्छेदनं विधाय तैः सह मम वपुः निष्प्राणं कृतम् ।

(विविधया आकृत्या हाहाहा ! हीहीही उच्चार्य तर्जयति)

पथिकः

(भीत्वा पतति) मया न घातितः, अहन्तु तैः साकं समूहे गतवानासम्, अयमेव मम दोषोऽतो मां क्षम्यतां भो । *(इति निगदन् तैः सह पलायते)* ।

प्रेतः

(सहयोगिसहितौ द्वौ पथिकौ समागच्छतः) हुहुहु ! हीहीही ! हीहीही *(अग्रे दृश्यते, तौ पथिकौ भीत्वा पततः)* रे घातक ! अहं पण्डित आसम् । जनानामुद्बोधनमेव मम कार्यम् । कुत्रचित् विद्यालयस्य, कुत्रचित् औषधालयस्य, कुत्रचित् देवालयस्य, कुत्रचित् मार्गस्य, कुत्रचित् स्वास्थ्यसेवायानस्य क्रयणार्थं सहयोगाय कार्याणि करोमि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्म। मम उद्बोधनं, तदा राष्ट्रसेवाञ्च असहमानेन कार्यमध्ये त्वया गोलिकास्त्रेण हतोऽहम्।

(विविधया आकृत्या हाहाहा ! हीहीही उच्चार्य तर्जयति)

अपरपथिकः

(भीत्वा धरायां निष्प्राण इव शेते)' मया न मया न, अहन्तु आदेशस्य पालकः एव, मया तु विरोधः कृतः, परन्तु ते अस्वीकृतवन्तः, अतः भो क्षम्यताम्। अहं नैरन्तर्येण पश्चिमवायुना हतः। द्रव्येण लुब्धः। ते यथेच्छं द्रव्यं ददति स्म। वैदेशिका द्रव्यदाने प्रतिस्पर्धां कुर्वन्तः सन्ति। तेषां दूतैर्भरितो देशः। ते विषकुम्भं पयोमुखमिव। *(इति गदति, मित्राणि तं संवोद्ध्य धावन्ति)*।

अन्यप्रेतः

(मित्रेण सह अन्यौ पथिकौ समागच्छतः) हुहुहु ! हीहीही ! हीहीही *(प्रेतरूपं दृष्ट्वा तौ पथिकौ भीत्वा पततः)* अहं शिक्षकः, तव गुरुः, मया त्वमपाठि, परन्तु अग्रे समागत्य नत्वा अङ्कमालं विधाय पृष्टभागे लघुभुसुण्डिना हतोऽहम्। *(विविधया आकृत्या हाहाहा ! हीहीही उच्चार्य तर्जयति, विविधवाद्य-ध्वनिश्च श्रूयते।)*

पथिकः

(भीत्वा कम्पते) अहं मूर्ख आसम्। अन्धोऽहं दुष्टैः परिचालितः तदा। अधुना पश्चात्तापस्याग्नौ ज्वलन्नस्मि। शोषकसामन्तवञ्चकधनाढ्यानो विनाशेन देशस्योन्नतिर्भविष्यतीति भ्रमे मामपातयन्। अतो मयाऽपराधः कृतो, हिंसा विहिता भो क्षम्यताम्'(इति निगदन् भीत्वा मित्रैः सह पलायते)।

अपरप्रेतः

(अन्यौ पथिकौ समागच्छतः) हुहुहु ! हीहीही ! हीहीही (प्रेतरूपं दृष्ट्वा तौ पथिकौ भीत्वा पततः) अहं व्यापारी, हुङ्कृत्य, तुङ्कृत्य अहं तर्जितः। मया बहूनि धनानि प्रत्तानि। अन्त्ये मम प्राणा अपहृताः। *(विविधया आकृत्या हाहाहा ! हीहीही उच्चार्य तर्जयति)*

अपरपथिकः

(भीत्वा पतति) द्रव्यलोभेन मयापराधो विहितः। मया बहूनां जनानां हत्या विहिता। अनेकेभ्यो धनिकेभ्यो धनानि आहृत्य पश्चात् तान् दातृनहं हतवान्। अनेन कार्येण लुण्ठितस्य धनस्य गोप्यता रहस्यमयता, सुरक्षा च जायते स्म। भो क्षम्यताम्' *(इति निगदन् भीत्वा आगतेन मार्गेण, मित्रैः सह पलायते)*।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्यप्रेतः

(तर्जयति विविधैः स्वरूपैः) हाहाहा ! हीहीही ! अहं युष्माकमेव सैनिकः, युद्धे पाद एव गोलिकया भग्न आसीत् । परन्तु मम शिरश्छेदनं कृत्वा गर्ते निक्षिप्वान् । तथैव तेऽन्येषामपि बहूनि शिरांसि छित्वा गर्ते क्षिप्तवन्तः । एष महानपराधः कृतः । तस्य दृश्यादृश्यं दण्डं तु भोक्तव्यम् ।

अपरपथिकः

(भीत्वा पतति, कम्पते च) क्षम्यतां भो ! अहमपि आदिष्टः । तथात्वे सति शिरसोऽभावे जनानां परिचयो नैव जायते । सुगोपनं भवति स्म । अत एव रथिभिरादेशो दत्तः । आदेशस्य पालनकर्तारो वयम् । *(सोऽपि पलायते)* ।

प्रेताः

(क्षणं शून्यं प्रतिभाति । रङ्गो धूमायते । हस्तस्योपरि हस्तं विधाय, चक्राकारेण भ्रमन्ति) अहं शिक्षकः, अहं नवप्रसूतिका, अहं ८५ वर्षीयो वृद्धः *(सदण्डम्)*, अहं पुरोहितः, अहं पण्डितः, अहं दुःखिता नवतिवर्षीया याने हता वृद्धा *(धनुरिव नुता, सदण्डा)*, अहं गोलिकया हतो छात्रः, अहं दशगात्रविधौ संलग्नः किशोरः अहं याने हता बाला, अहं व्यापारी, अहं सर्वकारस्य कर्मचारी, अहं प्रहरी, अहं सैन्याधिकृतः ।

(गोलाकारेण स्वस्ववस्त्राभूषणे दृश्यन्ते, कदाचित् अग्रे, कदाचित् पृष्टभागे सरन्ति । 'अपराधिनः खलु दण्डनीया' इति ध्वनिः समायाति । अन्ते शिलायन्ते, विविधाः ध्वनयः गुञ्जन्ति)

त्रिभिर्वर्षैः त्रिभिर्मासैः त्रिभिःपक्षैर्दिनैस्तथा ।
अत्युत्कटैः पापपुण्यैरिहैव फलमश्नुते ॥ (हितोपदेशः)
हिंस्रः स्वपापेन विहिंसितः खलः साधुः समत्वेन भयाद् विमोच्यते ॥ (श्रीमद्भागवत)

(इति च रङ्गे गुञ्जति । क्रमशः पटाक्षेपो जायते)

॥ इति पाराशर्य-नवराजकट्टेलविरचितं प्रेतात्मा-नाम नाटकम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रतिष्ठा

पात्रपरिचयः

प्रतिष्ठा	: चिन्तानाथस्य पुत्री		: चिन्तानाथः प्रतिष्ठायाः पिता
जयन्ती	: सखी, भूमिका, अभिमा		: प्रतिष्ठायाः सहयोगिन्यौ,
यज्ञराजः	: चिन्तानाथस्य पूर्वनाम		: सविताः प्रतिष्ठायाः पूर्वनाम

प्रथमं दृश्यम्

स्थानम् - चिकित्सालयस्य उपचारकक्षः । समयः - अपराह्नः।

(प्रतिष्ठा, जया, विजया, प्रमदादयाश्छात्राः १२ कक्षां समुत्तीर्य सर्वकारस्य छात्रवृत्तिं प्राप्य छात्रावासे स्थित्वा प्राधीत्य काचन चिकित्सकः, स्थपतिः, अधिवक्ता, प्राध्यापकः, शाखाधिकृतश्चेत्यादिपदे विराजिताः सन्ति । विक्षप्तः पिता कुत्रास्ति सा न जानाति सोऽपि पुत्री कुत्रास्ति न जानाति । पितृपुत्र्योः आकस्मिकरूपेण चिकित्सालये सङ्गमो जायते)

प्रतिष्ठा

(खिन्नतया परिभ्रमन्) अद्य महती दुर्घटना जाता, बहवो यातारोऽङ्गभङ्गाः, बहवो मृताश्च । पञ्चविंशतिजना अत्रोपचाराय समानीताः सन्ति । अस्माकं कर्तव्यमेव येन केनापि एतेषाम् आर्तजनानामुपचारः, तेषां स्वास्थ्यलाभश्च भूयात् । अद्य कोऽपि अवकाशे गृहे नैव तिष्ठेत्, आरात्रं पीडितानां सेवा विधेया । *(तत्र जनशङ्कुलं ज्ञायते, न दृश्यते, मृतानां स्वजना रुदन्तः सन्ति, इतस्ततः कुर्वन्तः सन्ति)*

भूमिका

(श्वसन्तम्) महोदये । मया कुत्र गन्तव्यं, किं कार्यं सम्पादनीयम् । अत्र बहवो जनाः हताः, क्षतविक्षताश्च सन्ति । किं कर्तव्यविमूढाहम् ।

प्रतिष्ठा

(शीघ्रतया) गच्छ तत्र सप्तमाङ्कस्य शय्यायां सुप्तो रोगी व्रणपीडया रुदन्नस्ति । *(मनसि 'प्रथमाङ्के पञ्जीकृतो रोगी च रुदन्नस्ति, तत्र गच्छामि')*

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भूमिका

प्रतिष्ठे ! त्वमेका एवात्रासिः । त्वां कः सहयोगं करिष्यति !

अभिमा

(सस्मितम्) प्रष्ठिायाः सहयोगमहं करोमि ।

प्रतिष्ठा

(प्रसन्नतया उपचारोपकराणि प्रगृह्य व्रजति) वृद्धपितः ! का घटना सञ्जाता ! पितः भवतो व्रणं तु नाधिकमस्ति, अत्याहितं मा विधेयम् । *(मनसि 'अत्यन्तं कष्टकरमस्ति, भीतिदं व्रणमस्ति' इति)* पितः किञ्चित् हसतु, पीडारहितमस्मीति स्मरतु । शीघ्रं स्वास्थ्यलाभं कारयित्वा त्वां गृहं प्रेषयिष्यामि । चिन्ता मा विधेया ।

चिन्तानाथः

(विचित्रभावेन) का मां पित इति मधुरेण स्वरेण सम्बोधयति ?

किमाश्चर्यम् ! मम तु दुर्दैवात् सर्वो नष्टः ।

(मनसि –हिंस्रकदलैः पत्नी घातिता, अहं विक्षिप्तः, पुत्री आसीत्, यदि सापि जीविता स्यात् अस्मिन्नेव वयसि भवति स्म) । *अश्रुं विमुञ्चति)* हतभाग्योऽहं कथं त्वया 'पितः' इति जीवनरसमयेन कोमलपदेन सम्बोधितः पुत्रि !

प्रतिष्ठा

(सस्मितम्) वृद्धपितः ! मा रोदिहि, अत्र बह्व्यः पुत्र्यः सन्ति । चिन्ता मा विधेया । (अन्ये चिकित्सका अपि आगच्छन्ति, निर्दिशन्ति, व्रजन्ति, सा व्रणस्य परिष्कारमुपचारञ्च करोति, अभिमा उपकरणानि आनयति, नयति च)भवतः परिवारजना कुत्र सन्ति पितः !

चिन्तानाथः

(अश्रूणि विमुच्य) पुत्रि ! अहमेकी एव समागत, एकाकिरेव पर्यटन्नस्मि, एकाकी एव इतो व्रजिष्यामि । एषैव प्रकृतिसृष्टिप्रणाली ।

प्रतिष्ठा

(विकृताकृत्या) क्षन्तव्याऽहं पितः । औषधक्रयणाय के सन्ति ? ते अत्र सन्ति चेद् किं विधातव्यं, किमौषधं क्रेतव्यमिति तानहं निर्दिशामि ।

चिन्तानाथः

(दीनवचसा) पुत्रि ! अधुनात्र केऽपि न सन्ति, त्वमेव मम पुत्री, मां जीवय, मह्यं पुनर्जीवनं देहि । (सा पितरं, मातरं, बाल्यवयश्च स्मरति) किमर्थ चित्रीयसे पुत्रि ! (स प्रतिष्ठां, बालपुत्रीं, जायां, बालपुत्रीं स्मरति) ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रतिष्ठा

(सत्वरम्) किमपि नहि । भवत उपचारेऽर्थस्य व्यवस्था कथं विधेया इति मम मनसि चिन्ता नृत्यति । अधुनाहमेव द्रव्यस्य व्यवस्थां सम्पादयामि, पश्चात् किं कर्तुं पार्यते द्रक्ष्यामि । भवतो वचनानि आकृतिश्च किमर्थं मां समाकर्षति ? *(इतस्ततः करोति, जनान्तिकम् 'यदि पिता जीवितः स्यादित्थमेव वयसि मम पितापि भवति स्म' इति उच्चारयति)* ।

चिन्तानाथः

(हस्तावुत्थाय किञ्चित् कथनायोत्सुको दृश्यते, वक्तुं नैव शक्नोति) पुत्रि ! अहं यायावरः । मम शरीरमेव धनम् । मम वचनमेव धनम् । *(अश्रूणि विमुञ्चति)* ममापि ममापि ...पुत्रि !*(अटति)* सा....मम ...।

असारे खलु संसारे न सन्ति च ममात्मजाः ।
मेचीं व्रजामि कालीञ्च हिमं पर्वतमस्तकम् ॥

प्रतिष्ठा

(सा चित्रायते, दीपस्य विविधा स्थितिर्दृश्यते, वाद्यध्वनिश्च श्रूयते) भवतो गृहं कुत्रास्ति पितः ! गृहस्थजीवनं नैव यापितं, परिवारस्य सदस्या भवेयुः ते किं कुर्वन्तः सन्ति ? *(मनसि 'किमर्थं मां समाकर्षति एषो वृद्धपुरुषः, पूर्वमेव परिचितं स्यादिव')* कथयतु किञ्चित् ।

चिन्तानाथः

(अश्रूणि सम्पात्य मनसि –किमर्थं बालेयं मां समाकर्षति पूर्वमेव परिचितं स्यादिव) आसन्, भवेयुः, तैः विस्मृतोऽहं, मया च विस्मृता ते । मम कारुण्यमयं जीवनमस्ति श्रुणोषि बाले ! अहन्तु यानेन शैत्यप्रदेशं गच्छन् आसम् । मार्गे दुर्घटनाऽभवत् । सव्रणोऽहं उपचाराय अत्र आनीतः स्याम् । *(स पुनश्च मूर्च्छायते, परीक्षणं करोति, उपचारयति च । दैन्यसूचकं वाद्यं गुञ्जति, प्रकाशः सरति, छायायां कथां कथयन् दृश्यते, पुनः तिमिरायते ।)* 'पुत्रि । समागच्छ, अहं मम जीवनस्य गाथां श्रावयामि' इति । ध्वनिः श्रूयते । स पुनर्मूर्च्छायते) ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वितीयं दृश्यम्

स्थानम् - कश्चिद्ग्रामस्य प्रकोष्ठः । समयः - रात्रेर्द्वितीयप्रहरः ।

(सघनतिमिरे प्रकाशः क्रमशः प्रदीप्यते । घोषो दृश्यते । तत्र काश्चनच्छात्राः सविता, जयन्ती, जया च पठन्त्यो विमर्शयन्त्यो दरीदृश्यन्ते । एका 'इयं सृष्टिः कथं समागता ? अपरा 'इयं खलु परमाणुसङ्घटनेन तस्य विस्फोटनेन च जाता' अपरा 'अस्मिन् विस्फोटनसिद्धान्ते सप्तप्रश्ना उत्थिताः अतो रश्मिसिद्धान्त आविष्कृतः' । प्रतिष्ठा 'श्रुता किं पुनश्च कृषकाः, गृहिण्यः, शिक्षकः, प्रहरी च व्याजेन मारिताः । मानवहत्यायाः शृङ्खला कदा पर्यन्तं चलिष्यति' । विद्युद् द्योतते, विस्फोटनस्य ध्वनिश्श्रूयते, मेघो गर्जति, दैन्यसूचकं वाद्यञ्च श्रूयते)

यज्ञराजः

(प्रविश्य) अयि ! भो ! के सन्त्यत्र गृहाश्रमे । *(साक्रोशम्, परितः त्वरया गच्छन्, उच्चैःस्वरेण)* अरे ब्रह्मवादिन्यः ? किं कुर्वत्यः सन्ति, बाले ! मम वार्ता नैव श्रुता ? कियद्वारं मया ध्वनिः कृतः ! *(सक्रोधम्)* झटिति ह्यागच्छ पुत्रि । *(रौद्ररूपेण परितो भ्रमति)* ।

सविता

(सहास्यं, साभिनयम्) भो पितः ! किमर्थं भवान् रौद्ररूपेणात्र समागतः ? अहं अग्रजाभिः सह पठन्त्यस्मि । अग्रजा विदुष्यः सन्ति, ता मां पाठयन्ति, तथैव आचार्याश्च सन्ति पाठनाय । शिष्टं वदतु भवान् ।

यज्ञराजः

(सक्रोधम्) अयि पुत्रि ! अजाभिः गोभिश्च क्षेत्रं प्रविश्य धान्याङ्कुरा भक्षिताः । दिनऽपि त्वमत्र समागत्य वार्तां कुर्वाणा तिष्ठसि, अधुनापि वार्तायामसि । आत्मजे ! मातापि गृहकृत्यैः श्रान्ता भवेत् । तस्यास्त्वं सहाय्या भव । तव पठनेन किं भवति ? नार्यस्तु गृहदीपिका एव । तव विवाहस्य प्रस्तावः उत्तमपरिवारात् समागतः । अहं तु विवाहाय तत्परोऽस्मि ।

सविता

(सभीति) जनक ! अग्रजोऽप्यस्ति गृहकृत्य-सम्पादनाय । स अजा गोचारणाय

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रभवतु, स पठनेऽपि दत्तचित्तो नास्ति । धूर्तैः सह तस्य व्यवहारो दृश्यते । रात्रौ च कुत्र गच्छति, न ज्ञायते । विवाहस्य प्रस्तावः समागच्छेत् परन्त्वहं पठित्वा कृतस्नातका विचारं करिष्यामि पितः !

यज्ञराजः

(सक्रोधम्) अग्रजस्य वार्तां मा कुरु, स तु कुलपुत्रोऽस्ति । स तु वंशं विस्तारयति, पितृ३न् तारयति, पुन्नामनरकात् त्रायते इति पुत्रः इति पुराणप्रसङ्गे मया पण्डितमुखात् श्रुतम् । एवञ्च पुत्र्याः विवाहः पितुः परमकर्तव्यं दायित्वञ्चातः प्रस्तावं स्वीकुरु ।

सविता

(साश्चर्यं नटति) पितः ! पुं नाम नरकात् त्रायते इति व्युत्पत्तौ एव पुत्रीशब्दोऽपि व्युत्पाद्यते । पुत्री अपि वंशं विस्तारयति, पितृ३न् तारयति । उद्वाहिता पुत्री गृहस्थमुद्दीपयति । उभयोः कुलयोर्गृहदीपिका भवति । परन्त्वहं स्नातकमत्तीर्य पितुराज्ञां स्वीकरोमि ।

यज्ञराजः

(सक्रोधम्) पुत्रि ! अधिकं मा ब्रूहि, नार्याः पठनेन किमपि न भवति । विवाह्य पतिगृहं गन्तव्यं, पतिसेवा कर्तव्या, पतिरेव नारीणां देवता मता, तत्र श्वश्रूश्वसुराणां सेवा कर्तव्या, गृहकृत्यं सम्पादनीयं, गृहस्थाश्रमे अजागोमहिषाणां पालनपोषणे कर्तव्ये, कृषिव्यवस्था विधातव्या, अभ्यागतानां सेवा कर्तव्या, एतानि कार्याणि सम्पादयितुं विद्या विनापि शक्यते, किमर्थं पठनीयम् ।

सविता

(सरोषम्) पितः । भवान् किं कथयति, माम् अज्ञानस्य महान्धकारे निमज्जयितुं वाञ्छसि ! अहं भवत आत्मजास्मि, भवतः अंशोऽस्मि । अहं भवतः वंशमुद्दीपयामि । यथासमयं विवाह्य पितृकुलं पतिकुलञ्च पावयामि विस्तारयामि च ।

यज्ञराजः

(सक्रोधम्) आत्मजे ! अधिकं मा ब्रूहि, *(ताडयति)* गच्छ गोष्ठं, घासादिसङ्ग्रहं सम्पादय । *(प्रतिष्ठा रुदति)* । पाचनादिक्रियामपि कुरु । पश्चाद् विवाह्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुत्रादिकमुत्पाद्य तेषां पालनं पोषणं विधातव्यम् । तदवसरे तव पुस्तकं न सहाय्यं भवति ।

जयन्ती

(सोद्वेगम्) पितः ! किमर्थम् अत्र समागत्य कोलाहलः क्रियते ! किं सविताभवतः पुत्री नास्ति ? सा सम्यक्तया पठन्ती अस्ति । अवसरो लभ्यते चेत् पुत्र्याऽपि समाजं राष्ट्रञ्च परिवर्तयितुम् अग्रे नेतुं च शक्यते । तयापि पितृवंशस्य राष्ट्रस्य च नाम ख्यापयितुं पार्यते ।

सविता

(सकरुणम्) पितः ! सर्वदैव मां किमर्थं घक्ष्यसि ? पुत्री पठति, पाठयति, गृहकृत्यञ्च सम्पादयति, पुत्रस्तु पठति खेलति एव । पठनेऽपि मनोयोगं नैव ददाति । यः कोऽपि पुत्रीं न पाठयति, पठिता कुलवधूः कथं समुद्वाह्यते ! पठिता कुलवधू नो चेत् कथं कुलं दीपायते ? कथं गृहस्थसुखं लभ्यते ?

यज्ञराजः

(सरौद्रम्) नाधिकं ब्रूहि बाले ! प्रथमं गृहकृत्यं सम्पादय, तदनु अवकाशो लभ्यते चेत् पठ । अस्माकं माता, पितामही, प्रपितामही, वृद्धप्रपितामही च निरक्षरतयैव गतवत्यः, परन्तु तासां गृहस्थजीवनं सम्यक्तया प्राचलत् । अस्माकं कुले न नारीणां पठनपाठनस्य परम्परा दृष्टा ।

सविता

(साश्चर्यम्) जनक ! किं कथयति भवान्, प्राचीनकालादेव नारीशिक्षा प्राचलत्, नो चेत् गार्गी, मैत्रेयी, कात्यायनी, घोषा, मदालसा, अनेकाः नार्यः विदुष्यः कथमभूवन् ? अथ च जनकस्य ब्रह्मसभायां गार्गी कथं महर्षिं याज्ञवल्क्यं हुङ्कृतवती ? । अनेका वेदमन्त्र- द्रष्ट्र्यः ऋषिकाः सन्ति । पठनपाठनस्य परम्परा नासीत् चेत् कथं इमे विदुष्योऽजायन्त !

यज्ञराजः

(सोद्वेगम्) भवेयुः, विदुष्यो जायेरन्, तथापि गृहव्यवहारस्तु न प्रचलति । उदरपूरणं न जायते, जीवनवृत्तिस्तु न अग्रे प्रसरति । अतः कार्यं करणीयं, क्षेत्रं कर्षणीयं, घासः कर्तनीयः, भारो वोढव्यः, असौ व्यवहारः एव शिक्षामूलम् । सद्विचारः, सदाचारः सद्व्यवहारः एव गृहस्थमूलम् *(पिता गच्छति, प्रतिष्ठा रौति)* ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सविता

(सदार्द्र्यम्) पिता यत् कथयतु, रात्रौ पठित्वापि परीक्षामुत्तीर्य उच्चशिक्षायां गन्तव्यम् । उच्चशिक्षार्जने यदि छात्रवृत्तिर्लभ्यते चेत् मां कोऽपि पठनात् अवरोद्धुं न शक्नोति । पठनाय गृहं परित्यज्यापि सर्वं प्रयत्नं करोमि ।

जयन्ती

(प्रसन्नतया) त्वया या प्रतिज्ञा विहिता सैव तवोत्कर्षस्य कारणं भविष्यति । कर्मणैव मानवः सिद्धिं विन्दति । सङ्कल्प एव परिणामस्य कारणम् । कर्मणो भाग्यस्य चोदयं याति चेत् भविष्यस्य कनकद्वारमुद्घाटयितुं शक्यते, सफलता च मिलति ।

जया

सविते ! सवितेव तव जीवनं सवितायते । यत्नो विधेयः ।

सविता

(सकारुण्यम्) सखे ! अहं परितो दुःखसागरे निमग्ना । बाल्ये एव जननी दिवङ्गता । विमाता समागता । परन्तु तस्या मनसि मातृत्वं नास्ति । सापि मां तर्जयति; पिता पठनेन किं भवतीति निगदति । अहं 'विद्ययाऽमृतमश्नुते' इत्यत्र विश्वसिमि । परापराञ्च विद्यां ज्ञात्वा ऐहिकं पारलौकिकञ्च दिव्यपथं समुज्वलयितुं वाञ्छामि ।

यज्ञराजः

(सोद्वेगम्) यूयं वार्तां कुर्वन्तो वर्तध्वे, निशा समागता । पुत्रि ! स्वकीयं गृहकृत्यं सम्पादयितुं गच्छ । सावधानतया कार्याणि कुरु । अद्यापि ग्रामेऽतिथयः समागताः सन्तीति श्रूयते ।

(यवनिकायाः पृष्टभागे कोलाहलश्श्रूयते । क्षणान्तरं विष्फोटनस्य ध्वनिश्श्रूयते, रङ्गं धूमायते, कोलाहलायते च । विद्युद् द्योतते । प्रकाशः कदा तिमिरायते, कदा प्रदीप्यते, जना इतस्ततः कुर्वन्तः सन्ति । परस्परं ते 'पितः !, पुत्रि !, सखे जयन्ति ! सखे सविते !' इति गदन्ति । करुणाकरो वाद्यध्वनिर्गुञ्जति) ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तृतीयं दृश्यम्

स्थानम् - औषधालयस्य प्रकोष्ठः, समयः - सन्ध्या

(तिमिरे प्रकाशपुञ्जः क्रमशः प्रसरति, करुणामयं वातावरणं दृश्यते, करुणं वाद्यञ्च गुञ्जति। प्रकाशः सरति, कुत्रचिच्छाया, कुत्रचित् प्रकाशः)

प्रतिष्ठा

(अश्रूणि विमुच्य) पितः ! किमभवत् ? उत्तिष्ठोत्तिष्ठ ! किं रहस्यं कथयन्नासीत्, चेतनामेहि, *(उपकरणेन परीक्षणं करोति, उपचारस्य विविधप्रयत्नं करोति, सहयोगिन्योऽपि समागच्छन्ति)*

चिन्तानाथः

(श्वासकाशौ बाधते, शनैः शनैः) बहवो जनास्तत्र घातिताः, अहमौषधालये षट्मासान् यावत् स्थितवान् । पत्नी, पुत्रः, पुत्री च तत्रैव घातिताः इति श्रूयते । पुत्री तु जीवितासीदिति भणन्ति जनाः, उपचाराय काष्ठमण्डपं नीता, परन्तु सा जीविता, मृता, विलुप्ता वा नाहं जाने। अनेकवर्षाणि मया सा अन्विष्टा, कुत्रापि सा नैव लब्धा।

प्रतिष्ठा

(दैन्यभावेन) मम गृहमपि ग्रामे एवासीत्, तत्र विष्फोटनेन गृहं ध्वंसितं, माता, अग्रजः, पिता तत्रैव पञ्चत्वं गताः इति भणन्ति जनाः । अहञ्च अनाथत्वात् सर्वकारीयसौविध्ये अधीत्य, पश्चात् छात्रवृत्तिं लब्ध्वा चिकित्साविज्ञानमपठम् । पितुर्मातुश्च आशिवदिन, ईश्वरस्य कृपया, स्वस्य श्रमेण च अहमत्रेदानीमस्मि ।

चिन्तानाथः

(अवरुद्धेन स्वरेण) पुत्रि ! ममापि पुत्री जीविता स्यात् त्वमिव तव वयसीव जायते स्म। तस्यापि पठनेऽतीव रुचिरासीत्। परन्तु अहं 'नारीभिः किमर्थं पठनीयं, पठनेन को लाभः' इति वदामि स्म। मम मौढ्यात् तस्या भावना, पठनपाठनञ्च क्षतविक्षतं जातम्।

प्रतिष्ठा

(सशङ्कम्) भवतः पुत्र्या नाम किमासीत् पितः !

चिन्तानाथः

(किञ्चिद् विचार्य) वयं सवितोति वदामः स्म। तस्याः कपोले तिलकमासीत्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रतिष्ठा

(क्षणं विचार्य, मनसि 'मामपि जनाः सवितेति गदन्ति स्म, तिलकमासीत्, शल्यक्रिया -क्रमे तिलको गतः') सर्वकारस्य निकाये गत्वान्वेषणं नैव विहितम् ? कथं सा लुप्ता जायेत । भवतो नाम ग्रामे किमासीत् ? (वंशीवाद्यं गुञ्जति, स्मृत्वा, विचार्य) किं यज्ञराजो वदन्ति स्म जनाः ?

चिन्तानाथः

(रोमाञ्चितो भूत्वा) आम् भवती कथं ज्ञातवती ! मां जना यज्ञराज इति कथयन्ति स्म । त्वं मम बाला सवितैव भवितव्या ! *(साश्चर्यम्)* वत्सले ! मम तनये ! आगच्छ मम कुक्षौ । एष तव दुष्टः कठोरो मूर्खः पितास्ति *(हस्तावुत्थापयति, रुदति च)* ।

प्रतिष्ठा

(रोमाञ्चिता) पितः ! त्वमेव मम पितासि । विष्फोटनपश्चात् सव्रणाऽहं ग्रामादत्र समानीता, अत्रैव उपचारो विहितः, अत्रैव स्थित्वा कतिवर्षं कष्टं सोढ्वा सर्वकारीय-सौविध्ये समधीतवती । पितः ! स्वस्थो भवतु, मृत्युं विजित्य व्युत्थितो भवतु, पितः ! व्युत्थाय मां पश्य, मम कार्यं पौरुषं च पश्य भो ! मत्कृते त्वमेव पिता, त्वमेव मातासि । मातुर्ममताया अनुभवो नैव लब्धः । पिता मह्यं पितृत्वं मातृत्वञ्च ददातु ।

चिन्तानाथः

(किञ्चिद् व्युत्थाय रुदन्) पुत्रि ! अमुं दुष्टपितरं क्षमस्व । मौढ्येन मया दुर्वाच्यमपि उक्तम् । पठने निरुद्धा त्वम् । सोढव्या पुत्रि ! परिश्रमेण भगवत्कृपया च त्वया सफलताधिगता । दुर्घटनया, असत्यसूचनया च आवयोः सामीप्यविच्छेदो जातः ।

प्रतिष्ठा

(सविनयम्) पितः ! भवान् पुत्र्या पठनेन किं भवति इति कथयति स्म, परन्तु अद्याहमेव चिकित्सिक भूत्वा चिकित्सालयस्य प्रमुखत्वं बिभर्मि । सर्वे च चिकित्सकाः कर्मचारिणश्च मम निर्देशनानुसारं कार्यं कुर्वन्ति । अद्य विद्यायाः कारणात् स्थानं, मानः, सौविद्ध्यञ्चास्ति मत्कृते ।

चिन्तानाथः

(सविनयम्) अहं मूर्खोऽस्मि बाले, मया प्रपितामहीनां समये या परिस्थितिरासीद् तदेव विचारितः, समयो गतिशीलोऽस्ति, न कमपि प्रतीक्षते समयः । सर्वकारः अधुना नारीसौविध्याय कार्यं कुर्वन्नस्ति, तासां नारीणां विकासाय, समुत्थानाय अनेका योजनाः समानीताः सन्ति इति ज्ञात्वाहं प्रसन्नः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रतिष्ठा

(सगौरवम्) नारीणां कृते शिक्षाया व्यवस्था प्राचीनकालेऽपि कृतासीत् । मध्यकाले एव नारीशिक्षायाः विलोपो जातः । अधुना नारीशिक्षाजागरणं प्रचलितमस्ति । नारीणां जीवने मर्यादायुक्ता स्वतन्त्रता, सुखं, शान्तिः, प्रसन्नता च आनेतव्या । सम्मानपूर्णेन दाम्पत्य-जीवनेन भवितव्यमिति मम विचारः । ता मातृशक्तिरूपेण पूजनीया, वन्दनीयाश्च भवन्ति ।

चिन्तानाथः

(प्रसन्नतया) पुत्रि ! त्वयाऽहं बोधितः । क्षन्तव्योऽहम् । धन्या त्वं, धन्या तव ममतामयी माता । यया देव्या त्वं पठनायाभिप्रेरिता, सापि विस्फोटने मृता । अग्रजश्च विस्फोटने मृतः स्यात् । अस्माकं वंशस्य कुलतिलकं त्वमेव असिः । धन्या देवि ! त्वां प्राप्य अहमपि धन्यो जातः ।

(आलिङ्गनं कुरुतः । प्रकाशस्य विविधा गतिर्दृश्यते, वाद्यं श्रूयते, 'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता' 'नार्यो हि गृहदीप्तयः' 'नार्यो हि कुलदीप्तयः' इत्यादयो गुञ्जन्ति । पटाक्षेपश्च जायते) ।

इति पाराशर्य-नवराजकट्टेलविरचितं प्रतिष्ठानाम नाटकम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतं धर्मभूतये, जयतु संस्कृतं लोकभूतये ।
जयतु संस्कृतं राष्ट्रभूतये, जयतु संस्कृतं विश्वभूतये ।।

नेपालसर्वकारतः स्वीकृता सामाजिकी प्राज्ञिकी च सर्वकारीयेतरा संस्था

जयतु संस्कृतम् संस्थायाः प्रकाशनानि

१. मङ्गलग्रहः (काव्यम्) - डा. टीकारामः पन्थी
२. कृष्णाभिसर्पणम् (काव्यम्) - महाकविः भरतराजः मन्थलीयः
३. मीमांसातर्कभाषा - डा. काशीनाथः न्यौपाने
४. चन्द्रप्रभा (काव्यम्) - डा. टीकारामः अधिकारी
५. संस्कृतकवितासङ्ग्रहः (प्रथमपुष्पम्) - संयुक्तसम्पादनम्
६. कलमाक्षरचरितकाव्यम् - प्रा. तेजः केशरी शर्मा
७. संस्कृतमा के छ ? - अनुसन्धानात्मकलेखसङ्ग्रहः
८. जयतु संस्कृतम् (मुखपत्रम्) - संयुक्तसम्पादनम्
९. प्राकृतपोखरा (संस्कृते) - अनुवादकः डा. लक्ष्मीकान्तः पन्थी
१०. लङ्कावतारसूत्रम् - अनु.डा. काशीनाथः न्यौपाने
११. चार्वाकदर्शनम् - प्रा. रेवतीरमणः खनालः
१२. गौतमन्यायसूत्रम् - अनु.प्रा. पद्मप्रसादः भट्टराई
१३. ब्रह्मसूत्रम् - अनु.प्रा.डा. दीर्घराजः घिमिरे
१४. जयतु संस्कृतम् (मुखपत्रम्) - संयुक्तसम्पादनम्
१५. संस्कृतकवितासङ्ग्रहः (द्वितीयपुष्पम्) - संयुक्तसम्पादनम्
१६. कामकलाविलास - प्रा. विद्यानाथ-उपाध्यायः
१७. जैनदर्शनं - तत्त्वार्थसूत्रम् - डा. चन्द्रमणि नेपाल
१८. दर्शनसारामृतम् - लोकनाथलुइँटेलः
१९. मीमांसापरिभाषा - प्रा.डा. ऋषिरामपोखरेलः
२०. समीक्षात्मकग्रन्थ - ध्रुवभट्टराई
२१. ब्रम्हाण्डपुराण - डा. बद्रि पोखरेल
२२. नेपालगौरवम् (महाकाव्यम्) - प्रा.डा. विष्णुप्रसादशर्मदेवकोटा
२३. संस्कृतकाव्यसिद्धान्त समीक्षा - डा. नवराज कट्टेल
२४. कर्मफलम् (संस्कृतरूपकसङ्ग्रहः) - प्रा.डा. नवराजकट्टेलः

ISBN 978-9937-9491-3-2

जयतु संस्कृतम्
केन्द्रीयकार्यालयः काष्ठमण्डपः नेपालः
दूरभाषः ०१-५७०५३७१

Jayatu Sanskritam, Kathmandu, Nepal